२८	अथसीमंतोन्नयनं	३०	अथाब्दपूर्तिः	३९	विवाहहोमः	५३	अथाशौचनिर्णयः
२७	अथजातकर्म	३१	अथवर्धापनेविशेषोभविष्ये	३९	हिरण्यप्रदानं	५३	तत्राशौचगर्भाशौचं
२७	अथषष्ठीपूजा	३२	अथचौलं	३९	लक्ष्मीपूजनं	५३	अथप्रसवाशौचं
२८	अथदत्तपुत्रकविधिः	३३	अथविद्यारंभः	४०	अथप्रदेयअह्निकं	५४	अथमृताशौचं
२८	अथसूतिस्नानं	३३	अथधनुर्विद्या	४१	आचमनं	६३	अथदासस्याशौचं
२८	अथनामकर्म	३३	अथक्षुरिकाबंधः	४२	स्नानविधिः	६७	आसन्नप्रायश्चित्तं
२९	अथदोलारोहः	३३	अथविवाहः	४३	तर्पणं	६८	अथप्रेतदाहकालः
२९	अथनिष्क्रमणं	३४	अथप्रयोगः	४४	अथप्रयोगः	६८	अथौर्ध्वदेहिकं
२९	अथषष्ठिअन्नप्राशनं	३५	अथमधुपर्कः	४५	अथब्रह्मयज्ञः	६९	अथप्रयोगः।
३०	अथोपवेशनं	३५	कन्यादानं	४८	अथदेवपूजा×	७०	अथास्थिसंचयनं
३०	अथैवकटिसूत्रं	३७	ततोहोमः	४९	अथतीर्थमहिमा	७५	अथपाथेयश्राद्धं
३०	अथअन्नप्राशनं	३८	सप्तपदी	५१	अथवैश्वदेवः	७६	अथनवश्राद्धं ॥

७५	अथप्रेतपिंडः	८२	अथप्रयोगः
७५	अथप्रयोगः	८३	इतिश्रीग्रंथस्यानु
[illegible]	अथप्रयोगः		क्रमणिकेःसमाप्तः
७५	अथएकादशाहः		श्रीगोपालकृष्णप्री
७८	अथवृषोत्सर्गः		
७८	अथप्रयोगः		
७९	अथैकोद्दिष्टं		
७९	अथदशदानादि		
८१	अथमासिकनिवृत्तिः		
८१	अथसपिंडनं		

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

॥ १० ॥ ॥ इति शूद्रकमलाकरी प्रारंभः ॥ ॥ ७ ॥

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

श्रीगणेशाय नमः प्रणम्य रामं पितरं गीकमलाकरशर्मणा रामकृष्णतनूजेन शूद्रधर्मो निरूप्यते १ तत्र शूद्रत्वमुक्तस
वर्णाजत्वं विप्रत्वादिवत् यद्यपि सर्गाद्यकालीन विश्वामित्राद्यौ च नैतत्तथापि तत्रादृष्टविशेषारब्धशरीरत्वमेव
ब्राह्मणत्वमन्यत्र तु पूर्वोक्तमेव शूद्रेपीति दिक् तत्र पद्भ्यां शूद्रो अजायत शूद्रो मनुष्याणामश्वः पशूनामिति वध्रूचैत
त्तिरीयादिश्रुतिभिर्मुखबाहूरुपज्जातास्तस्य वर्णा यथाक्रमं लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ब्राह्मणं क्षत्रियं वैश्यं
शूद्रं च निरवर्तयदिति मन्वादिस्मृतिभिश्च शूद्रस्य वर्णत्वेपि कर्मणां निषेधो वचनान्न्यायाच्चावगम्यते तथा च शतपथश्रु
तिः पदु वा एतच्छ्मशानं यच्छूद्र इति तस्माच्छूद्रं यज्ञे नावक्लृप्ता न हि देवता अन्वसृज्यंतेति च तैत्तिरीयश्रुतिः पद्भ्यां युज्य
ते इति पयुं जगमित्यर्थः न्यायस्तु पूर्वमीमांसायामपाधिकरणसिद्धो द्वैतीयीकः षाष्ठश्चात्र तथा हि अद्येधिकरणे स्वाध्या राम
याध्येतव्य इत्यध्ययनस्य कर्मीसन्नत्वं श्रुतत्वात् स्वाध्यायार्थत्वावगतेरक्षनस्य कर्मीसन्नत्वं व्यहणाहत्वं नादृष्टार्थत्वात् ३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

तावतैव विध्यर्थसिद्धौ नैव विचारानाक्षेपान्मीमांसाशास्त्रं पूर्वपक्षेनारंभणीयं तेन विचारमकृत्वैव वेदमधीत्य स्नायादिति स्मृते:
समावर्तितव्यं ततश्च क्रतुभिरध्ययनविधिसिद्धविद्याभावेनस्वयमेवाहजवच्छूद्रेपि विद्यासंपात्युत्सकादिनाविद्यासंपाद्यशू
द्रस्याप्यधिकार उक्तः षष्ठस्य प्रथमाधिकरणपूर्वपक्षे सिद्धांते अध्ययनस्यार्थधीहेतुत्वेन दृष्टार्थत्वात् तस्माच्चाम्नायाक्षराभिव्यक्तिद्वा
रेणार्थत्वमित्वतत्वं प्रत्ययावगतध्यायार्थत्वद्वारार्थत्वानार्थता हि चारं विना च तदयामात दर्थशास्त्रमारंभणीयं एतद्वायातोपि
र्नजितासमत्यत्राध्ययनविधेर्दृष्टार्थत्वादित्यतः शाद्हत्यारभ्य याशवरभाष्ये सूचितं तेन विचारं विनाविध्यर्थासमाप्तेर्वेदमधीत्य
स्नायादिति स्मार्तस्नानोत्कर्षः ॥ तत्रश्च अध्ययनविधेः उपनीतव्यमध्यापयीत उपनीयगुरुः शिष्यं महाव्याहृतिपूर्वकं वेदम
ध्यापयेद् नशौचाचारांश्च शिक्षयेदिति स्मृत्या उपनयनदृष्टार्थत्वाच्चोपनीतान्त्रयत्येच प्रवृत्तत्वा उपनयनस्य चाधाने सर्वशेषत्वा
दिति द्वितीयाध्यायन्यायेन वसंते ब्राह्मणमुपनीतग्रीष्मे राजन्यं शरदि वैश्यमिति श्रुतिभिस्त्रैवर्णिके एव विधानेन शूद्रे तदभा
वात् क्रतुविधानं चाध्ययनविधिसिद्धविद्यत्रैवर्णिकविषयत्वेनोपक्षीणामन्यथानुपपत्त्यभावेन विद्याक्षेपकत्वात् शूद्रस्य कर्मस्व

मु.क.
२

नधिकारइतिपाठेसित्यांनोपिफलं अत्रयद्यप्युपनयीततमध्यापयीतेत्यध्यापनेउपनीतग्रहणंनाध्ययने तथाप्यध्यापन
स्यकृत्यर्थत्वेनयाजयेदितिवदध्ययनकर्तृत्वादाचार्यनिष्ठत्वेनमानवकसंस्कारत्वाभावाच्चब्राह्मणउपगच्छेत्साधीयीतेतिविपरि
णतोयोत्तयः इतिविवरणादयः स्वाध्यायवचनमसाध्यर्थन्नणीतइतितदुपनयनसंस्कार्यस्यबटोरनेनैवविनियोगादुपादेयत्व
मितिपार्थसारथिरामणकादयः अतएवोपादेयत्वेनविवक्षितंपुंस्त्वं अन्यथापनयनेसंस्कार्यत्वाद्ग्रहैकत्ववत्पुंस्त्वाविवक्षायां
स्त्रीणामप्युपनयनप्राप्तिः केनवार्येत यत्तुतंत्ररत्नेतस्याद्यावदुक्तमासीद्ब्रह्मचर्यमित्यत्राष्टवर्षवाक्येद्वितीयायासंस्कार्यत्वालिं
गविवक्षान्यायेनस्त्रियाउपनयनप्रामाण्यपिनिषेधादेवोपयनाभावइत्युक्तं तदध्ययनग्रहणातइतियदुपादेयत्वाच्चिंत्य अतए
वयदस्यनोपनयनं शूद्रसधर्मत्वात् अतएवमिताक्षरायांदेवलः षंडकोलिंगहीनः स्यात्संस्कार्हश्चनैवसः याज्ञवल्क्योपि
षंडंतुब्राह्मणंहत्वाशूद्रहत्याव्रतंचरेदित्याह स्मृत्यर्थसारादयस्तु वचनादुपनयनमाहुः एतच्चाग्रेवक्ष्यामः अतएवोपाद
यगतत्वादएवबर्धत्वमेकत्वंचविवक्षितं नन्वेवन्यायतएवशूद्रस्यकर्मानधिकारसिद्धेस्तस्माच्छूद्रोपसेनव-- इतिनिषेधः

गम
२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

किमर्थमिति चेन् न्यायप्रामाण्यानुवाद इति भावः वेदांतिनस्तु तत्प्रत्यपह्नेस्वाध्यायस्याभाव्यत्वावगतेः प्रथमोपस्थितत्वात्तु कुंफ
द्वारा तस्यावश्यकत्वादेकरूप्याच्चाक्षरग्रहणमेव भाव्यं न क्रतुभिरर्थैस्तानाक्षेपात्त्रैवर्णिकादीनां शूद्रस्याप्यधिकाराय तथा भेद्रम
तध्ययनविधिसिद्धवद्यग्रहणेन क्रतुना शूद्रविधानासंयक्तत्वं तथार्थलाभमप्यध्ययनविधिसिद्धाक्षरग्रहणोपायेन चरितार्थत्वान्न
शूद्रस्य पुत्रकाद्युपायमीक्षिपतीति तुल्यं प्राप्यतां वाक्षेपाच्छूद्रस्याधिकारः स वृषपशुवारिति क्रत्यानिषिध्यते अस्मान्निषेधाव्यर्थः
स्यान्नदित्याहुः सर्वथा शूद्रस्य कर्मण्यनधिकारः सिद्धः ग्रहविवादस्तु नुपनयीतेति नि रु धातोः समानोत्संजनाचार्यकरणज्ञान.
न्दति विगणनव्ययेषु नि नेति पाणिनिस्मृतेरुपनयनस्यांगत्वेनाफलत्वेऽप्युपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं
सहस्यं च तमाचार्यं प्रचक्षते इति स्मृतेरध्यापनफलमेवांग उपचर्यते वर्मवाप्नत घज्ञायक्रियत्वयाजारज्यंतेरतिवत् तेनाध्या
पनविधिप्रयुक्तत्वेऽप्यध्ययनस्य माणवकनिष्ठत्वेनांतरंगत्वादर्थज्ञानार्थत्वमपि क्रतूनां च तत्सिद्धविद्योपजीवित्वादुपनयनाक्षे
पाच्छूद्रस्यानधिकार इति प्राभाकराः तदयुक्तं आचार्यकरणत्वस्य कर्त्रभिप्रायत्वेन नि क्रे धातोर्निर्नित्यात्स्वरितत्वनितः कत्रभिप्रायेक्रि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शृ·क·
३

याफलेइत्येतेनात्मनेपदसिद्धेः संमाननेत्यादिविधानं व्यर्थं स्यात् तेनाकर्त्रभिप्राये प्यात्मनेपदं वक्तुमेतत्सूत्रं ततश्च क्रि
याफलत्वेप्यकर्त्रभिप्रायत्वान्नाचार्यकरणत्वं भाव्यमिति दिक् निरुक्तस्य विवरणं तत्त्रैरत्वेचज्ञेयः तत्र शूद्रस्य वेदश्रवण
तादन्नाधिकारः कपिलाक्षीरपानेन ब्राह्मणीगमनेन च वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेदिति पराशरोक्तेः उत्तरमी
मांसायां व्यासमते पि श्रवणाध्ययनप्रतिषेधात्स्मृतेश्चेत्यत्र शूद्रस्य वेदश्रवणादिनिषिद्धं इदं शंकराचार्यैर्व्याख्यातं
श्रवणप्रतिषेधो भवति अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरणमिति पद्युवा एतच्छ्मशानं यच्छूद्र इति भवति
चोदाहरणे जिह्वाच्छेदो धारणे शरीरभेद इति तथा वेदार्थज्ञानमपि न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविःकृतं न चास्योपदिशे
द्धर्मं न चास्य व्रतमादिशेदिति पाराशरोक्तेः मतिर्वेदार्थोपदेशः न शूद्राय परिज्ञानं दद्याद्वेदमुखे नात्तिति पराशर पुराणात् वेद राम
ज्ञाननिषेधान्मीमांसाद्यध्ययनमपि निषिद्धं तथा वेदमूलत्वात् स्मृतिपुराणाद्यध्ययनं निषिद्धं पुराणं पंचमो वेदः पुरा ३
णं वेदसंमतमिति स्मृतेः तस्मादिदं वेदविद्भिरध्येतव्यं प्रयत्नतः शिष्येभ्यश्च प्रवक्तव्यं सद्भ्योनेथैव धर्मतः इति स्मृतिमुधा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मंत्रस्मृतेः मनुरपि॥ निषेकादिःश्मशानांतो मंत्रैर्यस्योदितो विधिः॥ तस्य शास्त्रेधिकारोस्मिन ज्ञेयो नान्यस्य कस्यचित् एवं स्म
स्मारिश्रवणमपि निषिद्धं नाध्येतव्यमिदं शास्त्रं वृषलस्य तु संनिधौ योधीते चैव मोहात्मा स याति नरकान्बहून् इति कौर्मोक्तेः वा
युसंहितायामपि नावेदविद्भ्यः कथनीयमेतत्पुराणरत्नं पुरशासनस्य नाभक्तशिष्याय न नास्तिकेभ्यो दत्तं हि यत्तन्निरयं ददाति भ
विष्यपुराणे यान्येतानि त्वयोक्तानि धर्मशास्त्राणि सुव्रत नेच्छामि श्रोतुं विप्रेंद्र गुर्वर्थान्येतानि हि द्विज त्रयाणामेव वर्णानां प्रोक्तानि
तानि पंडितैः अयमेन तु शूद्राणां मंत्रमेव वचनं शृणु ब्राह्मणादिषु वर्णेषु त्रिषु वेदाः प्रतिष्ठिताः मन्वादीनि च शास्त्राणि तथांगानि
च सर्वशः अत्र श्रवणस्य वाचनस्य च शूद्र प्राधान्येन साक्षान्निषेधः न तु विप्रद्वारा तदुक्तं महाभारते श्रावयेच्चतुरो वर्णान्कृत्वा ब्रा
ह्मणमग्रतः इति नारदीयेपि ये च धर्मपरा राजन् देवद्विजपरायणाः तेषां मध्ये हरेरग्रे पठनीयं द्विजातिभिरिति भागवतेपि
स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह इति भारतमाख्यानं कृपया मुनिना कृतमिति हि
नाप शूद्रायाज्ञातो द्विजबंधुः ब्रात्यो वा भविष्ये चतुर्णामपि वर्णानां यानि प्रोक्तानि श्रेयसे धर्मशास्त्राणि राजेंद्र शृणु तानि नृपोत्त

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

म विशेषतस्तु शूद्राणां पावनानि मनीषिभिः अष्टादशपुराणानि चरितं राघवस्य च वायवीये एतानिन्नृपशार्दूल धर्मशास्त्रा
णि पंडितैः साधारणानि प्रोक्तानि वर्णानां श्रेयसे सदा चतुर्णामिह राजेंद्र श्रोतुमर्हन्ति स्कब्रत स्कंदे सूतसंहितायां अन्ये च ब्राह्मण
दिलोकानां श्रुतं तथैव च वैश्यानां तारतम्येन तानाभ्यासेधिकारिणः द्विजस्त्रीणामपि श्रोतज्ञानाभ्यासेधिकारिता अस्ति शूद्रस्य मु
ख्या पुराणेनैव वेदनं वदंति केचिद्विद्वांसः स्त्रीणां शूद्रसमानता तथा सिद्धान्तश्रवणं प्राहुर्द्विजानां मुनिसत्तमाः शूद्राणां च वि
रक्तानां तथा स्त्रीणां महात्मनां सिद्धान्तश्रवणं प्रोक्तं पुराणश्रवणं बुधैः सिद्धान्तस्य त्वर्थः रामायणेपि पठन्द्विजो वागृषभत्वमी
यात् स्यात्क्षत्रियो भूमिपतित्वमीयात् वणिग्जनः पुण्यफलत्वमीयाच्छृण्वंश्च शूद्रोपि महत्त्वमीयात् इदमपि विप्राद्धारेव तदु
क्तं भविष्येपि देवार्चा पुरतः कृत्वा ब्राह्मणांश्चन्द्रपोत्तम श्रोतव्यमेवं शूद्रेण तथान्यैश्च द्विजातिभिः पुराणश्रवणविधानादेव वेद
मंत्रगतवैदिकमंत्रश्रवणेपि न दोषः तदुक्तं वार्तिकेपि तानेव वैदिकान्मंत्रान्भारतादिभिवेशितान् विहाय मंत्रनियमं लो
कबुध्या प्रयुंजते इति यद्यपि अदृष्टहेतुत्वं न वैदिकत्वं विनास्ति तेन लोकाचारादेरपि वेदत्वं कल्पते तथापि वचनाद्दोषाभावः अ

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नित्यस्यापि प्रवाहानादितया कल्पसूत्रादिवन्नित्यविधिविषयत्वं योपि शांखेन विद्यास्थानान्युक्त्वा एतानि ब्राह्मणोधिकुरुते मच्च
त्रितंदत्तोपनीतेनरेषामिति वृद्धवचनेन शूद्रस्याधिकार उक्तः सोपि श्रवणपर एव अत्र शूद्राणां विहितानिषिद्धाश्च धर्माः शूद्रसमाना
मनुपनीतद्विजस्त्रीकुंडगोलकसंकरजातीनामपि तेषां तेनाग्रे वक्ष्यंते तत्सिद्धं शूद्रस्यापि विप्रद्वारा पुराणश्रवणेन ज्ञानमिति अथ शू
द्रस्य मंत्रविचारः तत्राविद्यत्वाद्वेदमंत्रे नाधिकारः यामोपि शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्का
रादिभिर्विनेति नृसिंहतापनीये सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रायनेच्छंति पराशरभाष्येप्येवं रामतापनीये सावित्रीं ल
क्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्रीशूद्रः स मृतोधो गच्छति लक्ष्मीश्रीबीजं व्याहरणेजिह्वाछेद इति श्रुतेश्च गौडनिबंधेति
थिनत्वेस्कांदे स्वाहाप्रणवसंयुक्तं शूद्रे मंत्रं ददद्विजः शूद्रो निरयमाप्नोति ब्राह्मणः शूद्रतामियात् एवं पौराणविष्णुसहस्रनाम राम
चंडीस्तोत्रादिपाठेप्यनधिकारः श्रवणमात्रेधिकारेण पाठप्रसक्तेः तदुक्तं हरिवंशे स्कंदे गीतामियाच्छ्रवणाच्च शूद्रजातिरिति अ
त एव भारतविष्णुसहस्रनामस्कंदे दांतको ब्राह्मणः अस्यात्क्षत्रियो विजयी भवेत् वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू० क०
५

मुखादित्यत्र शूद्रः श्रवणेनैवेति शंकराचार्यैर्व्याख्यातं किं बहुना शूद्रकर्तृकस्यान्नदानश्राद्धादौ विप्रस्यैव पौराणमंत्रपाठः शूद्रस्य तु श्र
वणमात्रं श्रावयेच्चतुरो वर्णानित्यस्य निषादस्थपतिं याजयेदिति वच्छृणुयुरित्यर्थेन शूद्रस्य प्रतिश्रवणजन्यफलभानस्यैव कर्मभिः ग्रहणात्
पुराणपाठाभावे तन्मंत्रेषु पाठाप्रसंगाच्च वाराहेपि अयमेव विधिः प्रोक्तः शूद्राणां मंत्रवर्जितः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते अ
यश्राद्धकरणपाठपीयं परिभाषा नच सा वाक्यरूपा प्रकरणेन नीयं तु शक्या अतः शूद्रकर्तृकदानश्राद्धादौ अर्थप्रकाशनार्थं सर्वत्र विप्रेण
मंत्रपाठः कार्य इति शूलपाणिः वैदिकोपि विप्रेण पठनीय इत्याचारचूडामणिः माधवीयेप्येवं श्राद्धे यस्यां शाखायां विप्रस्य मंत्रपाठ्य
कः स शूद्रश्राद्धेपि स्यादेवेति स्मृतिकौमुद्यां मदनपारः अमंत्रस्येति विशेषेणात् स्त्रीणां तत्तुल्यानां चेति शूलपाणिः यत्तु तेनोक्तं मंत्रज
न्यमियमादृष्टसिद्धिस्तु नमस्कारेणैव अनुज्ञातोस्य नमस्कारो मंत्र इति गौतमोक्तेरिति तच्चिंत्यं दृष्टद्वारे वहितत्याग्निर्नेत्वा तंत्रेण नच
मंत्रनिषेधे नियमादृष्टप्राप्तिः नमस्कारेणैव तन्निषेधश्च नहि सनमंत्रः अन्यथा नत्वा वपूतेप्यवघातजन्यादृष्टार्थसोपि स्यात् यत्तेतिय राम
त्किंचिदेतत् कल्पतरुस्तु पौराणकर्मणां शूद्रान्प्रति विशिष्य विधानात् तेषां च मंत्रविशिष्टानामुत्पत्यात् तथैव विनियोगात्पौराणामंत्रपाठ ५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भवेत्यवेत्याहुः तन्त्रानमस्कारेण बाधा द्वाराहविरोधाच्च वैदिकमंत्रस्थाने नमः शब्द इत्यन्योनत्वमंत्रकेष्वेवमः तेन पितॄणां नामगोत्रत
इत्यादौ पत्र द्विजानां मंपिनाममंत्र उक्तस्तत्र शूद्रस्य सर्वमंत्रनिषेधे प्राप्ते प्रतिप्रसवमात्रार्थं गौतमीयं न तु तिलावपनादावपि अन्यत्
आवाहनादिकर्तव्यं यथा शूद्रेण तच्छृणु देवानां देवनाम्ना तु पितॄणां नामगोत्रत इति हेमाद्रौ भविष्योक्तेः सर्वत्र देवेदेवेभ्यो नमः पि
त्रे पितृभ्यो नम इति नाममंत्रमाहुः केवलस्य नाम्नः प्रयोगानर्हत्वात् तेन नम इत्येतावानेव मंत्र इति आचार्यचूडामणिमदनपारिजा
तोक्तिः परास्ता अस्मिन् पितृचरणास्तु नमस्कारेण मंत्रेण पंचयज्ञान्नहापयादिति याज्ञवल्क्योक्तो यज्ञशब्देन शूद्रकर्ममात्रोद्देशे
न नमस्कारविधानं यज्ञानामुद्देश्यानां पंचत्वेन विशेषणाद्गृहे कर्तव्यविवक्षावह्निकर्मभेदापत्तेः तेन शूद्रकर्तृकतुलादानादि पूर्तेषु शू
द्रस्य नमस्कारो मंत्रः इत्याहुः पौराणास्तु विप्रस्येत्यर्थविरोधः एतेन नमस्कारस्य पंचयज्ञेष्वेव विधाच्छूद्रस्य न विवाहहोमादीति मद
नपारिजातोक्तिः परास्ता अत एव यो नमसाध्वरस्य इति श्रुतेर्नमस्कारेणावरवरवल्पिन वैदेवा नमस्कार इति यज्ञो वै नम इति हि ब्रा
ह्मणं भवतीत्याश्वलायनोक्तेश्च नमस्कारस्यापि सर्वकर्मांगत्वं तच्च यथा द्विजानां तत्र वैदिकमंत्रोक्त्या बाधितं सच्चेत्य यज्ञादौ प्रवर्तते

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰ ६

तथा शूद्रेपि कर्माकौ मंत्रा स्मृतो च प्रवर्त्तत एव अत एव शूद्रस्य कातीयसूत्रोक्ता अष्टौ संस्कारा विवाहश्चोक्तो हरिहरेण अत एवानुमतो
स्य नमस्कारो मंत्र इति गौतमीयः शूद्रे प्रतिप्रसवः तस्य चानुष्टमाप्रकाशकत्वेपि वचनार्थमेकास्यादिति न्यायेनागतं एतेन देवताभ्यः
पितृभ्यश्चैतत् एवान्नमस्कारमंत्रेण गृहीतं तदित्यवैदिको मंत्रो विप्रस्य पौराणस्तु शूद्रः पठनीयो न वेदे ह्यधिकारोहि कश्चिच्छूद्रस्य विहित
पुराणेष्वधिकारो मे दर्शितो ब्राह्मणैरिह इति शूलपाणिपाणोक्तेः श्रीदत्तोप्येवमाह तिन्नत्वं स्यर्त्तस्के वैदिकेतर मंत्र पाठे शूद्रस्याप्यधिका
रो वेदमंत्रवर्जं शूद्रस्य तथा चाररचिंतामणौ छंदोगाह्निके च वचनाद्देदेति विशेषणात् श्रोतव्यतेन शूद्रेण नाध्येतव्यं कदाचनेति निषेधात्
तेन र पुराणपरः पंचयज्ञस्नानं स्यादिषु तु पौराणोपि न नमस्कारेण मंत्रेणेति पंचयज्ञेषु ब्रह्मसत्रविशालेव मंत्रवत्सापित्यतं तूष्णी
मेवहि शूद्रस्य सनमस्कारकं मतमिति याज्ञवल्क्येन स्नाने अयमेव विधिः प्रोक्तः शूद्राणां मंत्रवर्जित इति श्राद्धे च वाराहविशिष्टो
रित्याह अनुमतोस्य नमस्कारो मंत्र इति गौतमोप्येतत्परो हृदि कमंत्रपरश्चेत्याह तन्नानाध्येतव्यमिदं शास्त्रं वृषलस्य तु संनिधाविति
कौर्मे पुराणनिषेधनवेदस्य दूरापास्तत्वात् अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन श्रो

राम ६

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

तस्मात्तच्चैवै धर्मे प्रोक्तमस्मिन्नपोनम तस्माच्छूद्रैर्विनाविप्रं न श्रोतव्यं कदाचनेति शूलपाणौ पुराणाधिकारे भविष्योक्तेश्च अतएववि
प्रो मंत्रेण गृह्यतेरिति सर्वार्थेन श्राद्धमात्रपर मीत्रते शूलपाणिः एतेननाध्येतव्यमितिनिषेधो मंत्रेन पुराणपर इति श्रीदत्तादिमतपा
लं विनाविप्रमित्युक्ते विप्रद्वारेव श्रवणमुक्तं धर्मशब्दस्तानि धर्माणीति वत्क्लीवं विशेषस्तु निर्णयसिंधौ ज्ञेयः किंच यथाद्विजाना
मध्ययनविधौ अधीतैर्मंत्रैरर्थस्मृतिं कुर्यादित्यर्थेन कर्मसु मंत्रापाठस्यैवांगत्वं न तु स्मृतेः मंत्राणामक्रियात्वेन स्वतः कर्माग्रहणा
तथा शूद्राणां श्रावयेदिति श्रवणविधोक्तेति विधिभिः प्रवर्तितैः कुर्यात् कृतैर्मंत्रैरर्थस्मृतिं कुर्यादित्यर्थेन शूद्रस्य तुलादिमहादानादिक
र्मसु मंत्रश्रवणस्यैवांगत्वं न पाठस्य नन्वेवं श्रवणविधौ श्रावयेच्चतुरो वर्णानिति सक्तं द्विजानां द्विजमपि तुलादौ मंत्रश्रवणमेवस्या
न्न पाठ इति चेन्न अत्र ब्रूमः अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च निषेकादिश्मशानांतं इत्यादि वचनादध्ययनस्यैव कर्मांग
त्वं पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिताः वेदास्थानानि विद्यानां धर्मस्य च चतुर्दशेति याज्ञवल्क्योक्तेर्ज्ञानार्थत्वाच्छ्रवणं तु फ
लविशेषार्थं य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् नाशुभं प्राप्नुयात्किंचित्सामुत्रेह च मानवः इत्यादौ चैडि पाठादौ च फल

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ के॰ ७

श्रुतेः याज्ञवल्क्योपि यइदं श्रावयेद्विद्वान् द्विजान् पर्वसु पर्वसु अश्वमेधफलं तस्य तद्भवाननुमन्यतामिति तेन द्विजानां यथा
वेदाध्ययनं ज्ञानद्वारा कर्मार्थत्वात् पारायणाद्यर्थम् अक्षरग्रहणार्थत्वाच्च दृष्टार्थं न हि सिद्धान्ते अक्षरग्रहणस्य भाव्यत्वं त्यज्यते पारायणा
र्थत्वेन दृष्टार्थत्वात् तन्मात्रार्थत्वेन प्यंते(?) एतं न्यायरत्नमालायां स्पष्टं तथा पुराणाद्यध्ययनश्रवणयोर्विधानेप्यध्ययनज्ञा
नद्वारा कर्मार्थत्वाद्दृष्टार्थं फलार्थत्वाददृष्टार्थं च अध्ययनं तु नास्त्येव श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचनेति वचनात् यद्यपि
वार्त्तिके राणके च धर्मार्थे च कामे च मोक्षे च भरतर्षभेति धर्मादेश्च कारे रधर्मादेश्च ज्ञानमुपादानपरित्यागांगभूतं फलं ते
न दृष्टार्थमेव श्रवणमित्युक्तं तदपि शूद्रमात्रपरमिति ज्ञेयं द्विजानां तु पाठ एव ज्ञानार्थः यद्वा स्त्रीद्विजानां श्रवणमदृष्टार्थं पाठ
श्रवणयोरन्यतरस्यापि ज्ञानार्थत्वे नियामकाभावात् मंत्रपाठस्त्वन्नविप्रावचनादेवेति ज्ञेयं अन्यथा श्रावयेदित्यस्य शूद्रमा
त्रपरत्वं स्युगम्यत(?) तदनादरणादिश्युत्तरमीमांसान्यायेन मोक्षे तस्यानधिकारात् मोक्षग्रहणविरुध्येत नन्वेवं पक्षे च श्रव
णविधौ शूद्रे ज्ञानार्थत्वेन दृष्टार्थत्वान्नियमविधिर्द्विजे च फलार्थत्वादपूर्वविधिरिति वैरूप्यं स्यात् मैवं अध्ययनविधिवत्

राम ७

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पशुश्च तदर्थत्वप्रबंधेन सर्वसंग्रहात् सर्वत्रापूर्वविधित्वं फलतो नियमादिव्यपदेशादिति वार्त्तिकोक्तरीत्या परिहाराच्चासर्व
स्याप्यपनविधित्वाय यस्तत्रापन्नेऽत्र वर्णविधौ संचारणीयः एतच्च एवं भारतादिवाक्यान्यपि योज्यानीत्यादिना वार्त्तिकेपि सू
चितं तदिदमदुक्तं सुधाभिर्दूरं विभावनीयं तस्माच्छूद्रस्य पूर्त्तादिकर्मसु पौराणमंत्राणामेव विप्रस्य पाठो न वैदिकानामिति सिद्धं
अथ शूद्रस्य कर्मोधिकारः तत्र काम्यकर्मतया यथाध्ययनविधिसिद्धविद्यैर्द्विजपरा इति न शूद्रस्य विद्याक्षेपेण श्रौतकर्माधिकारः
तथा स्मार्त्तपौराणाः ग्रहयज्ञमहादानपूर्त्तश्राद्धादिविधयः फलकामित्वाच्छूद्रवर्णविधिसिद्धविद्यात्वाच्च चतुर्वर्णपरा इति शूद्रस्या
प्यधिकारः न स्वच्छादीनं विद्याक्षेपाभावात् नन्वेवं तंत्रोक्तमाहारुद्रलक्षहोमादिष्वप्यधिकारः शूद्रस्य सर्वांगोपसंहाराभावे
नोधादीनामिवानधिकारात् सर्वांगोपसंहारेण हि प्रधानविधिप्रवृत्तिरिति निषद्धवर्णितं कथं तर्हि वैदिकगृह्योक्तहोमांगकुर्वा
कादिकापृश्ने च तुलाद्वावधिकारः उच्यते न्यायतो निषिधोप्यधिकारः कर्मविशेषेषु नतवचनैः प्रतिपद्यते निषादस्थप
तेरिव रोद्रेष्टौ न च शूद्रस्य गृह्योक्ताराद्धानां संभवः वेदानधीत्य वेदौ वानिवेदं वापि यथाक्रममिति स्मृतेरैकं वेदाध्ययनय

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.क. क्षेवेदांतगीयस्यश्रवणादिनातद्वीसंभवाद्दार्ष्टिजत्वानियमानपेक्षणात् नियमस्तुप्रधानमात्रे. उक्तंचैतत्तद्विस्तरं दीनक
मलाकरेस्माभिः अत्रापिचवक्ष्यते यत्रतुनवैदिकमंत्रोगतत्रवचनाभावेप्यधिकारः श्रवणविधिसिद्धसानत्वात्कामित्वाच्च.
यथाविनायकशांत्यादौ यत्रयामंत्रांतरं यथागृह्यपत्नेस्मृतिसंग्रहे नाममंत्रेणशूद्रस्यकुर्याद्धोमादिकंबुधइति तत्रमंत्रां
तरेणापिसर्वांगोपसंहारात् सोयंकुत्रनास्तीतिविविच्यते तत्रादौविहितानि अगस्त्यसंहितायां शुचिव्रततमाःशूद्रोधा
र्मिकाद्विजसेवकाः स्त्रियःपतिव्रताश्चान्येप्रतिलोमानुलोमजाः लोकाश्चांडालपर्यंतंसर्वेप्यत्राधिकारिणः अत्रराममंत्रे
कृतिब्रह्मणाहषडूर्णस्मृतिवर्णद्वयात्मकं षडूर्णब्राह्मणादीनांत्रयाणांयाद्दिवर्णकं तदन्येषांदेशिकेनवक्तव्यंतारकंपरं त
त्रैवामंत्रायमुपदेष्टव्योब्राह्मणादीनांअरूपतः ब्रह्मोत्तरखंडे शिवपंचाक्षरंप्रक्रम्य महापातकदावाग्निः सोयंमंत्रः ष
डक्षरः प्रणवेनविनामंत्राः सोयंपंचाक्षरोमतः स्त्रीभिःशूद्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः नास्यदीक्षानहोमश्चनसंस्का राम
रानतर्पणं नकालनियमश्चात्रजप्यःसर्वैश्पमनुः एतदीक्षांतत्रैवपरकृतिरूपेणोक्ता पुण्यतीर्थजलेस्नानंराजानंसमुपोषितं ८

प्राङ्मुखंचोपविश्याग्रेनत्वाशिवपदांबुजं तन्मस्तकेकरंन्यस्यददौमंत्रंशिवात्मकं स्मृतिकौमुद्यांवाराहे ब्राह्मणक्षत्रियविशां
पंचरात्रंविधीयते शूद्रादीनांचतच्छास्त्रेपदवीमुपयास्यति अन्येस्तुनतच्छास्त्रेतिपाठोलिखितः अतएवाग्रेउक्तं अथशूद्रस्यवक्ष्यामिग
दतःशृणुमाधवि दंपतीममभक्तौचममकर्मपरायणौ नमस्कारप्रयोनित्यंममचिंताव्यवस्थितः शूद्रकर्माणिवेदोवियोनित्यंतुसमा
चरेत त्यक्त्वाकोटिसहस्राणिशूद्रमेवतुयाम्यहं तथातत्रैवचातुर्वर्ण्यस्यवक्ष्यामिदीक्षाममपशास्त्रिनीस्वक्तस्यम्य द्विजानांदीक्षा
मुक्त्वा शूद्रस्यापिप्रवक्ष्यामिमद्भक्तस्यवरांगने इत्यादिनाशूद्रदीक्षोक्ता वामनपुराणे ततश्चकारनभवांश्चातुर्वर्ण्यंहरार्चने इत्युक्त्वावासि
ष्ठपुत्रस्यशाकेस्थाप्यादीनांचशिवदीक्षामुक्त्वा उर्णादरस्यशूद्रस्यदीक्षोक्ता एवंसभगवान्ब्रह्मापूजनायशिवस्यतु कृत्वातुचातुराश्र
म्यस्वमेवभवनंगतइति भविष्येपि ब्राह्मणंक्षत्रियंवैश्यंकुलिनंशूद्रमेवच पुरुषंवास्त्रियंवापिदीक्षयेत्स्वर्यमंडले एवंयत्राविशे
षवचनं तत्रशूद्रस्याधिकारः स्मृतिकौमुद्यांतु शूद्रादीनांचतच्छास्त्रपदवीमुपयास्यतीतिपाठं वाराहे उक्त्वा पंचरात्रोक्तवैष्णवशै
वसौरशाक्तवैनायकेषुमंत्रेष्वधिकारउक्तः इतिमंत्रदीक्षा अथशूद्रस्यदेवस्थापनं कल्पतरौदेवीपुराणे वर्णाश्रमविभेदेनदेवाःस्था

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. क.
९

प्यास्तु नान्यथा ब्रह्मा तु ब्राह्मणैः स्थाप्ये गायत्री सहितः प्रभुः चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यस्तु सर्वार्थिभिः भैरवोपि चतुर्वर्णैरं
त्यजानां तथा मतः मातरः सर्वलोकेस्तु स्थाप्याः पूज्याः स्तरोत्तम लिंगं गृही पतिर्वापि संस्थाप्य तु यजेत्सदा त्रिस्थली सेतोपि
ता महच्चरणास्तु देवप्रतिष्ठायां शूद्रादीनां नाधिकारः स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर स्थापने नाधिकारोस्ति विष्णोर्वा
शंकरस्य च यः शूद्रसंस्कृतं लिंगं विष्णुं वापि नमेन्नरः इहैव वात्य तदुःखानी पश्यत्यामुष्मिके किमु शूद्रो वानुपनीतो वा स्त्रियो
वा पतितोपि वा केशवं वापि स्पृष्ट्वा नरकमश्नुते इति वृहन्नारदीयस्कांदाद्युक्तेरित्याहुः चतुर्वर्णैरिति पूर्ववचनाद्धि ध्यादिप्र
तिष्ठायां शूद्रस्य विकल्प इति तु युक्तं अत एव स्पर्शने नाधिकारोस्तीत्यत्र पाठः अथ शूद्रस्य देवपूजा शिवसर्वस्वे भविष्ये
यस्तु पूजयते लिंगे देवादीनां जगत्पतिं ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः तस्य प्रीतः प्रदास्यामि शुभान्लोकाननु
त्तमान गौडतिथिनत्वे स्कांदे शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये तस्याहमर्चां गृह्णामि चंद्रखंडविभूषिते लौंगे अ
परुद्रो महादेवो मंडलस्थ उवाच ह पूज्योहं ब्राह्मणानां च क्षत्रियाणां विशेषतः वैश्यानां चैव शूद्राणां शुश्रूषः पुज्य कस्य च

राम
९

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

स्त्रीणां चैवाधिकारोस्ति पूज्यादिषु न संशयः नृसिंहपुराणे ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रांत्यजातयः संपूज्य तं नरश्रेष्ठ नरसि
हवपुर्धरं मुच्यंते ह्यशुभैर्दुःखैर्जन्मकोटिसमुद्भवैरिति सूतसंहितायां येचाक्षरेण पूजायुक्ताहा ब्रह्मचारी गृहस्थो वा वानप्रस्थश्च
क्षत्रतः एवं दिने दिने देवं पूजयेदंबिकापतिं नमोंतेन शिवेनैव स्त्रीणां पूजा विधीयते विरक्तानां च शूद्राणां एवं पूजा प्रकीर्तिता पं
चाक्षरस्य कृतेन नम आदित्ये पि स्त्रिशूद्रयोर्नमोंतत्वे अन्येत्वंते भिन्न नमः शब्दमाहुः अन्येषामपि सर्वेषां नराणां मुनिपुंगव:
पूजा देवालये दृष्ट्वा प्रणामस्तस्य कीर्तितः एवं पूजा कृता येन सफलं तस्य जीवितं यत्तु मनुः जपस्तस्त्री पर्यसेवा प्रव्रज्या मंत्रसाधनं
देवताराधनं चैव स्त्रीशूद्रपतनानि षडिति तद्विहितभिन्नपरस्पर्शयुक्तपूजापरं एतच्च पुराणप्रसिद्धजीर्णलिंगपूजाविषयं
पाद्मे तु त्रिस्थलीसेतौ नारदीये यः शूद्रेणार्चितं लिंगं विष्णुं वा प्रणमेन्नरः न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरपि नमेद्यः शूद्रसंस्थ
लिंगं वा हरिमेव वा स सर्वयातनाभोगी यावदाचंद्रतारकं पाखंडपूजितं लिंगं नत्वा पाखंडतां व्रजेत् आभीरपूजितं लिंगं नत्वा
नरकमश्नुते याधाड्डिः पूजितं लिंगं विष्णुं वापि नमेत्तु यः स कोटिकुलसंयुक्तः आकल्पं रौरवं वसेदित्यादीनि तानि नूतनस्थापितलिं

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.कृ.
३०

गवियर्याणि । यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधिः तदा प्रभृति शूद्रश्च योषिद्वापि न संस्पृशेदिति तत्रैवोक्तं अन्ये तु जगदुः लिं
गं नमस्कर्तुं दोषोस्ति शूद्रस्य पूजायां फलमस्त्येव नूतनलिंगार्चा शालग्रामादौ तु स्पर्शरहिता पूजा शूद्राद्यैः कार्या शूद्रो वानुपनी
तो वा स्त्रियो वा पतितोपि वा केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ब्राह्मण्यपि हरिं विष्णुं न स्पृशेच्छ्रेय इच्छती सनोसनाथामतना
थावा तस्या नास्ति हि निष्कृतिः स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर स्पर्शने नाधिकारोस्ति विष्णौ वा शंकरस्य वेति स्कांदोक्तेः
चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः वैश्यैर्द्वावेव संपूज्यो तथैकः शूद्रजातिभिरिति स्कांदोक्तेः वाराहे तु शालग्रामे स्प
र्शनिषेधो न प्रतिमायामित्युक्तं शालग्रामं न स्पृशेत्तु हीनवर्णो वसुंधरे स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः मोहा
त्संस्पृशते शूद्रो योषिद्वापि कदाचन स पतेन्नरके घोरे यावदाभूतसंप्लवं यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुंधरे दूरा
देवास्य शानपूजां कारयेत्सुसमाहितः सर्ववर्णैस्तु संपूज्या प्रतिमाः सर्वदेवताः लिंगान्यपि तु पूजानी मणिभिः कल्पितास्तोके राम
ति विष्णुपुराणेपि ब्राह्मणाः क्षत्रिया वैश्याः शूद्रश्च पृथिवीपते स्वधर्मतत्परा विष्णुमाराधयंति नान्यथा यत्तु प्रयोगपारिजा ३०

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

वे विष्णुधर्मोत्तरे शालग्रामशिला वापि चक्रांकितशिला तथा । ब्राह्मणाः पूजयेन्नित्यं क्षत्रियाद्यैर्न पूजयेदिति तत्स्वर्णसहितं
पूजापरं आदौ क्षित्तपरमित्यनेन विशेषस्तु मत्कृते पूर्तकमलाकरे निर्णयसिंधौ च ज्ञेयः एवं पार्थिवलिंगपूजने प्यधिकारः मद्रत्न
मात्रा कृति स्वतां स्वकांस्यमयं तु वा कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवीति तिथितत्त्वे भविष्योक्तेः वैदिकमंत्राभावाच्च तदुक्तं त
त्रैव स्कांदे महाहरणासंघट्टप्रतिष्ठाह्वानमेव च स्थापनं चैव वा विसर्जनमतः परं हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् प
शुपतिः शिवश्चैव महादेव इति क्रमः भविष्ये शर्वाय क्षितिमूर्तये नमः भवाय जलमूर्तये नमः रुद्राय अग्निमूर्तये नमः उग्राय
वायुमूर्तये० भीमाय आकाशमू० पशुपतये यजमानमूर्तये० महादेवाय सोममूर्त० ईशानाय सोमम्० मूर्त्तयो ह्यष्ट भवस्यैताः
पूज्याः पूर्वादितः क्रमात् आग्नेय्यंताः पूर्वं ज्यास्त्वेव पार्थिवलिंगे शिवं यजेत अत्र न प्राचीनमंत्रतः शंभोरिति रुद्रयामलेति पृथानांवय
स्त्रीप्राची किंतु प्रसिद्धैवा एवं नवरात्रे देवीपूजादौ एवं चावंध्यवासिन्यां नवरात्रोपवासनं दृत्कपक्रम्याः वैश्यशूद्रैर्भक्तियुक्तैः
म्लेच्छैरन्यैश्च मानवैरिति हेमाद्रौ भविष्योक्तेः एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिः विना मंत्रैस्तामसी स्यात् किरातानुसं

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. कृ. ११ मर्वेतिरूपनारायणीये भविष्योक्तेश्च तथा व्रतोपवासादापि शूद्रस्याधिकारः प्राचांस्तु वैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः वै
श्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते त्रिरात्रं पंचरात्रं वा तेषां व्युष्टिर्न विद्यते इति हेमाद्रौ भविष्योक्तेः नवरात्रोतु भवत्येव नवरात्रोप
वासं तदुत्क्वा ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः स्त्रिभिश्च कुरुशार्दूल तद्विधानमिदं शृणु इति भविष्ये शूद्रस्याप्युक्तेः
एवं प्रायश्चित्तं शूद्रे पंजहोमरहितं देयं तस्माच्छूद्रसमासाद्यसदाधर्मपथस्थितं प्रायश्चित्तं प्रदातव्यं जपहोमाविवर्जितमिति मिता
क्षरायां मंगिरसोक्तेः अत्र जपहोमवर्जं प्रायश्चित्ते दानतीर्थयात्रादीन शूद्रसंबंधविधेरुपसंहारः हविर्हुतभयत्ववह्निहोदेशो वाक्य
भेदाद्द्विजानां तदभावापत्तेश्च किं तु शूद्रसंबंधिप्रायश्चित्तोद्देशेन जपहोमवर्जत्वविधिर्लाघवात् अत्र केचित् प्रधानमूर्तयर्जप
होमयोर्निषेधोनत्वंगभूतयोः अत एव महार्णवे लौकिकाग्नौ स्त्रीशूद्रस्य प्रायश्चित्तांगव्याहृतिहोमो विप्रद्वारा कार्य इत्याहुः
तन्न आरंभे सर्वकर्मणां समालोच्य विशेषतः आज्येनैव शालाग्नौ जुहुयाद्व्याहृतीः पृथक् श्राद्धं कुर्यात्ततस्तु गोहिर राम
ण्यादि दक्षिणा स्त्रीणां होमो न कर्तव्यः पंचगव्यं तथैव चेति जाबालिना गृह्याग्निनियमात् न चाग्नेः प्रतिनिधिरस्तीत्यक्तेन ११

वमे नचालौकिकाग्नर्वचनमस्तितेनाविशेषादुभयोर्निषेधः अतोमहादानेष्वप्यधिकारः तथाचहिरण्य गर्भदानेशूद्रस्यैका
दशसंस्काराः स्त्रीणांचषट् नमोमंत्रश्चेतिमदनरत्नादिरवग्रंथः महादानेषुमात्स्येपि स्त्रीणांकुंडनिर्विप्रेंद्रायोन्याकोराणि
कारयेत् शावदातिलकेवैश्यानामर्ध चंद्राभंशूद्राणांचत्रिकोणकमितिशूद्राणांकुंडाकेःस्त्रीशूद्रयोः सधर्मत्वाच्च अतए
वमात्स्ये हिरण्यगर्भेनरोनायदिवानारीएवंब्रह्मात्मसंभवांयःकरोतिमहापुण्यश्चशुनस्यापियत्फलंमितुक्तं कामधेनुदाने
प्यग्नेपि ब्रह्मविट्क्षत्रशूद्राणांकर्त्तव्याप्रयत्नतोनल्पेति भविष्यांतरे हलपंक्तिदानेपि. प्रयत्नेनमहीपालदानमेतन्नपोतम
दानमर्भक्तियुक्तेनस्त्रियावापुरुषेणवा ब्रह्मांडेसप्तद्वीपदाने सप्तद्वीपाह्वयंदानमेवंकृत्वातुमानवः नारीवापुरुषोवापिवै
रिंचंलोकमाप्नुयात् धान्यपर्वतेपि दिव्यंविमानमारुह्यनारीवापुरुषोपिवा तत्रैवकार्यासचलेपि इत्युच्चार्यनरोदधान
नारीवाविधिपूर्वकं तिलपर्वतेपि पुण्यक्षयादिहागत्यराजाभवतिधार्मिकः नारीवातस्यपत्नीचसुभगारूपसंयुता त
था मांधाश्चापुंवनार्थंनकार्त्तवीर्यंणाचैवहि दानमेतत्पुराकृतंतत्पत्नीभिस्तथैवच नचववचनात्तन्मात्रेधिकारः अनुवादे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰ १२ नफलापर्यंतत्वात् यद्यपि नरइत्यादि सामान्यस्याविद्वद्विषयत्वाद्द्विजमेवार्हं तथापि कश्चिच्चतुर्वर्णग्रहणात्कश्चिच्छूद्रस्य
कश्चिद्धर्मेषाः परामर्शात्स्त्रीशूद्रयोः समानधर्मत्वाच्छ्रवणविधिसिद्धविद्यत्वात्कामित्वाच्च शूद्रस्याप्यधिकारः तदुक्तं अधि
कारी भवेच्छूद्रः पूर्तधर्मेण वैदिके इति मोक्षधर्मेऽपि मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीं क्रियामिति पंगव्ये तु स्त्रीणां बक
लः स्त्रीशूद्रस्याविबुध्यर्थं प्राजापत्यं समादिशेत् पंचगव्यं तु कुर्वीत स्नात्वा शुचिर्भवेदिति पाराशरोक्ते शूद्रे तु न निषेधः
यत्त्वत्रिः पंचगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत् उभौ तौ तुल्यकर्माणौ पूयाख्ये नरके वसेदिति तत्र प्रायश्चित्ते विनाज्ञेयं
विशेषः प्रायश्चित्तरत्ने ज्ञेयः एवं पूर्तजलाशयोत्सर्गप्रासादप्रतिष्ठामहादानादिष्वपि शूद्रस्याधिकारः अधिकारी भवेच्छू
द्रः पूर्ते धर्मे न वैदिके इति व्यासजातुकर्ण्योक्तेः पूर्तमाह हेमाद्रौ मदनरत्ने च जातूकर्ण्यः वापीकूपतडागादिदेवतायतना
नि च अन्नप्रदानमारामाः पूर्तमित्यभिधीयते तत्रैव नारदः ग्रहोपरागे यद्दानं सूर्यसंक्रमणेषु च द्वादश्यादौ च यद्दानं तदेत राम
त्पूर्तमुच्यते शंखः रोगिणां परिचर्या च पूर्तमित्यभिधीयते तत्रैव स्मृत्यंतरे बलिर्वैदिच यद्दानं तत्पौर्तिकमुदाहृतं तेनक १२

र्मविपाकदानादाव्यधिकारः मनुः दानधर्मंनिषेवेत नित्यमैष्टिकपौर्तिकं ॥ श्रौतस्मार्ताग्निसाध्यकर्मांगदानमिष्ट व्यासोपि वर्णानामाश्र
माणांच चातुर्वर्ण्ये युधिष्ठिर दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितं विशेषस्तु मत्कृते दानकमलाकरे ज्ञेयः अत्र यत्र महादानं
जलाशयोत्सर्गादौ वैदिकमंत्रयुक्तवचनाद्ग्रंथकारस्यैवाधानादावधिकार उक्तः तत्र द्वयी गतिः वैदिकमंत्ररहितं विप्रैः कार्यमित्येकः पक्षः
मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीं क्रियामिति मोक्षधर्मे व्यासोक्तेः मनुरपि धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनुव्रताः मंत्रवर्जं न दु
ष्यंति प्रशंसां प्राप्नुवंति चेति यत्तु मेधातिथिनोक्तं यानि मंत्ररहितानि व्रतोपवासादीनि तान्यनुतिष्ठंतः शूद्रास्तत्र वृत्तत्वे न मंत्रव
र्ज्यानुष्ठानेः शब्दमनुतिष्ठंतो न दुष्यंतीति स मंत्रकानुष्ठानं स्यादिति तन्न स्थपतीष्टिवच्छागग्राहिके पाविधाने मंत्रवर्जनाविधानात्
अन्यथा मंत्रहीनव्रतोपवासादेरधिकाराप्रसक्त्या विधिवैयर्थ्यात् तस्मात्समंत्रे मंत्रवर्जनाविधानार्थमेवैतत् अन्ये त्वाहुः वि
प्रैर्वैदिकमंत्रेणैव होमादिकार्यं वक्ष्यमाणपराशरोक्तेः माधवीयेप्येवं पौराणमंत्रेणाचार्यकर्तृकेषु पाव एवायजमानेषु तथा श्रव
णमात्रं उक्तयुक्तेः श्रवणविधिजन्यज्ञानस्यैवांगत्वात् वैदिके तु यजमानेन नमस्कारमात्रं अनुमतोस्य नमस्कारा मंत्र इति गौतमो

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰ १२ क्तेः व्यासमन्वादिवाक्यान्यप्येतद्विषयाण्येव अस्येति षष्ठीकृत्यात् तत्संबंधित्वात् पौराणे विप्रस्य अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृ
ह्यत इति पूर्वोक्तवाराहोक्तेः यत्तु समंत्रकहोमस्य पुत्रप्रतिग्रहांगत्वात् व्याहृत्यादिमंत्रपाठे च स्त्रीशूद्रयोरनधिकारात्तयोर्दत्तकपुत्रो
न भवत्येवेति शुद्धिविवेके रुद्रधरेणोक्तं तन्न भर्त्रनुज्ञया स्त्रिया अपि प्रतिग्रहोक्तेः तदाह वसिष्ठः न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा
न्यत्रानुज्ञानाद्भर्तुरिति इदं तज्जीवने तदूर्ध्वं तु स्वातंत्र्यान्नानुज्ञापेक्षा यद्यपि मेधातिथिना भार्यात्ववद्दृष्टरूपदत्तकत्वे होमसाध्य
मुक्तं स्त्रियाश्च होमासंभवस्तथापि व्रतादिवद्विप्रद्वारा होमादिकारयेदिति हरिनाथादयः गौडसंबंधनत्वप्येवं शूद्रस्याप्युत्तरोगशां
न्तिकर्मविपाकतुलादावपि स्त्रीशूद्राश्च सधर्माण इति स्मृते अत एव शूद्रकर्तृकहोमो विप्रद्वारैव पराशरोक्तेः दक्षिणार्थं तु यो वि
प्रः शूद्रस्य जुहुयाद्धविः ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेदिति अत्र माधवाचार्यः यो विप्रः शूद्रदक्षिणामादाय तदीयं हविः
शांतिः पुष्ट्यादिसिध्यर्थं वैदिकैर्मंत्रैर्जुहोति तत्र विप्रस्यैव दोषः शूद्रस्तु होमफलं लभेतैवेति व्याचष्टे तच्चास्माभिर्निर्णयसिंधौ राम
सविस्तरमुक्तं तेन सर्वत्र शूद्राणां वैदिकमंत्रहोमे द्वौ पक्षौ ऽविप्रद्वारा समंत्रकः अमंत्रको नाम्ना चेति अथ शूद्रस्य संस्कारः यमः १२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शूद्रः शूद्रोप्येवंविधिं कार्यैर्विना मंत्रेण संस्कृतः नकेनचित्समसृज्यत छंदसां तं प्रजापतिः छंदसा मंत्रेण व्यासोपि गर्भाधानं पुंसव
नसीमंतो जातकर्म च नामक्रियानिष्क्रामोन्नप्राशनं चपनक्रिया कर्णवेधो व्रतादेशो वेदारंभक्रियाविधिः केशांतस्नानमुद्वाहो वि
वाहाग्निपरिग्रहः प्रेताग्निसंग्रहश्चैव संस्काराः षोडशाः स्मृताः इत्युक्त्वा नवैताः कर्णवेधांता मंत्रवर्ज्जं क्रियास्त्रियाः विवाहो मंत्रत
स्तस्याः शूद्रस्यामंत्रतो दश यत्तु स्मृतिकौमुद्यां मदनपालेनोक्तं ब्राह्मणक्षत्रियवैश्यानां गर्भाधानसीमंतजातकर्मनामकरणान्न
प्राशनचूडोपनयनव्रतचर्याध्यापनसमावर्तनविवाहयज्ञदानानि समानानि स्युः मंतुक्तो द्विजानामेवोक्ते विवाहमात्रसंस्कारं शूद्रोपि
लभतामर्हति ब्राह्मणश्च न शूद्रस्य जातकर्मादि एवं चोलाभावः चूडाकर्म द्विजातीनां सर्वेषामेव धर्मत इति मनुक्तेरिति तच्चिंत्यं सोमं
तवस्थापनयनादिसामर्थ्यत्वाद्दन्यपादाने प्यधिकारापत्तेर्मानवीयेच धर्मत इत्युक्तेः शूद्रो होमादिनिषेधात् तदाह मनुः वैजिकैर्गार्भि
कैर्होमैः शूद्रामौंजीनिबंधनैः वैजिकं गार्भिकं चैनो द्विजानामपमृज्यत इति अत एव मदनरत्ने हिरण्यगर्भदाने गर्भाधानं पुंसवनं
सीमंतोन्नयनं तथा कुर्याद्धिरण्यगर्भस्य ततस्ते द्विजपुंगवा इत्युक्त्वा जातकर्मादिकाः कुर्यात्क्रियाः षोडशाप्यपरा इत्यत्र मात्स्ये स्त्रिया

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. कृ. १४

जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाः षट् संस्काराः शूद्राणां तु षडेते पंचमहायज्ञाश्चेत्येकादशोक्तं रूपनारायण
हरिहरभाष्ययोरप्येवं शार्ङ्गधरस्तु द्विजानां षोडशैवस्युः शूद्राणां द्वादशैव हि पंचैव मिश्रजातीनां संस्काराः कुलधर्मतः वेदव्रतोपन
यनमहानाम्नीमहाव्रतं विना द्वादश शूद्राणां संस्कारा नाममंत्रत इत्याह अपरार्कस्तु गर्भाधानमृतौ पुंस इत्यत्राह एतच्चातुर्वर्ण्यप
रं न तु जातिमात्रपरं तथा तत्रोपनयनं विधायवाच्यं स्यादिति तेन तन्मते गर्भाधानपुंसवनसीमंतजातकर्मनामनिष्क्रमान्नप्रा
शनचोलाख्याः अष्टौ भवंति कल्पतरौ श्रोसेतु विवाहमात्रं संस्कारं शूद्रोपि लभतां सदेत्युक्तं अत्र सदसच्छूद्रगोचरत्वेन देशभे
दाद्वा व्यवस्थितित्वं यत्तु मनुः न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति तदर्थं महामेधातिथिः यत्सामान्यतो निषिद्धं स्तेयानृता
दि न वदति क्रमेस्य तथा त्वापं यथा द्विजानां उपनयनरूपं संस्कारं च नार्हतीति तेन तूष्णीं कार्याः पूर्वोक्तयमाद्युक्तेरिति दिक् शूद्रस्य
चौले च नयंच चूडानादिप्रसः तत्स गोत्रचिकत्वाच्छूद्रे च तदभावात् यद्यपि तस्माद्राज्ञः सर्वाः प्राजाः काश्यपा इति शतपथश्रुते राम
र्गोत्रनाशे तु काश्यप इति हेमाद्रौ व्याघ्रपादोक्तेश्च काश्यपगोत्रमस्ति अत एव पीठादीन्निर्वपेद्धिरनामतो गोत्रतस्त्वथेति हेमाद्रौ शू १४

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

दृश्याद्दे भविष्यवचनं तथापि श्राद्धे एव तत् न तु प्रवरप्राप्तौ प्रमाणमस्ति ऋष्यप्रत्ययाभावाच्च अत एव मनुना द्विजानां धर्म
त इत्युक्तं अर्थप्राप्तं शूद्रस्य केशवपनं तु नेवार्यत इति मेधातिथिः तत्र चौले विकल्पेन शूद्राणां सर्वमुंडनं शिखाधारणं वा
शूद्रस्यानियंताः केशवेशा इति वसिष्ठोक्तेः अत एव हारीतः स्त्रीशूद्रौ तु शिखां छित्वा क्रोधाद्वैराग्यतोऽपि वा प्राजापत्यं प्रकु
र्वीतां निष्कृतिर्नान्यथा भवेदिति तच्छेदे प्रायश्चित्तमाह अत एव गौड स्त्रीणां विधवानां शिखा दृश्यते यत्तु पादो न शिखी
नोपवीती स्यान्नोच्चरेत्संस्कृतां गिरं मध्यपत्रे न भुंजीत ब्रह्मरक्षस्य भामिनीति तन्मुंडितत्वपरिग्रहपक्षे इत्यादिके त्रिदोष
त्कमत्कृते निर्णयसिंधोक्तेयः तथा शूद्राणां पंचमहायज्ञाश्च भवंति भार्यारतः शुचिर्भृत्यभर्ता श्राद्धक्रियावतः नमस्का
रेण मंत्रेण पंचयज्ञान्महापयेदिति याज्ञवल्क्योक्तेः भारते राजधर्मेषु तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान्स्वयं दक्षि
णा पाकयज्ञानां हिरण्यं तु विधीयते तेच वाजसनेपिशाखया कार्याः शूद्रवाजसनेपिन इति गौडनिबंधे दक्षोक्तेः हरि
हरभाष्यविवाहप्रकरणे व्यक्तमुक्तं अन्यत्र प्रयोगे व्यक्ती भविष्यतीति संक्षेपः॥ ॥इति श्रीजगद्गुरुनारायणभट्टसूरिस

शू॰ क॰ १५ नुरामकृष्णभट्टात्मजकमलाकरभट्टकृतेशूद्रधर्मकमलाकरेशूद्रसंस्कारः॥ ॥अथशूद्रश्राद्धनिर्णयः तत्रश्राद्धक्रियारंभ
इतिप्रागुक्तेर्नित्यनैमित्तिककाम्येषुमिद्धोधिकारः एवंस्त्रीणांस्वभर्तृप्रभृतित्रिभ्यःस्वस्वपितृभ्यःस्तथैवच विधवाकार्यं
श्राद्धं यथाकालमतंद्रितेतिस्मृतिरत्नावल्यां वृद्धमनूक्तेः तच्चश्राद्धंस्त्रीशूद्राणांमंत्रवर्जंतूष्णींभवति स्त्रीणाममंत्रकंश्राद्धंत
थाशूद्रस्यकृतस्यच प्राग्द्विजाश्चव्रतोदशीतेचकुर्युस्तथैव तदितिहेमाद्रौमरीचिवचनात् अयमेवविधिः प्रोक्तःशूद्राणांमं
त्रविवर्जितः अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यते इतिब्रह्माच्च अत्रश्राद्धप्रकरणेपिपरिभाषात्वा शूद्रस्यस्नानदाना
दौसर्वत्रविप्रेणमंत्रपाठःकार्यः सोपिपौराणस्य एवंस्त्रियामपीतिशूलपाणिः प्राग्द्विजाश्चेत्यचूडास्त्रिवर्षपरं अनुपेते
कुर्वंतिमंत्रहृत्स्येत्समेधिकं यद्यसौकृतचूडःस्याद्यदिस्याच्चत्रिवत्सरः इति सुमंतूक्तेः स्मृत्यर्थसारे अनूपनीतास्त्रीशूद्राश्च
श्राद्धमृत्विजाकारयेयुः स्वयंवामंत्रकंकुर्युः द्विजस्त्रियस्तुस्वयंसंकल्पमात्रंकृत्वावैदिकमंत्रयुक्तंसर्वंब्राह्मणद्वाराका राम
रयेयुरितिप्रयोगपारिजातः अतएवस्त्रीणामित्यकृतविप्राहस्त्रीपरमितिहेमाद्रिराह अनूपनीतस्तुवैदिकमंत्रयुक्तंस १५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

र्वैस्वपमेवकुर्यात विशेषेषस्तु निर्णयसिंधौ ज्ञेयः शूद्रस्य तु सदामश्राद्धमेव सदा चैव तु शूद्राणामामश्राद्धं विधीयते
इति सोपस्करः पृथ्वीचंद्रोदयेमात्स्येपि एवंशूद्रेपि सामान्यंवृद्धिश्राद्धंचसर्वदा नमस्कारेणमंत्रेणकुर्यादामेनवैबुधः
सदा तत्रैववृद्धपराशरः अमात्रेनतुशूद्रस्य तूष्णींतुद्विजपूजनं कृत्वाश्राद्धंतुभिर्वाप्यसजातीनाशयेद्यासएक आम
त्रस्यचशूद्रस्यपक्वान्नंपक्वमुच्छिष्टमुच्यते तेनश्राद्धंगृहेपक्वहोमोनेतिकेचित् हेमाद्रौभविष्ये धर्मएवस्तुधर्मज्ञायद्विज
द्राःप्रकुर्वते अग्नौकरणमंत्रश्चनमस्कारोविधीयते अग्नयेकव्यवाहनायनेमः सोमायपितृमतेनमः इत्ययमंत्रःआ
वाहनादिकर्त्तव्यंयथाशूद्रेणतुशृणु देवानांदेवतास्तातुपितॄणानामगोत्रतः पिंडादीन्निर्वपेद्धीरनामतोगोत्रतस्तथा शू
द्राणांकाश्यपगोत्रमितिहेमाद्रिः एवंतर्पणादिषुज्ञेयं येतुकश्यपप्रत्ययाभावाच्छूद्रगोत्रमेववानास्तीत्याहुः स्तेपूर्वोक्तएव
तत्रैवभविष्ये शूद्रस्तुगृहपाकेनतत्पिंडान्निर्वपेत्तया सक्तुमूलंतस्यपायसंवाभवेत्सदा तेनपक्वमुच्छिष्टमुच्यते इत्य
तद्विहितभिन्नपरंशूद्रकर्वैश्वदेवपरमितिस्मार्तगौडाः श्राद्धपरंवा अन्यथासर्वत्रयद्युपनिषेधादेवश्रात्संयामसिद्धेः
१

शू॰ क॰ १६ शूद्रस्यात तेनश्राद्धेसर्वत्रामप्रासोपिंडेपायसादेः प्रतिप्रसवः देवताभ्यःपितृभ्यश्चेत्यक्रमयंवानमस्कारमंत्रइतिविज्ञानेश्व
रामंत्रपाल्ादयः हेमाद्रिस्तुशूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइतिमात्स्ये मंत्रनिषेधान्नाममंत्रेणेत्याह यच्चपृथ्वी
चंद्रोदयेस्कांदे राजकार्येनियुक्तस्यबंधनिग्रहवर्तिनः व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेदिति तच्छूद्रेपितुल्यं किंतुश्रा
द्धेशूद्रस्यनब्राह्मणः प्रतिनिधिः ब्राह्मणोहीनवर्णस्यनकुर्यादौर्ध्वदेहिक शूद्रोपिवाब्राह्मणस्यविनापारशवात्क्वचिदिति
तत्रैवपारस्करोक्तेः पारसवश्छलशूद्रापुत्रः विष्णुपुराणे दानंचदद्याच्छूद्रोपिपाकयज्ञैर्यजेनच पित्र्यादिकंचयत्सर्वं
शूद्रःकुर्वीततेनवै तेनपाकेन इदंकलौतरपानतिस्मार्त्तगोडाः येतुभावतेराजधर्मेषु यवनाःकिराताःगांधाराः
श्चयवनाःशबराःबर्बराःशकास्तुषाराःकारस्कपाशःकंकाश्वःपह्लवाश्च्यभमद्रकाइनकाइत्यक्त्वा ब्रह्मक्षेत्रप्रसूताश्च
वैश्याःशूद्राश्चमानवाः कथंधर्मांश्चरिष्यंतिसर्वेविषयवासिनइतिचोक्ता वेदधर्मक्रियाश्चैवतेषांधर्मोविधीयते राम
पितृयज्ञास्तथाकूपाः प्रपाश्चशयनानिच दानानिचयथाकालंद्विजेभ्योविसृजेत्सदा तथादक्षिणासर्वेयज्ञानांदा १६

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

तथाभूतिमिच्छता पाकयज्ञं महाहोश्च कर्त्तव्याः सर्वैर्दस्युभिरिति म्लेच्छादीनां श्राद्धविधानं तदपि सजातीयभोजनद्रव्यदानादि
परं विप्रस्तु श्रानसो न पक्वभोजयेद्विद्वान् सद्रोपि कदाचन भोजयन्प्रत्यवायी स्यान्न च तस्य फलं भवेत् यत्रापि द्विजानां पाकनि
षथाल्पुहरितः एकोद्दिष्टं तु कर्तव्यं पाकेनैव सदा स्वयमिति यथा वा स्मृतिदर्पणे गालवः मृताहं च सपिंडं च गयायां श्राद्धं महा
लयं अपन्नोपि न कुर्वीत श्राद्धमामेन न क्वचिदिति तत्रापि शूद्रस्याममेव सदा चैवं तु शूद्राणामामश्राद्धं विधीयते इति समंतु
कः शूद्रस्य दशपिंडाख्यामेनैवेति हलायुधः तन्न पूर्ववचनैः पायसादेरपि विधानात् तच्च शूद्रकर्तृकमामश्राद्धपरं एवं न
तु द्विजवत्शूद्रः मध्यान्हात्परतो यस्तु कुतपः समुदाहृतः मामश्राद्धं तु तत्रैव पितॄणां दत्तमक्षय्यमिति स्कंदं तु कौरित्यपराकें हे
माद्रौ चोक्तं पुत्रजन्मनि हिरण्यश्राद्धमेव तदाह हेमाद्रौ संवर्तः पुत्रजन्मनि कुर्वीत श्राद्धं तत्रैव बुद्धिमान् न पक्केनन्नचामेन क
ल्यणान्यभिकामयन् आमहेमश्राद्धादौ विशेषस्तु मत्कृते निर्णयसिंधौ ज्ञेयः किं यानिबंधव्यासः हिरण्यमानं श्राद्धीयं त
धंयतत्क्षत्रियादितः यथेष्टं विनियोज्यं स्याद्भुंजीयाद्ब्राह्मणस्स्वयं विप्रालब्धं भुंजीयात् क्षेत्रादिलब्धे तु यथेष्टविनियोगः तेना

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. क. पिश्याद्वैश्यदेवादिनकार्यं देवोद्देशेनत्यक्तस्य देवतांतरायत्यागायोगादिति देवयाज्ञिकः शूद्रलब्धेनूकं तत्रैव षड्विंशन्मते आमंत्र
१७ शूद्रस्य यत्किंचीच्छाधिकं प्रतिगृह्यते तत्सर्वं भोजनापात्रं नित्यनैमित्तिकेन तु गोडश्रुद्धितत्वेंगिरः शूद्रवैश्येन विप्रेण क्षिरं वा यवा दधि
निषुत्तेनन भोक्तव्यं शूद्रान्नं तदपि स्मृतं शूद्राद्विप्रगृहेष्वन्नं प्रविष्टं तु सदा शुचि पाराशरः तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः द्विजा
तिकरसंस्पृष्टं सर्वं तन्नविरुध्यते विष्णुपुराणे संप्राशयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतं अंगिराः पात्रांतरगतं ग्राह्यं दुग्धं स्वगृहमा
गतं तथा अनुपनीतस्त्रीशूद्रादेरुत्तरीयेण सव्यापसव्येत्वे तु चोत्तरीयं वस्त्रोत्तरीयाभावे द्व्यंगुलं त्र्यंगुलं चतुरंगुलं वा परिमंडलं ष
ण्णवत्यंगुलं दीर्घमिति ज्ञातूकर्ण्योक्तं ज्ञेयं तदभावेउपरिवासोमात्रं अपसव्यं क्रमादृस्वं कृत्वा कश्चित्स गोत्रज इति ब्राह्मणोक्तेरिति
मैथिलवाचस्पतिः स्मृतिकौमुद्यां बोधायनः शूद्राणामित्युपक्रम्य उपवीतं वस्त्रविन्यासादिति शंखः चतुर्भिर्दर्भपिंजूलैर्ब्राह्म
णस्य पवित्रकं एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं मंडलेतु शूद्रस्याभ्युक्षणं मतमित्यादिनिर्णयसिंधौर्णयं शूद्रस्यातिल राम
कविधिरुक्तः पाराशरपुराणे ऊर्ध्वपुंड्रं त्रिपुंड्रं च वर्तुलं चतुरस्रकं अर्धचंद्रादिकं लिंगं वेदनिष्ठो न धारयेत् वेदनिष्ठ इत्युक्तेः शू १७

द्रनुज्ञा मदनपारिजाते ब्राह्मे ऊर्ध्वपुंड्रं द्विजः कुर्यात्क्षत्रियस्य त्रिपुंड्रकं अर्धचंद्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु विश्वाभ्रत्लाप्नौ शंख
चक्राद्यंकनं कचगीतनृत्यादिकं तथा एकजातेरयं धर्मो न जातु स्याद्विजन्मनः पुरुषार्थप्रबोधे शिवसर्वस्वादौ तु स्त्रीशूद्राणां विभूति
धारणमुक्तं ॥ ॥इति रामकृष्णभट्टात्मजकमलाकरभट्टकृते शूद्रयात्मनिर्णयः ॥ ॥अथ शूद्राणां विहितनिषिद्धधर्माः लघुपाराशरः
विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणं कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् कपिलाक्षीरपानेन ब्राह्मणीगमनेन च वेदाक्षर
विचारेण शूद्रश्चांडालतां व्रजेत् यत्तु स एव लवणं मधु मद्यं च दधि तक्रं घृतं पयः न दूष्यं शूद्रजातीनां कुर्यात्सर्वेषु विक्रयमिति स्मृतिकौमुद्यां
अत्र शूद्रपरं तु युक्तं एवमस्य शूद्राणां मद्यमांसभक्षणेपि न दोषः निषिद्धमांसं विना अतः पुण्यशूद्रसंसर्गेन दोषः पतति तत्संसर्गे हि सः
वनं च यत्तत्र द्विजानां तु तन्निषेधात्यांतित्यमिति न तत्संसर्गे शूद्रस्य दोष एव शूद्रस्य वर्जनं त्वभ्युदय तदाह मनुः न मांसभक्षणे दोषो न
मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफलेति स शूद्रैर्वर्ज्यमेव यत्तु कालिकापुराणे विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दो
षभाक् मधुचर्मसुरालाक्षात्यक्त्वा मांसं च पंचममिति अत्रनापदि मद्यादिनिषेध इति कल्पतरुः पराशरपुराणेपि पिण्याकमांसव

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.का. सैलं गव्यं तक्रादिकं तथा शूद्रादेव तु संग्राह्यं न द्विजेभाक दाचन स्कांदे प्रभासखंडे दर्भानुद्धरेच्छूद्रो न पिबेत्कापिलं पयः मध्यपत्रेन भु
१८ ञ्जीत ब्रह्मरक्षस्य भामिनी नोच्चरेत्प्रणवं मंत्रं पुरोडाशं न भक्षयेत् न श्रीनोपवीती स्यान्नोच्चरेत्संस्कृतां गिरं न पठेद्देववचनं त्रिषवंन
हिंसयेत् नमस्कारेण मंत्रेण क्रियासिद्धिर्न वेधकं निषिद्धाचारेणं कुर्वन् पितृभिः सह मज्जति अन्यान्यपि निषिद्धानि मात्स्ये कलि
युगवृत्तः तत्र भवत्यथं लोकः सर्वं व्याप्स्यते म्लेच्छमितः पक्रम्य ब्राह्मणाः शूद्रयोनिस्थाः शूद्र वै मंत्रयोनयः उपस्थास्यंति तान्विप्रा
वेदार्थमिभिलिप्सवः लेवोपि शूद्राणां मंत्रयोनिश्च संबंधो ब्राह्मणैः सह भवतीह कलौ तस्मिन् शयनासनभोजनैः राजानः शूद्र
भूयिष्ठा ब्राह्मणान्बाधयंति ते शूद्राश्च ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः अक्षत्रियस्य राजानो विप्राः शूद्रोपजीविनः शूद्राभिवादिनो
सर्वे ब्राह्मणैरपि वंदिताः आसनस्थाः द्विजान्दृष्ट्वा न च मत्यल्पचेतसः ताडयंति द्विजेंद्रांश्च शूद्रा वै स्वल्पबुद्धयः आस्ये निधाय वै हस्तं क राम
र्णं शूद्रस्य वै द्विजः निचस्य च तदा वाक्यं वदंति विनयेन तु अधीयते तथा वेदान् शूद्रा धर्मार्थकोविद यजंते चाश्वमेधेन राजानः शूद्र १८
योनयः तस्मादायुर्बलं रूपं कलिं प्राप्य प्रहीयते तदाल्वल्पेन कालेन सिद्धिं गच्छंति मानवाः धन्या धर्मं चरिष्यंति युगांते समुपस्थिते

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

त्रेतायां वापि कोधर्मो इत्यापृच्छा तथाप्यंते कल्यो कौर्मेप्येते श्लोका पाठांतरयुताः कौर्मे षष्ठदंताजिताक्षाश्च मुंडाः काषायवास
सः शूद्रा धर्मं चरिष्यंति युगांते समुपस्थिते ताडयंति द्विजेंद्रांश्च शूद्राराजोपजीविनः उपस्थानमन शूद्राश्च द्विजमध्ये परंतप
पुष्पैश्च भूषणैश्चैव तथान्यैर्मंडनैर्द्विजाः शूद्रानभ्यर्चयंत्यल्पश्रुतभाग्यबलान्विताः न प्रेक्ष्यंते चैतास्यापि शूद्रा द्विजवरान्नृप
सेवावसरमालोक्य द्वारि तिष्ठंति च द्विजाः वाहनाच्च समारूढ्य शूद्रान्शूद्रोपजीविनः सेवंते ब्राह्मणास्तास्तु स्तुवंतिः स्तुतिभिः
कलौ अध्यापयंति वै वेदान्शूद्रान्शूद्रोपजीविनः पठंति वैदिकान्मंत्रा नास्तिक्यं घोरमाश्रिताः अत्र तस्मादेवं न कुर्यादिति
निषिध्यते स्कांदकौर्मयोः कलिधर्मेषु यत्र मायानारदका संवादो नारदस्य तु तत्र बौद्धं च जैनं च शाक्तं शैवं च वैष्णवं योग
ज्ञानमनश्चांतं विरुद्धं वेदशास्त्रतः चार्तिष्यंते कलौ ब्रह्मन तन्मतेन हि जातयः शुश्रूषयां स्त्रियः पत्यु र्विप्राणां भूद्रजातयः पि
ता पुत्रः परित्यज्य जपहोमादिसाधनं कुर्वते काम्यकर्माणि दृष्ट्वा निपतंत्यधः लौकिकै र्लौममभिगीतैर्दैवताराधनं तु यत
शूद्रादीनां यथाधर्मो न हि द्विजानां कदाचन गायंति कृतके गीतैरवज्ञानमश्रूत्विरितं गायंति विधवागीतं श्रोतृणामपि पापदाः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

विष्णुपुराणे अपयज्ञिकं जं कुम्भकुम्भमिति वादिनः तेहरेर्द्विषमप्रापाधर्मार्थजन्मयज्ञने विष्णुपुराणे द्विजशुश्रूषकत्वयैव
व पाकयज्ञाधिकारवान् निजीनां गतिं वेलोकान् शूद्रो धन्यतरस्ततः दानं दद्याच्छूद्रोपि पाकयज्ञैर्यजेतिच पित्र्यादिकं च वै सर्व
शूद्रः कुर्वीत येन राः पाकयज्ञाः पाकज्ञाह्यस्ततः पाकेन मननसत्यादाप्राज्ञास्यार्थत्वाय द्वायोस्मश्राकतर इति वदन्त्यार्याः मदनपा
रिजाते बृहस्पतिः शौचब्राह्मणशुश्रूषा सत्यमक्रोध एव चः शूद्रकर्म तथा मंत्रोनमस्कारोस्य चोदितः भारते अनुशासनि
कपर्वणि इष्टापितामसः शूद्रमभिभूतं तु तामसः द्विजशुश्रूषणां धर्मं शूद्राणां तु प्रयुक्तवान् नश्यंति तामसा भक्ताः शूद्रस्य
द्विजभक्तितः द्विजशुश्रूषया शूद्रः परं श्रेयोधिगच्छति अहिंसकः शुभाचारो देवताद्विजपूजकः शूद्रो धर्मफलैरिष्टैः स्वध·
र्मेणैव युज्यते तथा स्वाहाकारो नमस्कारो मंत्रशुधोविधीयते ताभ्यां शूद्र पाकयज्ञैः र्यजेत ब्रह्मवान्स्वयं श्राह्म्यमंत्रः सूत्र
पांश्च न कुर्वीत जानु शूद्रः कथंचन पाणीग्राहि धर्मलब्धाबाधतापिगिरिर्यसः रात्रौ वासमनुज्ञातः कामं कुर्वीत धर्मतः बौ
धायने शूद्राणां मार्याधिष्ठितानां मासि मासि वपनमर्थवदाचमनकल्पाउपवीतं वस्त्रविन्यासादि आर्यो वैश्यः अर्यस्वामि

वैश्ययोरिति पाणिनिः मनुरपि शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनां वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनं शौच
मादमनं मृतकं च वैश्यवत् त्रिराचमनं पंचदशरात्रमाशौचमित्यर्थः यत्तु याज्ञवल्क्यः शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टा
भिरंततइति तदसच्छूद्रपरमिति मदनरत्ने अंततस्त्वालुगाभिः अछोन्मार्जनप्राणस्पर्शादिकं तु स्त्रीशूद्रयोर्न भ
वतित्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेदिति याज्ञवल्क्योक्तत्रिः प्राशने एव तदुक्तेरिति केचित् अत्येतु पल
क्षणत्वात्स्त्रीशूद्रयोरपि भवतीत्याहुः उच्छिष्टभाजनस्य शेषः न तु भक्तिपात्रस्थं न शूद्राय मतिं दद्यात् नोच्छिष्टं न हविः कृतमिति पूर्व
युक्ते अन्ये तु यथोक्तमाहुः गौतमः शूद्रः चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पादप्रक्षालनमेवैके श्राद्धकर्म
भृत्याभरणं स्वदारवृत्तिरनुज्ञातोस्य नमस्कारो मंत्रः पाकयज्ञैः स्वयं यजेतेत्यपरे इति पाकयज्ञैरष्टकादिभिः स्वयमजेत नर्त्विगादिभिरिति
तद्व्याख्या स्वयमिति पत्नीपुत्रादिव्यावृत्त्यर्थमिति लक्ष्मीधरः एके इत्यकेर्विप्रद्वारापि इति शूद्दोह तत्वात् शक्तो स्वयमेव यज्ञो विप्रद्वारास
शूद्रः स्वयमसच्छूद्रो विप्रद्वारेत्यपरार्कः हेमाद्रौ भारते श्राद्धकर्मनवश्यं वस्मत्यक्रोध एव वा स्वेषु दारेषु संतोषः शौचं नित्यानसूय

शू.क.
२०

ता आत्मज्ञानंतितिक्षा च धर्मः साधारणो नृप चातुर्वर्णस्येति शेषः शूद्राणां पुराणश्रवणे आत्मज्ञानं श्रोतव्य इति नियम
स्तु द्विजपर इति हेमाद्रिः भगवद्गीतासु मामुपाश्रित्य कौंतेय येपि स्युः सामयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति
परां गतिं हेमाद्रौ विष्णुः क्षमा सत्यं दमः शौचं दानमिंद्रियसंयमः अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया आर्जवं लो
भशून्यत्वं देवब्राह्मणपूजनं अनभ्यसूया च तथा धर्मः सामान्य उच्यते इदं वृत्तिमाहतुर्मनुपराशरौ शुश्रूषैव तु शूद्रस्य ध
र्मो निःश्रेयसः परः शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते शूद्रस्य वृत्तिमाकां
क्षन् क्षत्रमाराधयेद्यदि धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् क्षत्रादिसेवा वृत्तिरेव विप्रसेवया धर्मोपीत्यर्थः
स्वर्गार्थमुभयार्थं च ब्राह्मणेन न राधयेत् विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते यदतोन्यद्धि कुरुते तद्भवत्यस्य
निष्फलं विप्रसेवां विना कृतमपि स्यात् तदा नाप्रकृतमित्यर्थः सेव्यं प्रत्याह प्रकल्प्या तस्य तैर्वृत्तिः स्वनींजीर्णाश्चैव प

राम
२०

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

रिष्ठदाः पुन्नाकाधान्यकणाः उच्छिष्टं भुक्तशिष्टं भांडस्थमिति मेधातिथिः गौतमः तेभ्यो वृत्तिं लिप्सेत जीर्णान्युपानच्छत्रवासःकू
र्चादीन्युच्छिष्टाशनं शिल्पवृत्तिश्च यं चार्यमाश्रयेद्भर्त्तव्यस्तेन क्षीणोपि तेनोत्तरस्तदर्थोस्य निचयः स्यादिति क्षीणो वृत्तिहीन
स्तेनार्येण भर्त्तव्यस्तेन शूद्रेण चोत्तरः अर्यो भर्त्तव्य इत्यर्थः उच्छिष्टदानं दासपरं अन्यं तु उच्छिष्टमन्नं दातव्यं शूद्राय गृ
हमेधिने गृहस्थाय तदातव्यमन्नमेव दिने दिने इत्या प्रातरुच्छिष्टनिषेधे गृहस्थपर इत्याहुः मदनरत्नेप्येवं तथा
तपः शूद्रस्य सेवनं याज्ञवल्क्यः शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत् शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् नृ
सिंहपुराणे अयाचितप्रदाता स्यात्कृषिं वृत्त्यर्थमाश्रयेत् पुराणं शृणुयान्नित्यं नरसिंहस्य पूजनं उशना शूद्रस्य द्विजशु
श्रूषा सर्वशिल्पानि वाप्यथा विक्रयः सर्वपण्यानां शूद्रधर्म उदाहृतं देवलः शूद्रधर्मस्त्रिवर्णाः शुश्रूषा कलत्रादिपोष
णं कर्षणं पशुपालनं भारोद्वहनं परोपव्यवहारश्चित्रकर्मनृत्यगीतवेणुमृदंगवादनानीति मनुः अशक्नुवंस्तु शुश्रूषां शू
द्रः कर्तुं द्विजन्मनां पुत्रदारात्यये प्राप्ते जीवेत्कारुककर्मभिः यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः तानि कारु

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.क. ककर्माणिशिल्पानिविविधानिच कुर्यादिविशेषः नृसिंहपुराणे दूराच्छूद्रेणोपचर्योब्राह्मणोग्निरिवज्वलन् एवंधर्मा
२१ चरणे लोकमाहपेटीनसि गांधर्वंशूद्रस्यस्थानमित्यर्थः॥ ॥इतिरामकृष्णभट्टसूनुकमलाकरकृतेशूद्रधर्मकमलाकरेशूद्राणां
विहितनिषिद्धानि॥ ॥अथशूद्रस्यसंस्कारप्रयोगः तत्रादौसर्वकर्मांगत्वात्पुण्याहवाचनमाचारानुसारेणोच्यते. व्यासः संपूज्यगं
धमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् काम्यकर्मणिमांगल्येसंग्रामाद्भुतदर्शने यमः सोंकारंब्राह्मणेकुर्यान्निरोंकारंमहीपतौ उपां
शुचतथावैश्येस्वस्तिशूद्रेप्रकीर्तयेत् कर्ताचम्य सुमुखश्चैकदंतश्चेत्यादिकृत्वादेशकालौसंकीर्त्यामुककर्मकरिष्ये तदंगतयाग
णेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंसहतंत्रेणकरिष्ये इतिसंकल्प्य आदौनिर्विघ्नतासिध्यर्थंमहागणपतिपूजांक
रिष्ये गणेशंपूजयेत् यथा हेरंबहेत्वमेह्येहिअंबिकात्र्यंबकात्मज सिद्धिबुद्धिप्रियक्ष सर्वलोकपितःपितः नागास्यनागहारत्वं
गणनाथचतुर्भुज भूषितःस्वायुधैर्दिव्यैः पाशांकुशपरस्वधैः आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः इहागत्यगृहाणत्वंपूजां राम
रक्षचमेक्रतुं इत्यावाह्य षोडशोपचारैःसंपूज्य पात्रेसफलमर्घ्यमादाय रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक भक्तानाम २१

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भयंकर्त्रानाभवभवार्णवात् द्वैमातुर कृपासिंधो षण्मातुराग्रज प्रभो वरदस्त्वं वरं देहि वांछितं वांछितार्थद अनेन फलदानेन फल
दो भव सर्वदा इत्यर्घ्यं दत्वा वक्रतुंड महाकायेति प्रार्थयेत् यद्वा विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्व
राय विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः नमस्ते रुद्ररू
पाय करिरूपाय ते नमः इति प्रार्थना अथ भूमिप्रार्थना यथा मंत्रः विष्णुशक्तिसमुत्पन्ने शंखवर्णे महीतले अनेकरत्नसंपू
र्णे भूमिदेवि नमोस्तु ते इति प्रार्थ्य पृथ्वी त्वया धृता लोका इति मंत्रेण षोडशोपचारैः भूमिं पूजयेत् ततः स्वाग्रे स्वस्तिकं कुर्यात्
तत्र कारिका ग्रंथांतरेपि श्रीमत्स्वस्तिकमादितो भुवि शुभं कुर्यात्सिते तंदुले द्वौ त्रिंशत्परितो गतानि सततं तावच्च कोष्ठैर्युतं प्राक्
पंचाननरतसु पंच वितनं रेखास्तु मध्ये द्वयं कोणे धायतनश्च तापशुभ यतः स्तिर्यक् तथैकैककः एवं तच्चतुरस्रकं विरचयेत्कुसोः
पद्माकारवत्याच्चास्याला जस्तुंड वत्कलशवत् कुर्यात् प्रतीच्यां दधा अथ धान्यच्च धान्यराशिद्वये कलशौ संस्थाप्य दूर्वा पंचपल्लव

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मृ.क. फलहेमपंचरत्नादि क्षिप्त्वा धान्यपूर्णपात्रद्वयं न्यस्य तत्र पात्राहस्तं च वरुणमर्णसां पतिमीश्वरं आवाहयामि यज्ञेस्मिन् पूजे
२२ यं प्रतिगृह्यतामिति वरुणमावाह्य संपूज्य कलशस्य मुखे विष्णुरित्याद्यैः संप्रार्थ्य ततस्तत्कलशे अक्षतान् क्षिपेत् मातृदेवो भव
पितृदेवो भव आचार्यदेवो भव अतिथिदेवो भव आशिषः प्रार्थयंते प्रार्थनामाह एताः सत्याः आशिषः संतु अवनिकृतजानु
मंडलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि
विष्णुपदानि च तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु ब्राह्मणस्य हस्ते उदकं दत्वा शिवा आपः संतु सौमनस्यमस्तु अक्षतं चा
रिष्टं चास्तु गंधाः पांतु सुमंगल्यं चास्तु अक्षताः पांत्वायुष्यमस्तु पुष्पाणि पांतु सौश्रियमस्तु तांबूलानि पांत्वैश्वर्यमस्तु दक्षिणाः
पांतु बहुदेयं चास्तु इति विप्रहस्ते दत्वाष्टौ षोडश वा ब्राह्मणान् यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते राम
तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये वाच्यतामिति ते रुक्के मा विघ्नं मा च मे २२
पापं मा संतु परिपंथिनः सौम्या भवंतु सुखिनः सर्वे लोकाः सुखावहा इति कर्त्ता वदेत् विप्रास्तथास्त्विति उक्त्वा कुर्वंतु स्वस्ति ते ब्रह्मा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

स्वस्ति चापि हि जातयः सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ययाति नहुषश्चैव धुंधुमारो भगीरथः तुभ्यं राजर्षयः सर्वे स्व-
स्ति कुर्वंतु नित्यशः स्वस्ति तेस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा स्वाहा स्वधा शची चै-
व स्वस्ति कुर्वंतु ते सदा लक्ष्मीररुंधती चैव कुरुतां स्वस्ति ते तथा असितो देवलश्चैव विश्वामित्रस्तथांगिराः वसिष्ठः कश्यपः
श्चैव स्वस्ति कुर्वंतु ते सदा धाता विधाता लोकेशो दिशश्च सदिगीश्वराः स्वस्ति ते य प्रयच्छंतु कार्तिकेयश्च षण्मुखः विवस्वान्भ-
गवान्स्वस्ति करोतु तव सर्वशः दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः अधस्ताद्धरणीं शेषो नागो धारयते सदा शेष-
श्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु इति वदेयुः ततः कर्ता ब्राह्मणः मनः समाधीयतां समाहितमनसः स्मः इति ते प्रसीदंतु
भवंतः प्रसन्नाः स्म इत्युक्ते कुंभाज्जलं पातयन्वदेत शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आ-
युष्यमस्तु आरोग्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिः पुत्रसमृद्धि धनधान्यसमृद्धिः इष्टसंपदस्तु अरिष्टनिरसनम- राम
स्तु यत्पापं तत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरे कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शु- २३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

ग्र.क. २३ भाः शोभनाः संपद्यंतां तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां अग्नि
पुरोगाविश्वेदेवाः प्रीयंतां इंद्रपुरोगामरुद्गणाः ब्रह्मपुरोगासर्ववेदाः वसिष्ठपुरोगाऋषिगणाः प्रियंतां अरुंधतीपु
रोगा मरुद्गणाः ब्रह्मपुरोगासर्ववेदाः वसिष्ठपुरोगा एकपत्न्यः प्रियंतां ब्रह्मच ब्राह्मणाश्च श्रीसरस्वत्यौ प्रियेतां श्रद्धामे
धे प्रियेतां भगवती कात्यायनी प्रीयतां भगवती माहेश्वरी प्रीयतां भगवती पुष्टिकरी प्रीयतां भगवती तुष्टिकरी प्रीय
तां भगवंतौ विघ्नविनायकौ प्रीयेतां भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रियतां स
र्वाश्च ग्रामदेवताः प्रियंतां सर्वाः कुलदेवताः प्रियंतां सर्वाः इष्टदेवताः हता ब्रह्मद्विषः हताः परिपंथिनः हतास्य कर्मणो
विघ्नकर्त्तारः शत्रवः पराभवंयांतु शाम्यंतु घोराणि शाम्यंतु पापानि शाम्यत्वीतयः शुभानि वर्धंतां शिवा आपः संतु शिवा
ऋतवः संतु शिवा अग्नयः संतु शिवा ओषधयः संतु शिवा वनस्पतयः संतु शिवा अतिथयः संतु अहोरात्रे शिवे स्यातां राम
शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वेग्रहाः प्रीयंतां भगवान्नारायणः प्रीयतां भ २३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

गवान्पर्जन्यः प्रीयतां भगवान्स्वामी महासेनः पुन्याहकालान्वाचयिष्ये वाच्यतां ब्राह्मणं पुण्यमहर्यच्चसृष्ट्युत्पादनकारकं वेद
वृक्षाभयं नित्यं तत्पुण्याहं ब्रुवंतु नः दीयंते यत्र दानानि पूज्यंते च द्विजातयः दृश्यंते यत्र मांगल्यं तत्पुण्याहं सदास्तु मे यजमानः
मम गृहस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु त्रिः स्वस्ति पुण्याहमिति त्रिर्विप्राः ततः स्वस्तिर्याच विनाशाख्या पुण्यकल्याणवृद्धि
दा विनायकप्रिया नित्यं ता स्वस्तिं नो ब्रुवंतु च मम गृहे स्वस्ति भवंतो ब्रुवंतु आयुष्मते स्वस्तीति विप्राः त्रिः सागरस्य तु या वृद्धि
र्महालक्ष्म्यादिभिः कृता॥ संपूर्णा चैव चंद्रस्य तां वृद्धिं नो ब्रुवंतु नः ऋध्यतां यजमानः ऋध्यतामिति विप्राः त्रिः पृथिव्या मुद्धृताया
तु कल्याणं च पुरा कृतं ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः मम गृहे कल्याणं भवंतो ब्रुवंतु कल्याणमिति त्रिर्विप्राः ततः
क्षीरोदधिसमुद्भूता मथ्यमाने महोदधौ विष्णुवक्षःस्थलप्रिया नित्यं तां श्रियं नो ब्रुवंतु नः यजमानः श्रीरस्त्विति भवंतो ब्रुवंतु अ
स्तु श्रीरिति ते रुके वर्षशतं पूर्णमस्तु शिवं शिवमस्तु वंशाभिवृद्धिरस्तु प्रजापतिः प्रीयतां ततो विप्राः स्वराःस्वित्यादौ पौरा
ण्यं तमभिषिंचेयुः तत्र पत्नी वामे ततः करोतु स्वस्ति तेऽस्तु इत्यादैः पूर्वोक्तैः यजमानस्य निरांजनं तिलकः आशीर्वादश्च एवं स

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु॰ क॰
२४

र्वेत्र ॥ ॥ इति कमलाकरभट्टकृते शूद्रस्य पुण्याहवाचनं ततः कर्ता तंडुलपुंजेषु गौरी पद्मा शची मेधा सावित्री विजया ज-
या देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षो-
डश ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेंद्राणी चामुंडा सप्त मातरः इति गणेशपूजनं गौर्यादि षोडश ब्राह्म्या-
दि सप्तमातृः रावाह्य कुड्यादौ घृतेन पंच सप्त वा धाराः कृत्वा वसोर्धारायेन मइत्यावाह्य षोडशोपचारैः संपूज्य नांदीश्राद्धं कुर्यात य-
था सर्वसव्येन देवतीर्थेन यवैश्चापिसव्येपि मात्रादित्रयं पित्रादित्रयं मातामहादित्रयं संबंधिनांदीमुखसत्यवसुसंज्ञकवि-
श्वेदेवस्थाने भवद्भ्यां क्षणः कर्तव्यः प्राप्नुतां भवंतौ प्राप्नवामेति द्वौ विप्रौ कुशाये वद्दूर्वा देवे निधाय मातृपितामहीप्रपिता-
महीनाममुकदेवीनां दासीनामित्याचार्यैः चूडामणिः नांदीमुखीनां स्थाने इत्यादिना द्वौ पितृपितामहप्रपितामहानां नांदीमु-
खानां स्थाने इत्यादिना द्वौ मातामहप्रमातामहवृद्धप्रमातानां सपत्नीकानां नांदीमुखानां स्थाने इत्यादिना द्वौ मातामहप्रमा- राम
तामहवृद्धप्रमातामहाः कोकिलमातानुसारिणां तु मातृमातामहप्रमातामहप्रमातामहा इति मातामहेन सह मातुः श्राद्धं २४

नदापार्वणद्वयमेव नामगोत्रे मूलं निर्णयसिंधौ ज्ञेयं ततः सत्यवसुसंज्ञका विश्वेदेवाः इदं वः पाद्यं एष वोर्घ्यः एवं मात्राद
यः मातामहस्य इदं वाः पाद्यं ततः विश्वेदेवाः इदमासनमास्यतां नमः एवं मात्रादौ अर्घस्थाने संकल्पसिद्धिरस्तु विश्वेदेवाः ए
षवो गंधः एवं मात्रादौ एवं इमानि पुष्पाणि धूपदीपः आच्छादनं एते मुकेभ्य गंधपुष्पधूपदीपाच्छादनांताः सर्वेउपचाराः संपू
र्णा भवंतु ततोर्धचंद्रमंडलमभ्युक्षणं कृत्वा पात्रे आमान्नानि द्विगुणानि समानि वा दत्वा प्रोक्ष्य पात्रमालभ्य यवान्विकीर्यान्नेगु
ं दत्वा सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः इदं वः युग्मब्राह्मणभोजनपर्याप्तं द्विगुणमामं सोपस्कारं आममूल्य भूकं य
थाशक्ति हेमवा संप्रसीदे दे स्वाहा न मम एवं मातृपितामही प्रपितामह्यः नांदीमुख्यः इदं वा। युग्मेत्यादि पितृपितामह प्रपिता
महाः नांदीमुखाः इदं वः युग्मेत्यादि एवं मा मातामह प्रमातामह वृद्धप्रमातामहाः सपत्निकाः नांदीमुखाः इदं व इत्यादि अत्र
पिंडाः कृता कृताः पिंडपक्षे वेदिं कृत्वा पूर्वाग्रा लेखाः तिस्रः कृत्वा दर्भान् आस्तीर्य मातर्नांदीमुखी अवनेनिंक्ष्वेति जलं दत्वा एवं
पितामहि प्रपितामहि एवं पितः नांदीमुखेत्यादि ततः सक्तुना गुडेन वा दधिबदरयवमिश्रान् पिंडान्कृत्वा एतत्ते मातर्नां

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

श्रा॰ कृ॰
२५

दीमुखेभ्य एष ते पिंडः इदमन्नं वा स्वाहा नमः इत्येकं पिंडं दत्वा परं तूष्णीं द्वितीयं एवमेकैकस्य द्वौ द्वौ दत्वा पुनः प्रत्यवनेनिक्ष्वेति प्रत्य
वनेजनं प्राग्वत् दत्वाभ्यंजनांजने वा सांसिच दत्वा शेषमवघ्राय पात्रस्थजलं परिषिच्य शिवा आपः संत्वित्यादि कृते तेन नांदीश्राद्धकर्मणः
सांगतासिध्यर्थं द्राक्षामलकं वा तन्निष्क्रयद्रव्यं वा दक्षिणां तुभ्यं संप्रददे स्वाहा नम इति प्रत्येकं दत्वानेन नांदीश्राद्धेन नांदीमुखदेवताः प्रिय
तां मातापितामह्यश्चैव तथैव प्रपितामहीः पितापितामहश्चैव तथैव प्रपितामहाः मातामहस्तत्पिता च प्रमातामहकादयः एते भवंतु सु
प्रीताः प्रयच्छंतु च मंगलमिति संप्रार्थ्य पिंडान्विसर्जयेत् इति वृद्धिश्राद्धं एतदंते सर्वत्र संस्कारेष्वपि च समानाय चतुर्थेऽहनि यत्तु लौदो कृत्वि
वरणं तत्राचाराच्छरावे आपः क्षीरः कुशाग्राणि दधि दूर्वाः सतास्तथा सर्षपाः कुंकुमं चेति अर्घ्योष्टांगः प्रकीर्तितः इत्यष्टांगमर्घ्यं कृत्वापि
धाय स्वागतं वा हूजं श्रद्धा मदनुग्रहकारकाः इदं अर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतामिति पाद्यार्घमाचारात्कृत्वा चार्यं ब्रह्मर्त्विग्वर्णं कृ
त्वा ब्राह्मणान्प्रार्थयेत् ब्राह्मणाः संतु मे शस्ताः पापात्पांतु समाहिताः वेदानां चैव दातारः पातारः सर्वदेहिनां जपयज्ञस्तथा होमे दानेऽस्य राम
विविधैः पुनः देवानां च पितॄणां च तृप्त्यर्थं याजकाः कृताः येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं रक्षंतु सततं ते मां जापयज्ञे व्यवस्थि २५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नाः ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतं येषां वाक्योदकेनैव शुध्यंति मलिना जनाः पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः सर्व
कर्मरता नित्यं वेदशास्त्रार्थकोविदाः अत्रिशाः सत्यवाचश्च देवध्यानरताः सदा यद्वाक्यामृतसंसिक्ता ऋध्यिं यांति नरद्रुमाः अंगीकुर्वंतु क
र्मेतत्कल्पद्रुमसमाश्रियः यथोक्तनियमैर्युक्ता मंत्रार्थस्थिरबुद्धयः यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयात् मम येत्र जपे पूज्याः संतु
मे नियमान्विताः अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः देवध्यानरता नित्यं प्रसन्नमनसः सदा अदुष्टभाषिणः संतु मा संतु पर
निंदकाः ममापि नियमात्येते भवंतु भवतामपि आत्मा प्रासंगिकं अथ गर्भाधानं तत्राद्यरजोदर्शनदुष्टवारलग्नतिथ्यादौ शांतिमुक्त्वा
नेयाति रत्नोक्तविधिना कृत्वा त्यरात्रिचतुष्टयं वर्जं समरात्रिषु मुक्त्वा निर्णयसिंधोक्तेः काले तत्कार्यं कर्त्तासभार्यो देशकालौ स्मृत्वा स्या
मनायाया जनिष्यमाणपूर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानं करिष्य इत्युक्त्वा तदंगत्वेन गणे
शपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानि प्राग्वत्कृत्वा अलंकृतः वस्त्रं धृत्वा भृंगधारसंदूर्वारसं भार्यां दक्षिणनासाबिले सिंच
येत् नीराजनतः सर्वेनमस्कुर्यात् ततो रात्रौ शय्यां विष्णवे नमः एवं त्वष्ट्रे प्रजापतये धात्रे नमः सिनीवाल्यै नमः सरस्वत्यै नमः अश्वि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भ॰क॰ शिभ्यां॰ पर्जन्याय नमइति योनिमभिमृश्य स्त्रियंगत्वा कर्तौत्थापयेत् स्त्रियानस्नायां अन्तेमूत्रवच्छौचाचमने इतिगर्भाधानं अथ
२६ पुंसवनं द्वितीये तृतीये चतुर्थे वा मासे पुंनक्षत्रे श्रवणत्रयसुः पुनर्वसू आदितिनिर्ऋति पुष्याभिगोमृगः रविभूकृतजीववासराः कु
र्यात् पुंसवनादिकर्माणि इतिनक्षत्र पुंसवनं कर्त्तासपत्निकोऽभ्यंगमंगलस्नानं कृत्वा देशकालौ स्मृत्वा कर्त्ता ममभार्यायां
जनिष्यमाणस्य गर्भस्य पुंरूपता प्राप्त्यर्थं बीजगर्भसमुद्भवैनोनिबर्हणार्थं च श्री॰ प्रीत्यर्थं पुंसवनं करिष्ये इति सं॰
गणेशपूजा पुण्याहवाचनं मातृकापूजानांदीश्राद्धानि कृत्वा समानवर्णवत्सगोदधि पत्न्यादक्षिणपाणौ दत्वा मध्येप्राग
ग्रयवौ द्वौ माषौ पार्श्वयोर्दत्वा किंपिबसीति त्रिः पृष्ट्वा पुंसवनं पुंसवनं पुंसवनमिति त्रिरुक्त्वा सा प्राश्नीयात् एवं त्रिः कु
र्यात् इति पुंसवनं अथ सीमंतः चतुर्थे षष्ठे सप्तमे वा मासि प्राग्वा प्रसवात् पुंनक्षत्रे तुरगरविमृगाकाविष्णुपूषाख्य राम
मैत्रनिर्ऋतिदितिपुष्यत्रीणि चेवोत्तराणि शतभिषग्वसु वायु ब्राह्म्यचित्राख्य तारामिति वदंति सपूर्ना प्राहुः सीमंतका २६
लः इतिनक्षत्र भर्त्ता देशकालौ संकीर्त्य ममास्यां भार्यायां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिरसनद्वार

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

प्रतिगर्भसंस्कारातिशयार्थं परमेश्वरप्रीत्यर्थं सीमंतोन्नयनं करिष्ये इत्युक्त्वा तदंगतया गणेशपूजनपुण्याहवाच
नमातृकापूजननांदीश्राद्धानि कृत्वा अलंकृतो नववस्त्रधरो दूर्वारसं भार्याया दक्षिणनासायां अग्नये नमः राज्ञे वरुणाय न
मः इति सिंचेत् ततः स्त्रियः शुक्लतंतुत्रययुतामुदुंबरफलगुच्छयुतामादाय पश्चात्स्थित्वा प्रजापतये नम इति भ्रूमध्या
दारभ्योर्ध्वं द्विधा केशान्कृत्वा त्रिःसीमंतं कुर्यात् ततो नीराज्य तदुत्संगे फलं धटुकादि दत्त्वा विप्रेभ्यो दद्यात् मान्यानि दक्षिणां
दद्यात् नारदः विप्रः क्षत्रिययोः कुर्याद्द्वि वा सीमंतकर्म स्त्र वैश्यशूद्रकयोस्त्वेतद्द्विवा निश्चयं षि केचन अत्र विशेषो गर्भिणी
मत्यति धर्माश्च मत्कृते निर्णयसिंधौ ज्ञेयाः ॥ ॥इति सीमंतः अथ जातकर्म पृथ्वीचंद्रोदये कृष्णाजिनः प्रादुर्भावे पुत्रपु
त्रयोश्चंद्रसूर्यग्रहे तथा स्नात्वानंतरमात्मीयान्पितॄन्श्राद्धेन तर्पयेत् कुमारे जाते नाभिच्छेदात्प्राक् पिता सचैलं स्नानं कृत्वा दे
शकालौ संकीर्त्य अस्य कुमारस्य गर्भांबुपानजनितदोषपरिहारार्थं श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये इति संकल्प्य गणेश
पूजनपुण्याहवाचनमातृकापूजनानि हेम्ना नांदीश्राद्धं च कृत्वा आज्यमधुनी हेम्ना दर्षपीत्वा हेम्ना प्राशयित्वा कर्णयोर्निधा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

गृ॰ कृ॰ मदेवायसवित्रेनमः सारस्वत्येनमः अश्विभ्यांनमः इत्युक्त्वांमावभिमृश्यंत्रायमनमृइत्युक्त्वा विप्रान्पूजयेत् आशिषः इतिजातकर्म
२१ अथषष्ठीपूजा मिताक्षरायां मार्कंडेयः मंत्रः रक्षणीया तथा षष्ठीनिशातत्रविशेषतः रात्रौजागरणंकार्यंजन्मदानां तथाबलिः
पुरुषाः शस्त्रहस्ताश्चनृत्यगीतैश्चयोषितः रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके व्यासः सूतिकावासनिलयाजन्मदानामदेवताः
तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तिता प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि अपरार्केब्र
ह्म कन्यायास्तस्याराकाद्यावातप्रीचेवपंचमी क्रीडनार्थाचबालानांषष्ठीचशिशुरक्षणी भद्रेतुपूजनीयावैयत्नेनैकद्विजातिभिः
राकानुमतिसिनीवाली कुहूरितिचतस्त्रः कन्या इत्यर्थः पितादेशकालौस्मृत्वाममास्यशिशोसर्वारिष्टशांत्यायुरारोग्यसिध्यर्थं गणेश
जन्मदाजीवंतिकाराकादीनांपूजनंकरिष्ये इतिसंकल्प्यकलशंसंस्थाप्य तत्रपूर्णपात्रेवस्त्रोपरि गणेशंजन्मदाःजीवंतिकांस्कंदं
राकामनुमतींसिनीवालींकुहूंचैवातप्रींचप्रीतमास्यावात्य स्वंद्धशिशुरक्षणींकुड्येलिखितांषष्ठींचावाह्य षोडशोपचारैःसंपूज्य माष राम
तक्रादिबलिंकृत्वाप्रार्थयेत् गौरीपुत्रोयथास्कंदःशिशुत्वेरक्षितःपुरा तथाममाप्ययंबालःषष्ठिकेरक्ष्यतांनमइति इतिषष्ठीपूजा २७

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

अथ दत्तकपुत्रविधिः व्याहृत्यादिहोमस्य पुत्रप्रतिग्रहं गत्वा तत्रच स्त्रीशूद्रयोरनधिकारात्तयोर्दत्तकः पुत्रो न यावत्येव रुद्राधरा
दयः विप्रद्वाराहोमादिकारयेदिति वर्धमानहरिनाथादयो गौडाः संबंधतत्वेप्येवं प्रयोगपारिजाते शौनकः अपुत्रो मृतपुत्रो वा
पुत्रार्थं समुपोष्य च वासांसि कुंडले दत्वा उष्णीषं चांगुलीयकं बंधून्नन्नेन संभोज्य ब्राह्मणांश्च विशेषतः आधानादि च यत्तंत्रं कृत्वाज्या
द्यवनांतकं दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत देवस्यत्वेति मंत्रेण हस्ताभ्यां परिगृह्य च अंगादंगेत्यृचं जप्त्वा आघ्राय शिशुमू
र्धनि गृहमध्ये तमाधाय चरुं हुत्वा विधानतः यस्त्वा हृदेत्यृचा चैव तुभ्यमग्र ऋचैकया सोमो ददद्दित्येताभिः प्रत्यृचं पंचभिः स्तथा
स्विष्टकृतादिहोमं च कृत्वा शेषं समापयेत मिताक्षरादौ वसिष्ठेन तु व्याहृतिभिः प्रत्यृचं आज्येन होमं उक्तः सच विप्रद्वारा कारणीयः
विशेषस्तु मत्कृते निर्णयसिंधौ ज्ञेयः सच दत्तकः पंचवर्षमध्ये ग्राह्यो नोर्ध्वं उर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप इति कालि
कापुराणात ऊर्ध्वं दुस्वं दानं छारेव दानाविक्रयं चैव दीनं च नन्नेयाः स्मरनिछवः दाराः पुत्राश्च सर्वस्वमात्मनैव तु त्याज्य यो दाति हेमाद्रौ वा
साकैः यत्तु याज्ञवल्क्यः स्वकुटुंबाविरोधेन देयं दारसुतादृते इति तत्स्वदानानिषुपुत्रपरिमित्यन्यत्र विस्तारः इति दत्तपुत्रविधिः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

स.क.
२८

अथ मनिकस्नानं ज्योतिषे कृत्तिकाभरणीमूलआर्द्राश्लेषा च रेवति मघाचित्राविशाखाश्च श्रवणं दशमं तथा एते प्राणहता
ऋक्षं शिशुस्नानं न कारयेत् यदि स्नानं प्रकुर्वीत पुनः प्रसूति वर्जयेत् उक्तं करेंद्रभाग्यं निलवासवांत्यमैत्रे दवाश्विध्रुवमस्त्रिपु
सा तिथावरिक्ते शुभमान नं ते ति प्रसूतकास्नानावधिं मुनींद्राः अथ नामकर्म नक्षत्र ज्योतिषे रेवत्युत्तरहस्तमूळवरुणः पु
ष्यच स्वाती मृगा विष्णुवादित्य प्रजेशवासव तथा पर्वाह्न वारे गुरौ सौम्ये शुक्र शुभे खगे शुभ दिने केंद्रत्रिकोणे तथा तारा चंद्रव.
ले पदेवदिवसे नामानि कर्णशुभं मदनरत्ने बृहस्पतिः द्वादशे दशमे वापि जन्मतोपि त्रयोदशे षोडशे विंशतौ चैव द्वात्रिं
शे वर्णतः क्रमात् नारदीये सूतकांते नामकर्म विधेयं स्वकुलोचितं नामपूर्वं तु बालस्य मंगलं सुसमाक्षरैः तत्रैव गार्ग्यः
मासनामगुरोर्नामदेयाद्वालस्य वै पिता कृष्णोनंतच्युतश्चक्री वैकुंठोथ जनार्दनः उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः
योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् अत्र मार्गशीर्षादिश्चैत्रादिर्वा क्रम इति मदनरत्ने नक्षत्रमपि नाम कार्यं. राम
कुलदेवतानक्षत्रसंबंधं पिता नाम कुर्यादिति तत्रैव शंखः परिशिष्टेपि तदक्षरादिकं नाम यस्मिन्धिष्ण्ये यदक्षरं २८

मनुः शूद्रस्यप्रेष्यसंयुतं तत्रस्वाचारोचांतेद्वात्रिंशेवान्हिपिता देशकालौस्मृत्वास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणार्थंना
मव्यवहारसिध्यर्थंचनामकरणंकरिष्ये इतिसंकल्प्य गणेशपूजनंपुण्याहवाचनमातृकापूजानांदीश्राद्धानिकृत्वाकांस्यादिपा
त्रेतंदुलपूर्णेहिरण्यागयोशनामततःकुलदेवतानामततोमासनामततोव्यवहारिकंशिवदासइत्यादिलिखित्वा नामदेवताःसंपू
ज्य शिशोःदक्षिणकर्णेमुकाभिकोसि अमुकोसीत्यादिनामानिउक्त्वोर्ध्वःकृतांजलिः कुलदेवतानाम्नाकुमुदासोभवतः सर्वा
न्ब्राह्मणानभिवादयते आयुष्मानभवत्वमुकदासइतिविप्राः एवंमासनाम्नानाक्षत्रेणनाम्ना व्यवहारिकेणनाम्नेत्यादिवा
च्यं ततःशतंदशवामान्यानिदत्वा विप्रेभ्यःआशिषोगृह्णीयात इतिनामकर्म अथदोलारोहः पारिजातेबृहस्पतिः स्वदो
रोहस्तुकर्तव्योदशमेद्वादशेपिवा ज्योतिर्निबंधे आंदोलाशयनेपुंसांद्वादशोदिवसःशुभः त्रयोदशस्तुकन्यायांनतनक्षत्र
विचारणात करत्रयेवैष्णवरेवतीयुदितिहयेचाश्विनकर्क्षवेषु कुर्याच्छिशूनांन्टपतेश्चतद्वदांदोलनंवैसुखिनोभवंति अ
थकर्णवेधः ज्योतिर्निबंधेगर्गः मासेषष्ठेसप्तमेवाष्टमेमासिवत्सरे कर्णवेधंप्रशंसंतिपुष्ट्यायुःश्रीविवृद्धये मदनरत्नव

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मु.का. मिष्ठः मासेषष्ठेसप्तमेवाष्टमेवावेध्यौकर्णौद्वादशेषोडशेन्हि हेमाद्रौव्यासः कार्त्तिकेपौषमासेवाचैत्रेवाफाल्गुनेपिवा कर्णवेधंप्रशंसं
२९ तिशुक्लपक्षेशुभेदिने सचमृगाद्रीहस्तचित्रापुनर्वसु पुष्यश्रवणधनिष्ठारेवतीषुरिक्तापर्ववर्जतिथौकार्यः मदनरत्ने सौवर्णीराज
पुत्रस्यराजतीविप्रवैश्ययोः शूद्रस्यजायतेसूचीमध्यमाष्टांगुलात्मिका चंडेश्वरः मार्धेद्वेमासद्वयेदद्यात्तांबूलंप्रथमंशिशोः अथनि
ष्क्रमणं ज्योतिर्निबंधेयमः तृतीयेवाचतुर्थेवामासिनिष्क्रमणंगृहात षष्ठेन्नप्राशनंमासियच्चेष्टंमंगलंकुले अत्रशिशूक्तिर्नतुद्वि
जोक्तिः तेनशूद्रस्यापितिमेधातिथिः मदनरत्नेबृहस्पतिः अन्नप्राशनकालेवाकुर्यान्निष्क्रमणक्रियां विष्णुधर्मोत्तरे दिगीशानादि
नेतत्रतथाचंद्रार्कयोर्द्विज पूजनंवासुदेवस्यगगनस्यचकारयेत बहिर्निष्कासयेद्गृहात्शंखपुण्याहनिस्वनैः पितादेशकालौस्मृ
त्वा स्यशिशोर्बीजगर्भसमुद्भवैनोनिबर्हणद्वाराबलायुर्वर्चोभिवृध्यर्थंनिष्क्रमणंकरिष्ये इतिसंकल्प्य गणेशपूजनपुण्याहवाचन
मातृकापूजानांदीश्राद्धानिकृत्वा प्रतिमास्वाक्षतेषुपूजयेच्चेशादिदशदिक्पालचंद्रसूर्यवासुदेवगः योनामभिरावाहनादिपूजांकृ राम
त्वाशंखतूर्यमंगलस्वनैः सूर्यचंद्रधनूनांदर्शयित्वापठेत चंद्रार्कयोर्दिगीशानांदिशांचगगनस्यच निक्षेपार्थमिमंदद्मितेमेरक्ष २९
CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

वसुंधरा अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः ततो विप्राः करोतु स्वस्ति ते ब्रह्मेत्याशिषं वदे
युः अथोपवेशनं प्रयोगपारिजाते पाद्मे पंचमे च तथा मासि भूमावेनं प्रवेशयेत् तत्र सर्वे ग्रहाः शस्ता भौमोप्यत्र विशेषतः विष्णुधर्मो
त्तरे वाराहं पूजयेद्देवं पृथिवीं च तथा द्विज पिता देशकालौ स्मृत्वास्य कुमारस्य सर्वारिष्टशांत्यायुरारोग्यसमार्थमुपवेशनं करिष्ये इ
ति संकल्प्य गणेशपूजनं पुण्याहवाचनं च कृत्वा पीठे प्रतिमायां पूजयेत् वाराहं पृथिवीं च नाम्ना षोडशोपचारैः संपूज्य तदग्रेप
चससवाधान्य पूजां कृत्वा तन्मध्ये भूमौ वस्त्रोपरि करोतु स्वस्ति ते ब्रह्मेत्याधेर्वा घंघाषेयाशिशुमुपवेश्य मस्तके जयमस्तु लाभमस्तु रक्षां कृत्वा
पठेत् रक्षैनं वसुधे देवि सदा सर्वगतं शुभे आयुःप्रमाणं सकलं निक्षिपस्व हरिप्रिये आचिरादायुषस्तस्य ये केचित्परिपंथिनः
जीविताऽऽरोग्यवित्तेषु निर्दहस्वाचिरेण तान् वरेण्याशेषभूतानां माता त्वमसि कामधुक् अजरा चाप्रमेया च सर्वभूतनमस्कृता च
राचराणां भूतानां प्रतिष्ठानाव्ययात्यसि कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति अत्रैव कटिसूत्रं बंधयेत् शिष्टास्त्वन्नप्रा
शनदिन एव निष्क्रमणमुपवेशनं च कुर्वंति अथान्नप्राशनं मदनरत्ने नारदः षष्ठे वाप्यष्टमे मासि पुंसां स्त्रीणां तु पंचमे सप्तमेमा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मु॰ क॰ ३० ऽपि वा कार्यं नवान्नप्राशनं शुभं लौगाक्षिः षष्ठेऽन्नप्राशनं जातेषु दंतेषु वा विष्णुधर्मोत्तरे ब्रह्माणं शंकरं विष्णुं चंद्रार्कौ च दिगीश्व
रान् भुवं दिशश्च संपूज्य हुत्वा वन्हौ तथा चरुं देवतापुरतस्तस्य धात्र्युत्संगगतस्य च अलंकृतस्य दातव्यमन्नं पात्रे सकांचनं मध्वा
ज्यदधिसंयुक्तं प्राशयेत्पायसं तु वा सर्वत्र फलविशेषश्चमत्कृतेनिर्णयसिंधौ ज्ञेयः पितादेशकालौ स्मृत्वास्य शिशोर्बीजगर्भस
मुद्भवैनोविनाशद्वारा बलायुर्वर्चोभिवृध्यर्थमन्नप्राशनं करिष्ये इति संकल्प्य गणेशपूजापुण्याहवाचनमातृकापूजानांदीश्राद्धा
नि कृत्वा ब्रह्मादीन् प्रतिमासु तंडुलपुंजेषु वा संपूज्य तन्नाममंत्रैर्वन्हौ चरुं हुत्वाज्यदधिमधुयुतमन्नं पायसं वा प्राशयित्वा तांबूलं
दत्वा रत्नहेमफलग्रंथादीनि निधाय यद्बालः स्पृशेत्तां तस्य जीविकेति परिसंख्येत इत्यन्नप्राशनं अथाब्दपूर्तिः गौडव्यवहारनिर्ण
ये नवांबरधरो भूत्वा पूजयेच्चिरायुषं मार्कंडेयं नरो भक्त्या पूजयेत्प्रयतस्तथा ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिं प्रल्हा
दं च हनूमंतं विभीषणमथार्चयेत् स्वनक्षत्रं जन्मतिथिं प्राप्य संपूजयेन्नरः षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः तिथिव राम ३०
त्तन्नाम्ना तिलहोमोप्युक्तः आदिपुराणे सर्वस्य जन्मदिवसे स्नातो मंगलवारिभिः गुरुदेवाग्निविप्रांश्च पूजनीयाः प्रयत्नतः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः प्रतिसंवत्सरं यत्नात्कर्त्तव्यश्च महोत्सवः कृत्यचिंतामणौ गुडदुग्धतिलान्नद्यादुत्सवेप्रयोच
बंधयेत गुग्गुलं निंबसिद्धार्थदूर्वागोरोचनादिकं संपूज्य भानुविप्रेशौ महर्षिं प्रार्थयेदिदं जन्मतिथिश्चौदयिकी ग्राह्या तदुक्तं कृ
त्यतत्वार्णवे स्कांदे युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया रवेरुदयमीक्षंते न तत्र तिथियुग्मतेति पिता सबालोभ्यंगं कृत्वा नवव
स्त्रधरो देशकालौ स्मृत्वा अस्यनिको दीर्घायुरारोग्यार्थं वर्षवृद्धिदिनकृत्यं करिष्ये इत्युक्त्वा प्रतिमास्वक्षतपूंजेषु वा गणेशं सूर्यं मार्कं
डेयं व्यासं परशुरामं अश्वत्थामं कृपं बलिं प्रल्हादं हनुमंतं बिभीषणं षष्ठीं स्वनक्षत्रं पितरौ प्रजापतिं गुरुमग्निं च संपूज्य पसे तन्वा
न्मा तिलहोमं च कृत्वा गुग्गुलनिंबसर्षपदूर्वागोरोचनगुडानां पोटलीं हस्ते बध्वा मार्कंडेयं प्रार्थयेत् चिरंजीवी यथा त्वं भो भविष्यामि
तथा मुने रूपवान्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन आयुरारोग्यसिध्यर्थं प्रसीद भगवन्मु
चिरंजीवी यथा त्वं तु मुनीनां प्रवर द्विज कुरुष्व मुनिशार्दूल तथा मां चिरजीवनं मार्कंडेय महाभाग सप्तकल्पांतजीवन आयुरारोग्य
सिध्यर्थमस्माकं वरदो भव पिता त्वेनमिति वदेत् ततो गुडतिलयुतं दुग्धमादाय सतिलं गुडसंमिश्रमंजल्यर्धमितं पयः मार्कं

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

दुग्धावरं लब्ध्वा पिबाम्यायुर्विवृद्धये इतिपिबेत ततोगुरुर्देवाः विप्राः पूज्याः गौरीतिथितत्वे स्कांदे खंडनं नखकेशानां मैथु
भृ. क. नाध्वगमनं तथा आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत. तत्रैव कृतांतकुजयोर्वारे यस्य जन्मतिथिर्भवेत. अनृक्षयोग
३१ संप्राप्तो विघ्नस्तस्य पदे पदे कृतांतशान्तिः जन्मनक्षत्रयोगेन दोषः तस्य सर्वौषधिस्नानं गुरुदेवाग्निपूजनं विशेषानिर्णी
यसिंधौ ज्ञेयः अथहेमाद्रौ वर्धापने विशेषो भविष्ये युधि० देवदेव महाभाग बालानां हितकाम्यया वर्धापनविधिं ब्रूहि रा
ज्ञामपि विशेषतः कृष्ण उवाच प्रयागव्यासेन पृष्टः सनत्कुमारः प्राह मासि प्रविष्टे प्रथमे बालवर्धापने बुधैः राज्ञां वा तन्
मुनिश्रेष्ठ समां तेच विधीयते कुमुदा माधवी गौरी रुद्राणी पार्वती उमा काली सरस्वती चैव सावित्री ब्रह्मणः प्रिया सती सं
ज्ञा तथा मेधा पुष्टिस्तुष्टिः समन्विता नृपाद्रिं व परित्राणां जीवंती नाम षोडसी पूजनीया प्रयत्नेन स्वरूपमध्ये विलिख्य तु रज राम
नीपिष्टेनाथवापि लिखेद्वा कुंकुमेन तु गंधैः पुष्पैः सुगंधैश्च दीपवस्त्रनिवेदनैः पूजनीयाः कसंस्थाप्य कुमुदाद्याः पृथक् २ ३१
नामभिः स्नपनीयास्ताः पूजयित्वा तु बालकं भूपतिं तु मुनि[illegible]घं सर्वालंकारभूषितं. पूजयेन्मातृपितरौ बालवर्धापने मासि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पुरोधा पूजयेद्ब्राह्मणान् राजवर्धापनाविधौ कुमुदायाः समुद्दिश्य वंशपात्राणि कल्पयेत् एकैकस्या धनाद्यस्क दद्यात्षोडशषोडश
तद्धानि तद्धानि द्वे द्वे वैकमथापि वा बहुपक्वान्नयुक्तानि बहुपुष्पफलानि च सुवासिनीभ्यो विप्राणां दद्याद्दक्षिपुरःसरं प्रि
यता कुमुदायाम बालकायुर्विवर्धिनि बलेनयमसमातुष्ट्या बालं मे वर्धयंतु वै प्रयच्छंतु सदारोग्यं सौख्यं सौभाग्यमेव च श्रीश्वते
तेति मंत्रेण अर्घ्यं ताभ्यः प्रदापयेत् वस्त्रताम्बूलपुष्पादि दिनं तस्मिन्प्रकल्पयेत् सुवासिनीनां देयंतु कुमुदाऽप्रयतामिति
तत्रैव स्कांदे एवं वर्धापनं वत्सरांते वै जन्मवासरे व्यतीतेषु च मासेषु बालानां बलवृद्धये न बालरोगाः प्रभवंति तस्य नस्कं
दुरोगान्तुषाकिनीभ्यः भयं वै भैन्नेव जलाग्निदिग्भ्यो बालश्च पुष्टः सविशेषतश्च संप्राप्य राज्येन्द्र पतिः समाने कुर्यादिमं
शांति महोत्सवं च ग्रहांस्तथा पूज्य विनायकं च दुर्गां च भक्ता कुमुदादिदेवीः ये पूजयेद्भक्तिः पुरःसरंहि सहेम पूर्णबलद्
द्युकः गोपथब्राह्मणात्तु राजानमभिवर्धयिष्यन्नायुषा वर्चसा यशसा तेजसा विजयेन कीर्त्या पवित्रैर्मंगलैरभ्युदयकं
कुमेरचे पित्वा माहेंद्रं हविर्निरुप्य लोकपालेभ्यश्चश्रपयेन्महारंद्राय ओजसे तिलोकपालांश्च द्वाराजानमन्वारभ्य जुहुयद्

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू·क·
४२

सेचमिदंत्वातारमिदंचेदंयइतित्रिभिः रक्षांकृत्वास्त्रगुरुणासमाभ्यतेइतिरोचनेनालंकुर्यान्मंजीर्येतंतुमितिरुक्केसंयातचेत
कृत्वाधातातेयस्मियमित्यक्तमभिवर्धस्यति ॥ ॥इतिकमलाकरभट्टकृतेशूद्रधर्मकरेबदपूर्तः अथचौलं बृहस्पतिः
पापग्रहाणांवारादोषविप्राणांसुभंदरवेः क्षत्रियाणांसमासूनोर्विटशूद्राणांशनेःशुभं अत्रकालनिर्णयः सर्वोमोतुर्गर्भर
तादर्शनेचनकार्यमित्यादिरन्यश्चविशेषोद्विजतुल्योमत्कृतनिर्णयसिंधोज्ञेयः शूद्रस्यविशेषमात्रंतूच्यतेप्रथमेद्वितीये
तृतीयेपंचमेवाब्देयथाकुलधर्मंचौलककालेपितादेशकालौस्मृत्वास्यशिशोर्वीजगर्भसमुद्भवदोषनाशद्वाराबलायुर्वे
चौभिवृध्यर्थंचौलकर्मकरिष्येइतिसंकल्प्यगणेशपूजापुण्याहवाचनमातृकापूजावसोर्धारानांदीश्राद्धानिकृत्वाभद्रोसने
शिशुमुपवेश्यकाशिखांकेशापाद्ववासंरक्षपसर्ववावपनं यथाचारंकार्यंततोनीराजनादिकार्यं इतिचौलं अथविद्या
रंभः मदनरत्नेनरसिंहः अक्षरस्वीकृतिंकुर्यात्यातेपंचमहीतले उत्तरायणगेसूर्येकुंभमासंविवर्जयेत अथधनु
र्विद्या दीपिकायां आद्रितिगुरुयमार्कस्वातिचित्राग्निपित्र्यध्रुवहरिवस्त्रमूलेध्विंदुभागान्मेषु रवि·शशिबुधवारोविष्णु

राम
३२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

बोधविपोषेस्कृसमयतिथियोगेचापविद्याप्रशस्त तत्र हरिंलक्ष्मीसरस्वतींच पूजयित्वा कार्यं सर्वायुधमहामात्रसर्वदंभारि
सृदन चापमांसशारंरक्षसा केशारवरैरिह बनेकर्मनरक्षार्थं संहारायहरेणच त्रयीमूर्तिगतेदेवधनुरस्त्रनमाम्यहं
इतिमंत्रेणसंपूज्यनत्वा बाणान्प्राच्यां मुक्त्वाविप्रान्पूजयेत् अथछुरिकाबंधः ज्योतिर्निबंधेनारदः छुरिकाबंधनंवक्ष्ये
नृपाणांप्रकरग्रहात् विवाहोक्तेषु मासेषुशुक्लपक्षेप्यनस्तगे जीवंशुक्रेच भूपुत्रे चंद्रताराबलान्विता मौंजीबंधर्क्षतिथिषु
कुजवर्जितवासरे संग्रहे शूद्राणांराजपुत्राणांमान्यभावेस्त्रबंधनं मौंजीबंधोक्ततिथ्यादिसोपिभौमदिनंविना विष्णुधर्मे
पूजयित्वाहरिंलक्ष्मीं तथादेवींसरस्वतीं स्वविद्यास्त्रकारांश्च तांच विद्यांविशेषतः ५ए तेषामेवदेवानांनाम्नातुजुहुयाद्धु
तं दक्षिणात्वद्विजंद्राणांकर्तव्यंचात्रपूजनं मंत्रस्तु सर्वायुधानांप्रथमंनिर्मितासितिथिनाशुभा शूलायुधादिनिःकृष्य हस्तामु
ष्टिग्रहंसुनं चंडिकायाःपदत्रासि सर्वदुष्टनिबर्हणी तयाविस्तारिताचासिदेवानांप्रतिपादिता सर्वसत्वांगसंभूतासर्वाशु
भनिबर्हणी छुरिकेरक्षमांनित्यंशांतियच्छनमोस्तुते इतिसंपूज्यनत्वा दक्षिणेकटिभागेबध्नीयात् अपराकेंद्रहणांतातथा:

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. क. शिशोरा क्षुरणं प्रोक्तं बालस्याचमनं स्मृतं रजस्वलादिसंस्पर्शे स्नानमेव कुमारके प्राक्चूडाकरणाद्बालः प्रागन्नप्राशना
३३ च्छिशुः कुमारस्ततो ज्ञेयो यावन्मौंजीनिबध्यते बालस्य पंचमाद्वर्षादूर्ध्वं शौचमादिशेदित्यादि मत्कृतनिर्णयसिंधौ ज्ञेयं
अथ विवाहः तत्र सापिंड्यं शूद्राणां द्विजवदेव सर्वत्रानुवृत्तेः सद्भावादिहिंसानेश्वरः तच्च मया निर्णयसिंधावुक्तमिति नात्रो
च्यते तत्र ब्राह्मार्षदैवप्राजापत्यगांधर्वासुरराक्षसपैशाचाष्टौ विवाहा नाह ततः आह याज्ञवल्क्यः ब्राह्मो विवाह आहूय
दीयते शक्त्यलंकृतः यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वय इत्युक्त्वा चरतां धर्मं सह सा दीयतेऽर्थिने स कायः पावयेत्तज्जः
षट् षड्वंश्यान्सहात्मना आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः राक्षसो युद्धहरणात्पैशाचः कन्यकाछलादिति एषु शू
द्राणां प्राजापत्यो मुख्यः आसुरगांधर्वो मध्यमौ राक्षसपैशाचकौ कनिष्ठौ तदाह मनुः आसुरः शूद्रवैश्ययोः षडानुपूर्व्या
विप्रस्य क्षत्रस्य चतुरो वरान् विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसात् चतुरः आसुरगांधर्वराक्षसपैशाचान् तान्चतु राम
रो राक्षसवर्जान् कल्पतरौ ब्राह्मणविवाहमुक्त्वा ब्राह्मणानां सतामेष धर्म इत्युक्ते ब्राह्मदैवौ विप्रस्यैव अन्येत्र यागांतु ३३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

ल्याः हेमाद्रौपरिगणिताः राक्षसो वैश्यश्च पैशाचः शूद्रस्य सर्वेषामार्षः प्रमाणं प्रचेताः पैशाचो संस्कृतप्रसूतानां प्रतिलोमजानां चेति
विज्ञायामेधातिथौ कल्पतरौ च ज्ञेयः तत्र गांधर्वराक्षसपैशाचान् विना सर्वत्रोदकपूर्वं दानं यतः वसिष्ठः नोदकेन न वाचा च कन्यायाः
पतिर्हृयते पाणिग्रहणसंस्कारात्पतित्वं च सप्तमे पदे गांधर्वादिषु पि हेमाद्रिका यमः गांधर्वासुरपैशाचाविवाहा राक्षसश्च यः पूर्वंप
रिग्रहस्तेषु पश्चाद्धोमो विधीयते इत्यपरार्कवसिष्ठोक्तेः अत एव होमाद्यभावेन संप्रदानमाह तत्रैव वसिष्ठबौधायनौ बलादपहृता क
न्या मंत्रैर्यदि न संस्कृता अन्यस्मै विधिवद्देया यथा कन्या तथैव सा शूद्राणाममंत्र एव मनुरपि पाणिग्रहणिका मंत्रा नियतं दारलक्षणं
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे तत्र पाणिग्रहणं सर्ववर्णसमं परियात्यः सवर्णास्वित्यविशेषेण याज्ञवल्क्योक्तेः उदक
पूर्वं कन्यादानस्य शूद्रे विकल्पः तदुक्तं स्मृतिकौमुद्यां ब्राह्मे युक्तं तु पाणिग्रहणं सर्ववर्णेषु सर्वशः जलपूर्वं तु विप्राणामन्येषाम
पि कार्यते अन्यत्वेनेन ब्राह्मणोपि भवति अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाह इत्याश्वलायनेन ब्राह्मे एव जलपूर्वो
क्तेः अन्यविशेषा निर्णयासंधौज्ञेयः स्मृतिकौमुद्यां ब्राह्मे इष्टिं वैनायकीं कृत्वा शचीयागं च शोभनं नांदीमुखेभ्यः श्राद्धं च पितृभ्यः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू·क·
२४

कार्यसिद्धये वाराहसंहितायां गृहेस्थितां वै पुरुहूतपत्नीं प्रागध्यसंध्यासमयेषु कन्या सा गंधधूपैः प्रतिपूजयेत्तु पाणिग्रहे यास्समुपा
गतेति अथप्रयोगः शूद्रस्य शूद्रापरिणयने मंत्ररहितं किंपामात्रं कार्यमिति हरिहरभाष्येडके तेन कातीपं कर्मोच्यते तत्र विवाहो
क्ते मुहूर्ते कन्यायाः पिता भ्राताऽन्यो वा बंधुर्वरगृहं कृत्वा आचम्य देशकालौ संकीर्त्य करिष्यमाणविवाहांगत्वेन वाग्दानं करिष्ये इति सं
कल्प्य गणेशं वरुणं च संपूज्य वरस्य पादप्रक्षालनगंधवस्त्राद्यैः पूजां कृत्वा पूगीफलनारिकेलकुंकुमादिरंजितवस्त्रं चादाय अमुक
प्रपौत्राय अमुकपौत्राय अमुकपुत्राय अमुकदासाय वराय अमुकप्रपौत्रीं अमुकपौत्रीं अमुकपुत्रीं अमुकनाम्नीं कन्यां ज्योतिर्विदुक्तमु
हूर्ते दास्ये इत्युक्त्वा अव्यंगपतिते क्लीबे दशदोषविवर्जिते तत्कालेपत्स्यते कन्यां पिता तुभ्यं प्रदास्यतीति पिता तु अहं दास्यामि संश
यमिति वदेत् स्नातस्नाता मरागिणी वा पाठः केचित्तु कन्यागृहे गत्वा तां संपूज्य अव्यंगेऽपतितेऽक्लीबे दशदोषविवर्जिते इमां
कन्यां प्रदास्यामि देवाग्निगुरुसंनिधौ इति कन्यापिता वरं बंधुहस्ते दत्वा वाचा दत्ता त्वया कन्या वरार्थं स्वीकृता मया कन्या राम
वलोकनविधौ निश्चितस्त्वं सुखी भवेत् कन्यापिता वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया वरावलोकनविधौ निश्चितः २४

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

त्वं सुस्त्रीभव इत्युक्ते न वरपिता वदित्याहुः ततः परस्परमर्चनविप्रपूजादिकार्यं ततः आचारात् हरिद्राचंदनादि विवाह
कमुहूर्ते कार्यं इति वाग्दानं ततः पूर्वादिने विवाहदिने वा प्रातः कन्यावरयोः पिताभ्यंगं कृत्वा ग्रहविनायकस्थापनादि कृत्वा
देशकालौ संकीर्त्यामुकस्य विवाहांगतया गणेशपूजापुण्याहवाचनमातृकापूजावसोर्धाराचीर्णपूजानांदीश्राद्धानि करिष्ये इत्यु
क्त्वा तानि पूर्ववत्कृत्वा तंडुलपूर्णकुंभद्वयं विधाय वंशपात्रे शाखा स्कंदनंदिनी नलिनी मैत्रा उमा पशुवर्धनी शस्त्रे भगवतीं चेन
त्संनिधाप संस्थाप्य चतुर्थदिने मंडपदेवताः पूजयेत् पितासूत्रेण कंकणं बध्नाति कन्यायाः सप्तभिः पंचभिर्वा करैर्मितां पं
चसमगोपानां वेदीं कुर्यात् चतुर्हस्ता वेदीति हरिहरः वरस्य सीमंतपूजां कृत्वा गृहागतं वरं समानेनोपवेशयेत् ततः आच
र्यो वेद्यां हस्तमात्रस्थंडिलं दर्भैः परिसमूह्य गोमयेनोपलिप्य यज्ञिककाष्ठेन प्रागग्राः तिस्रो रेखाः कृत्वा लिखित्वैव मुद्ध
त्याभ्युक्ष्याग्निं प्रतिष्ठाप्योदङ्मुखः मधुपर्कपूजां कुर्यात् यथा कन्यापिता आसनं दत्वा तस्य पश्चात्तिष्ठन् वरमाह साधु
भवानास्तामर्चयिष्यामो भवंतमिति अर्चयिष्येति वरः ततः विष्टरो इत्यनेन त्रिरुक्ते दाता प्रत्यङ्मुखस्तिष्ठन प्रतिगृह्यता

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

वृ.क. मिति कूर्चं पंचविंशति कुशमयं दद्यात् तद्वरः आसनस्य पश्चात्त्रिषं तं गृहीत्वा विष्टरायनम इत्यासने कृत्वोपविशेत् ततोन्येन त्रिः पाद्य
३५ मित्युक्ते गंधदूर्वाक्षतायुतं पाद्यं दात्रा प्रतिगृह्यतामिति निवेदितं वरः आदौ सव्यं तान्ये तत्रिः पाद्यमित्युक्ते गंधदूर्वाक्षतायुत पाद्यं दात्रा
प्रतिनिवेदितं वरः आदौ सव्यं तान्ये तत्रिः पाद्यामित्युक्ते गंधदूर्वाक्षतायुत पाद्यं दात्रा प्रतिनिवेदितं वरः ततो दक्षिणमिति पादौ
प्रक्षालयेत् ततो दाता पंविष्टरमन्येन स्त्रिस्त्रिर्निवेदितमादाय वरपादोपाद्यात् ततो गंधपुष्पाक्षतकुशतिलस्कवर्णदूर्वायुत
मर्घ्यमादायान्येनार्घ त्रिरुक्ते दाता प्रतिगृह्यतामिति दद्यात् वरहस्तेमर्ष्योन म इत्यंजलिना दाय शिरसाभिवाद्य भूमौ क्षिपेत्
ततोन्येनाचमनीयमिति त्रिरुक्त्वा दत्तं प्रतिगृह्य मत्स्केत प्राश्याचमेत् ततोन्येन मधुपर्क इत्युक्ते दात्रा दत्तं कांस्यपात्रस्थं तेने
वापिहितं दधिमधुघृतं वावरो दातृहस्तस्थमुद्घाटयस वित्रेन म इत्यावेक्ष्य सावित्र्येन म इति प्रतिगृह्य वामे विधाय मधुपर्का
यन म इति नामिकयाऽनुनामिकांगुष्ठाभ्यां बहिः क्षिप्त्वा पुनरेव बहिः कृत्वा ताभ्यामेव त्रिः प्राश्नीयात् मधुपर्कायन म इतिवा राम
अंगुष्ठानामिकाभ्यां द्वितीयमंगुष्ठमध्यमाभ्यां तृतीयमिति स्मृतिकौमुदीयं तच्चिंत्यं ततः शेषमसंचरे निनीय द्विराचम्य पु ३५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नराचम्य वाचे नमः मुखे प्राणाय नमः नस्तोः चक्षुर्भ्यां चक्षुषोः श्रोत्रभ्यां कर्णयोः बलायेति बाह्वोः दित्येस्वस्त्रे वनज सइस्
र्वोः अंगेभ्य इत्यंगेषु ततोन्येन त्रिः गोरिस्फके प्रतिगत्य रुद्राणां मात्रे वसूनां दुहित्रे आदित्यस्वस्त्रे गवे नमः ममाकीकस्यच
पश्चात्कु तदस्क पांसु उत्सृजेत्ये तत्तृणान्यंतु इत्यक्षौर्वसृजेत् ततो दाता वस्त्रालंकारगंधस्रगाद्यैर्वरं संपूजयेत् ततः स्फलग्ने
तः पटं धृत्वा मुखं निरीक्षयेत् अन्ये तु लग्नसमये पाणिग्रहणमिच्छंति ततोंतः पटमपसार्य वरो वधूमुखमीक्षेत अत्र चाग्निप्र
तिष्ठाप्य पश्चादग्नेस्तमूलं कस्यां निधाय कन्यापितृदत्तवस्त्रचतुष्टयमध्ये द्वे आयुष्मतीदं वासः परिधत्स्वेति आदत्याद्दद्यात्
सा च वाससेन इत्यादिना परिदध्यात् ततो दाता वधूमीक्षस्वेति प्रेषितो वधूमीक्षेते ततः कन्यादानमिति हरिहरः अन्येषु तु कन्या
दानोत्तरं वस्त्रापाकुः ततः करोतु स्वस्ति ने ब्रह्मेत्याद्यैरक्षतारोपणांते कन्यापितोदङ्मुखः स्वदक्षिणे पत्नीमुपवेश्य कुशपाणिः आच
म्य प्राणानायम्य देशकालौ संकीर्त्य यजमानः मम समस्तपितृणां निरतिशयसानंदब्रह्मलोकावाप्त्यादि कन्यादानकल्पोक्तफला
वाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणे संतत्या ब्राह्मणपक्षे द्वादशावरान् द्वादशपरान् प्राजापत्यपक्षे ष्टावरानष्टौप

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु॰ क॰ ३६

गनपुरुषानपवित्रीकर्तुमात्मनश्चलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना प्राजापत्यविधिना वालंकृतकन्यादान
हं करिष्ये इत्युक्त्वा पठेत् कन्याकनकसंपन्नां कनकाभरणैर्युतां दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया विश्वंभरः
सर्वभूताः साक्षिण्यः सर्वदेवताः इमां कन्यां प्रदास्यामि पितॄणां तारणाय चेति ततः कांस्यपात्रे वरहस्तोपरि वधूहस्ते स्वहस्तं न्य
स्य वरहस्ते स्वप्रोक्षितमस्तु शिवआपः संतु सौमनस्यमस्तु इत्युक्त्वा कन्यातारतायतु पुण्यं वर्द्धतां शांतिः पुष्टिः तुष्टिः श्चास्तु
तिथिकरणमुहूर्तनक्षत्रसंपदस्तु पुण्याहं भवंतो ब्रुवंतु पुण्याहमिति त्रिर्विप्राः स्वस्ति भवंतो ब्रुवंतु ऋधिं भवंतो ब्रुवंतु
श्रीरस्तु भवंतो॰ अमुकदासोऽहं ममसमस्तपितॄणामित्यादि॰ लक्ष्मीनारायणप्रीतये इत्यंतं प्रागुक्त्वा काश्यपगोत्रस्य ब्र
ह्मदासस्य प्रपौत्राय विष्णुदासस्य पौत्राय शिवदासस्य पुत्राय काश्यपगोत्राय देवदत्तदासाय वराय काश्यपगोत्रां चैत्रदास राम
स्य प्रपौत्रीं मैत्रादासस्य पौत्रीं भोजदासस्य मम पुत्रीं अमुकप्रेष्यांनाम्नीं इमां कन्यां प्रजापतिदैवत्यां यथाशक्त्यालंकृतामित्युक्त्वा ३६

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पुनरेवं त्रिरुच्चार्य ज्ञातश्च ज्योतिष्टोमातिरात्रफलप्राप्तिकामः प्रजोत्पादनार्थं स्वधर्माचरणार्थं प्राजापत्येसहधर्मं चरंतं भार्यां
त्वेन तुभ्यमहं संप्रददे इति कुशाग्रयवयुतं सोवर्णजलयुक्तं कन्याहस्तं च वरहस्ते क्षिपेत् मयापिदत्तेपि वदेदिति केचित् गोत्रोच्चारणं
नेति केचित् वरः प्रतिगृह्णामि स्वस्तीत्युक्त्वा भुवं स्पृशेत् गौरीकन्यामिमां भो त्वं यथाशक्तिविभूषितां गोत्राय ब्रह्मणे पत्न्ये तुभ्यं
दत्ता समाश्रया कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः कन्ये मे पृष्ठतो भूयास्त्वद्दानात्स्वर्गमाप्नुयात् मम वंशकुले जाता पालिता
वत्सराष्टकं तुभ्यं दास मया दत्ता पुत्रपौत्रप्रवर्द्धिनीति पठेत् ततः कन्यादानप्रतिष्ठार्थमिदं सवर्णं गोमिथुनं च दासीं संप्रददे इति
दद्यात् कन्यावांधवाश्च यौतकं दद्युः वरतत्पित्रादयोपि दद्युरिति केचित् होमांते केचिदाहुः ततश्चतुर्वारं पंचवारं वा वधूवरोस्त
त्रेणावेष्टापरितनमधोमार्गेणांधस्तनं चोपरि इति कार्पासत्रिगुणं पीतं च कृत्वा धस्तनं वरहस्तेउपरितनेन च वधूहस्तेउपरितनं च
धूहस्ते कंकणं बध्नीयात् येन बद्धो बलीराजा दानवेंद्रो महाबलः तेन त्वामपि बध्नामि रक्षे माचल माचलेति ततः वधूवराभ्यां दु
ग्धा दूर्वा क्षतारोपणं बध्वा दौतं जोवरेण च कार्यं मंत्रास्तु भगायनमः यज्ञायनमः श्रियै नमः धर्मायनमः प्रजायै नमः यशसे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु॰ क॰
३७

नमः इति ततः प्राङ्मुखामुपवेश्य वस्त्रे कन्यायै दद्यात् साच वासोभ्यां नमः इति परिदध्यात् ततो वरो मांगल्यतंतुनानेन मंत्रेण जी
वनहेतुना कंठं बध्नामि सुभगे सा जीव शरदः शतमिति सौभाग्यकुंकुममणितंतु बधूगले बध्नीयात् ततो विश्वेदेवा पुमांतरिक्षश्च
धात्भ्यां नम इति वधूमीक्षेत् अत्रवाकोशुभसूत्रेण कंकणं ततो प्राक्स्वोतेजनी विरणकटे पश्चादग्नेरुपविश्य दक्षिणतो ऐशा
न्यां वामंग कुंभं स्कंधो गृहीला कश्चित्तिष्ठेदासमर्पदं उत्तरतो दृषदुपले चालंकृते अभिधापात्र वरः कन्याना वेमं देत्याचारः ततो
परस्परं समीक्षितव्यमित्युक्तो अन्योन्यं समीक्ष्य आरोढुं चक्षुरपिति धीश्रियावा च स्कमनास्तथा सुवर्चाः पुत्रस्तुदैवकामाच सु
खदाभर्वेरोवदेत् सोमगंधर्वाग्निपूषाभ्यो नम इति च सूद्राणां गृह्यसूत्राद्याध्ययनाभावीन्न तद्दुक्तं होमांगल्य यज्ञानाभावात्तु पुंसि राम
शक्याभावात् विवाहे होम एव नास्तीति मदनपालः अन्ये तु प्रधानेधिकारसिद्धौ स्थपतीष्टिवदंगेपि श्रावणोपदेशादिनाज्ञानसंभ ३७
वात् होममाहुः यथा गुरु दक्षिणे ब्रह्मासनं दत्वा तमुपवेश्य मृन्मये पात्रे जलपूर्णं कुशान्निधायोत्तरतः कुशेषु निधायाग्निं दर्भैः
पूर्वादि परिस्तीर्यासादनं कुर्यात् त्रीणि तृणानि द्वे पवित्रे प्रोक्षणी आज्यस्थाली चरुस्थाली संमार्गकुशाः उपयमनकुशास्तिस्रः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

समिधः स्रुवआज्यं तंडुलाः लाजाः शूर्पसंस्रवपात्रंअश्म्याआनडुहंचर्मगोरीसणोति ततः प्रादेशमात्रे पवित्रे छित्वा प्रोक्षणीः संस्कृ
त्यपवित्राभ्यामुत्पूयतत्रतेनिधायाज्यस्थाल्यानिरुप्याग्नेर्दक्षिणेधिश्रित्यौल्मुकेनलाजैः सहपर्यग्निं कृत्वास्रुवं प्रताप्य कुशैः संमृज्या
प्रोक्षणीभिः प्रोक्ष्य पुनः प्रताप्य दक्षिणे निधायाज्यमुद्वास्योत्पूयावेक्ष्य शूकं निरस्य पुनः प्रोक्षणीरुत्पूयावेक्ष्योपयमनकुशानादायोत्था
याग्नौ तिस्रः समिधोभ्याधाय प्रोक्षणीभिः पर्युक्ष्य वरेणान्वारब्धो गुरुदीक्षिणं जान्वास्य विष्णुनाद दक्षिणहस्तेनान्वारब्धः स्रुवेणाज्यं जुहुयात्
प्रजापतयेनमः इंद्रायनमः इत्याघारौ होयं प्रजापतयेनममेत्यादि वरः सर्वत्र त्यागं कुर्यात् अग्नयेनमः सोमायनमः इत्याज्यभागौ
अग्नयेनमः वायवेनमः सूर्यायनमः अग्निवरुणाभ्यांनमः अग्नयेनमः वरुणायनमः सवित्रेनमः विष्णवेनमः विश्वेभ्योदेवेभ्यो॰
मरुत्सर्वेभ्यो॰ वरुणाय॰ आदित्याय॰ अदितये॰ प्रजापतये॰ इतिनमोंतः ततस्त्रिरग्नयेचमज्यवेचजुहुयान्नवातः ततः कन्यान
तांबुपस्तीर्य दध्वाभ्यातातत्स्थानो वान्यः शमीपालाशमिश्रलाजान् सूर्पादंजलिनादृक्षिपति तं तोभिघार्य तिष्ठंती अग्नयेनमइतिजुहु
यात् मंत्रोवरस्यवततोवरोवधुः दक्षिणेहस्तं सांगुष्ठमुत्तानमुत्क्वानेनहस्तेनगृह्णीयात् तत्रमंत्रः भगायनमः सवितृभ्योनमः वि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

न्तसौम्यगुणोपेतौ युक्ताविरमूर्तिर्वरूर्भव कुलेमदीयेसम्प्रधिमज्जतानुगताःसदेत ततोगृहीतीमेव वधूमुत्तरतोग्नेर्दक्षिणेनयदाश्मानमारोहयति
कन्यायेनमइति ततःसरस्वत्यैनमइति ततःगाथांगायति ततोग्नयेनमइत्यग्निंपरिक्रम्य पुनर्द्विर्लाजादिपरिक्रमांतेकृत्वा चतुर्थेशूर्पपुटे
नवधूभ्रातासर्वलाजान्कन्यांजलावावपति ततोभगायनमइतितिष्ठंति जुहोति ततोग्निंचतुर्थेपरिक्रम्योपविश्य ब्रह्माचाराद्याप्रजाप
तयेनमइतिहुत्वोत्तरतः उदकसंस्थान्सप्तपुंजान्तंदुलंकृत्वा सप्तपदिंपूजयेत वधूर्विष्णवेनमइति दक्षिणेनपदा वरःसप्तपदानिक्र
मयति इषेनमःएकपदीभव वैष्णवेनमःद्विपदि० ऊर्जेनमःत्रिपदी० रायस्पोषायनमःचतुर्थपदी० मायोभव्यायनमः पंचपदी० प्र
जाभ्यंनमःषट्पदी० ऋतुभ्योनमःसखासप्तपदीभ्योनमः इत्येतैरितिवदेत तत्सप्तमेपदेवरोवधूर्द्वयोःशिरसिसन्निधाय पूर्वकुंभो
दकेनवरआश्रेयनूनवैरभिषिंचेत वरेणसूर्यमुदीक्षस्वेत्युक्त्वासूर्यायनमइतिसूर्यंपश्येत ममव्रतेचित्तवाग्भ्योनमइति वधूद
क्षिणांसोपरिहस्तंनीत्वाहृदयमालभ्यउत्तरतींवधूमुपवेश्य वध्वेनमः इत्यभिमंत्र्यतस्योःशिरसीमंतेसींदूरंदत्वान्योवरोवावधूमु
त्थाप्यगोश्वपुरुषेभ्योनमइत्यानडुहेरक्तचर्मणिवधूमुपवेश्याग्नयेस्विष्टकृतेनमइतिहुत्वा संस्रावप्राशनंप्रणीतानांपवित्राभ्यांमा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

र्जनं तयोरग्नौः क्षेपः आचार्याय तो गोदानं प्रणीताविमोकः ब्रह्मणे पूर्णपात्रं विप्रेभ्यो आमान्नं संकल्पः दिने विवाहे रात्रौ ध्रुवमुदीक्ष
स्वेति वरप्रेषिता वधूः ध्रुवाय नमः इति प्रार्थयेत् ततो दृढ दशरात्रं षड्रात्रं वा क्षारालवणाशिनो ब्रह्मचारिणावलंकुर्वीणा वधः शायि
नौ दंपती स्यातां तैलाक्षतवंदनादि यथाचारं कुर्यात् चतुर्थ्यामपरधात्रे पंचभूः संस्कारान्कृत्वा विवाहाग्निं संस्थाप्य ब्रह्मोपवेशनादि
समिधानांतं प्राग्वत्कुर्यात् तत्राज्यं निरुप्य स्थाल्यां तूष्णीं चतुर्निरुप्य तथैव प्रोक्ष्य त्रिः प्रक्षाल्याग्नौ श्रपयित्वा समिधोभ्याधायाग्निं प
र्युक्ष्या॰ घाराज्यंभागांते नवैव प्रायश्चिताय नमः एवंवायवे नमः सूर्याय॰ चंद्राय नमः गंधर्वाय॰ नवाहुत्यंते प्रजापतये नम इति चरुहु
त्वा दर्कुभात संस्रवानादाय अग्निवायुसूर्यचंद्रनक्षत्रगंधर्वप्रजापतिभ्यो नम इति वधूशिरसि दत्वा मम व्रतानुसारिणी भवेत्फक्को
नरतोग्नेश्च बरूश्च ध्वं प्राणेभ्यो नमः अस्थिभ्यो नमः मांसेभ्यो नमः त्वचेभ्यो नम इति वधूः प्राशयित्वा तामाचम्य अंजलिनाग्नयेस्वि
ष्टकृते नम इति हुत्वा अन्यादि प्राजापत्यंतां नवाहुतयः प्राशनार्थं भिन्नपात्रे संस्रवाः संस्रवप्राशनं मार्जनं एवं प्रतिपति गुरवे दक्षिणा ब्र
ह्मणे पूर्णपात्रं आमान्यदानं चेति स्मृतिकौमुद्यां तु शूद्रस्य कोपि होमो नेत्फक्कं तन्न सामर्थ्यापि हि तेनैकांगत्वा मंत्राहुतिश्च तैरित्यस्पष्टम् ।

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु.कं. ३९ द्रव्यविशेषात् ततो वरस्य तत्पक्षीयाणां पूजनं वरमात्रं वंशपात्रदानं च कार्यं कन्यापित्रेति केचित् षोडशान्नपूर्णपूर्युतं वंशपा
त्रं उमामहेश्वरौ संपूज्य प्रार्थयेत् हे गिरिजे त्वं उमादेवी महेशो गिरिजापतिः अतस्त्वां पूजयिष्यामि हे गिरिजे सर्वकामदा सुमुखा
न्नमवीर्यां च पूर्णं षोडशाभिर्युतां वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये इत्युक्त्वा कृतस्य कन्यादानस्य संपूर्णफलप्राप्त्यर्थं इदं
वंशपात्रं वरमात्रे संप्रददे न मम इत्युक्त्वा पठेत् वंशो वंशकरः श्रेष्ठो वंशो वंशाभिवर्द्धनः अनेन वंशदानेन तुष्टो वृद्धिकरो तु मे
वंशपात्रमिदं पुण्यं वंशजातसमुद्भवं दानानामुत्तमं दानमतः शांतिं प्रयच्छ मे वंशपात्राणि सर्वाणि मया संपादितानि वै उमाकां
ताय दत्तानि मम गोत्राय वृद्धये वंशवृद्धिकरं दानं सौभाग्यादिसमन्वितं वस्त्रेणाच्छादितं पूगीफलहेमसमन्वितं सर्वपापक्ष
यकरं नानारत्नैश्च पूरितं दानानामुत्तमं दानमतः शांतिं प्रयच्छ मे इति एवं न केचिन्न कुर्वंति ततः कन्यापिता अष्टवर्षा
त्वियं कन्या पुत्रवत्पालिता मया इदानीं तव मया तुभ्यं दत्ता स्नेहेन पाल्यतां इति अंके वधूमुपवेशयेत् ततो वरो यानेन वध्वा राम
सह गृहं गत्वा तत्र स्थियं संपूज्य स्थापितदेवतमातृणां मंडपदेवतानां च उत्तरपूजां कृत्वा स्त्रज्य वस्त्रग्रंथिकंकणविमोचं कृत्वा ३९

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

विप्रान् पूजयेत् वध्वा गृहप्रवेशो मंडपोद्वासनकालेन्यश्च विशेषो मां कृते निर्णयसिंधौ ज्ञेयः एतत्संस्काराः सच्छूद्राणां ए
वं वक्ष्यमाणमाह्निकाद्यपि तेषां नियतं असच्छूद्राणां विवाहमात्रं ॥ ॥ इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टसूनुक
मलाकरभट्टकृते शूद्रधर्मतत्वे शूद्रसंस्काराः ॥ ॥ अथ शूद्रस्याह्निकमुच्यते तत्र विष्णुः ब्राह्मे मुहूर्ते चोत्थायेति विष्णुधर्मे शय
नादुत्थितो यस्तु कीर्तयेन्मधुसूदनं कीर्तनात्तस्य पापानि नाशमायांत्यशेषतः तत्राचम्य मातृपितरौ गुर्वादि इष्टदेवं च नत्वा
प्रातः स्मरामि भवभीतिमहार्तिशांत्यै नारायणं गरुडवाहनमंबुजाक्षं ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजप
त्रनेत्रं १ प्रातर्नमामि वचसा मनसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः नारायणस्य नरकार्णवतारणस्य पारायणप्रव
णविप्रपरायणस्य २ प्रातर्भजामि भजतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघो
रशोकप्रणाशनकरो धृतशंखचक्रः ३ श्लोकत्रयमिदं पुण्यं प्रातः प्रातस्तु यः पठेत् श्लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः
प्रातः स्मरामि शिवमेकमनेकमाद्यमित्यादि पाठानां पठित्वा पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिर पुण्यश्लोका च वैदेही

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मृ.क.
४०

पुण्यश्लोको जनार्दन इत्युक्त्वा भूमिं नमस्कृत्य अंतर्धाय तृणै भूमिं शिरः प्रावृत्य वाससा वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जि
तः कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इत्यंगिरसोक्तविधिना दिवासंध्यासु नकर्णस्थब्रह्मसूत्र उदङ्मुखः कुर्यान्मूत्रपुरीषे तु
रात्रौ च दक्षिणामुखः ग्रामात्पदशतं गच्छेन्नगराच्च चतुर्गुणं इति याज्ञवल्क्यपराशराद्युक्ते देशे मूत्रपुरीषे कृत्वा अपलेष्यव
तीए मूत्रकाश्चलोष्टतृणादिनेति भरद्वाजोक्ते लोष्टादिना वामेन गुदं प्रमृज्य गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृताभिर्जलैः गंधले
पक्षयकरं शौचं कुर्यादतंद्रितः इति याज्ञवल्क्योक्तेः शौचं कुर्यात् तत्र मूत्रे शातातपः एकरशलिंग करे सव्येति तिस्रो द्वे हस्तयो
द्वयोः मूत्रे शौचं समाख्यातं शुक्के तद्द्विगुणं भवेत् पुरीषे तु दशाधा यमो द्वे लिंगे मृत्तिके देये गुदे पंच करे दश उभयोः सप्त दातव्या
मृदः शौचोपपादकाः शंखः मेहने मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश एको वा मःति
स्त्रस्त मृत्तिकोदपाः कर्तुर्वै न स्वशौधनं तिस्रस्तु पदयोर्ज्ञेयाः शौचकामस्य सर्वदा विष्णुपुराणे एका लिंगे गुदे तिस्रो दश राम
वामकरे तथा उभयोः सप्त दातव्या मृदः शौचोपपादिका अत्र लेपन्यूनाधिकभावाभ्यां स्पृहयेत्यादि परंतया चायं वस्था मू ४०

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

त्रिभस्त्यरिमाणमाह दक्षः लिंगे तु मृत्समाख्याता त्रिपर्वपूर्यते यया गुदे तु मनुः अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता द्वितीया च तृतीया च
तदर्धार्धा प्रकीर्तिता आदिपुराणे स्त्रीशूद्रयोरर्धमानं शौचं प्रोक्तं मनीषिभिः उक्तं शौचं न गृधानपगमे तु देवलः यावत्सास्थिता भवति मन्येन तावच्छौ
चविधीयते दक्षः यद्दिवा विहितं शौचं तदर्धं च निशि स्मृतं तदर्धं मातुरे प्रोक्तं मातुरस्यार्धं वृद्धपराशरः उपविश्य तु विण्मूत्रं कर्तुं शक्तिं न विंदति
स कुर्यादर्धशौचं तु स्पर्शोत्स्यस्य सर्वदा बालस्यानुपनीतस्य गंधलेपक्षयावहं शूद्रविवाहात्यागे वा विवाहाभावे तु द्वादशवर्षोर्ध्वं षोडशवर्षोर्ध्वं
तास्सर्वे धर्मा नियताः न प्राप्ताः एतच्च वक्ष्यामः भोजने गुदस्रवेः बृहस्पतिः भुंजानस्य तु विप्रस्य कदाचित्प्रस्रवेद्गुदं पूर्वं कृत्वा तु शौचं तु ततः प
श्चादुपस्पृशेत ततः कृत्वोपवासं च पंचगव्येन शुध्यति हस्तौ प्रक्षाल्य शौचं कृत्वा गंडूषोनरमुपवसेदित्यर्थः विप्रस्योपलक्षणं ॥ ॥ इति
कमलाकरभट्टकृते शूद्रधर्मतत्वे शौचविधिः अथाचमनं शुचौ देशे प्राङ्मुख उदङ्मुखो वोपविश्य तर्जन्यनुकरं गोकर्णाकृतिं कृत्वा तालुगाभिः
शुद्धाभिः रफेनाभिरद्भिः सकृदाचामेत त्रिर्वैतिस्मृति कौमुद्यां ओष्ठमात्रं स्पृशेदिति गोडाः ततो गुष्ठमूलेनो ओष्ठौ हृन्मृज्य अंगुष्ठतर्जनीभ्यां ना
सिकं गुष्ठमध्यमाभ्यां चक्षुषी अंगुष्ठानामिकाभ्यां श्रोत्रे अंगुष्ठकनिष्ठिकाभ्यां नाभिं पाणितलेन हृदयं सर्वैः शिरो शौच स्पृशेत् अथ दंतधा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मू.कं. ४३ वनं ततोदुंबरापामार्गफनसकदंबाम्रेनातीबिल्वप्रियंगुमयं कंटकिक्षीरवृक्षोत्संद्वादशांगुलकं विप्रेकेष्टमाहुर्मनीषिणः क्षत्रविट्शूद्र
जातीनां नवषट्चतुरंगुलमिति मदनपारिजाते विष्णुः अन्यच्च अर्कः कांतिवटो दीप्तिकरं जोवीर्यवर्धनं अपामार्गो धृतिर्मेधाप्रज्ञा औदुं
बरस्तथा दाडिमैः ककुभैः श्याहं कुंजरस्याभिधीयते मुद्गीधात्री तथाजं त्रीबदरीमधुरध्वनी एतानि नवकाष्ठानी दंतधानकारयेत् इति
कनिष्ठिकाग्रस्थूलं पर्वार्धकृतकूर्चंदंतधावनं काष्ठं प्रक्षाल्य आयुर्बलं यशोवर्चः प्रजापशुवसूनिच ब्रह्मप्रज्ञांच मेधांच त्वंनोधेहि व
नस्पते इतिमंत्रेण सर्वदंतान् संशोध्य प्राङ्मुखोउदङ्मुखोवा तत्प्रक्षालितभक्त्वा शुचिदेशेन्यस्य तादृशेव जिह्वालेखनीकया जिह्वां संशो
ध्य प्राच्यामुदीच्यांच त्यक्त्वा षोडशद्वादशवारं गंडूषान्कुर्यात् एतत्प्रतिपन्नवमी षष्ठ्य पौर्णमासी चतुर्दश्यष्टमी संक्रमणश्राद्धवत्सरादि
नेषु नकार्यं द्वादशगंडूषाः ततः केशप्रसारनं कृत्वा स्नायात् छंदोगपरिशिष्टे यथाहर्तितथा प्रातर्नित्यंस्नायादनातुरः दंतान्प्रक्षाल्य नद्या
दौ गृहेचेत्रद मंत्रवः स्मृतिकौमुद्यां योगियाज्ञवल्क्यः मृत्तिलान्येसव्य वर्तान्पुष्पाणि सुरभीणिच आहरेत्स्नानकाले तु स्नानार्थं प्रयतः राम
शुचिः गत्वोदकांतं प्रक्षाल्यं संस्थाप्यतत् एवं शाक्षितो त्रिधा कृत्वा मृदं तीं तु गोमयं चाविचक्षणाः अधमोत्तम मध्यानामंगानां क्षालनां तु वै ४३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भागैः पृथक्पृथक्कुर्यात्स्नानेमृदसंकरः अद्भिर्मृद्भिश्च चरणौ प्रक्षाल्याचम्य वै शुचिः अद्भिर्मृद्भिश्च गात्राणि क्रमशास्तत्र नेजपे
त् एकधा च शिरोवास्तिद्वाभ्यां नाभेस्तथापरि नाभिस्सूरुजंघे च चरणौ च त्रिभिस्त्रिभिः प्रक्षाल्य हस्तौ चाचम्य नमस्कृत्य जलं तु तन् यत
क्रियेदं तु मंत्रेण नमस्येत्प्रयतां जलद्विजानां स्मार्त विधिना स्नानमुक्ताह ब्रह्मन्स विशालेवं मंत्रंवत्स्नानमिष्यते तूष्णीमेव तु शूद्रास्य सन
मस्कारकं मतं तेन शूद्राणां कातियएव मंत्रः स्नानविधिः मैथिलश्रीवतेन तु पाद्मोक्तं स्नानं सर्ववर्णसाधारणमुक्तं यथा अनुध्दतैर
ध्दतैर्वा जलैः स्नानं समाचरेत् तीर्थं प्रकल्पयो द्विद्वान्मूलमंत्रेण मंत्रवित् नमो नारायणायेति मूलमंत्रः प्रकीर्तितः दर्भपाणिस्तु विना
त्याचांतः प्रविश्य यतः शुचिः चतुर्हस्तसमायुक्तं चतुरस्रं समंततः प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः विष्णोः पादप्रसूतासि
वैष्णवी विष्णुपूजिता पाहि नस्त्वेनसस्तस्मादाजन्ममरणांतिकात् तिस्रः कोट्योर्धकोटी च तीर्थानां मनुरब्रवीत् दिवि भुव्यंतरिक्षे च
तानि ते संति जाह्नवी नंदिनीत्येव ते नाम देवेषु नलिनीति च वृंदा पृथ्वी च सुभगा विश्वकाया शिवा सिता विद्याधरी सुप्रसन्ना तथा लो
कप्रसादिनी क्षेम्या च जान्हवी चैव शांता शांतिप्रदायिनी एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् भवेत्सन्निहिता तत्र गंगा त्रिपथ

शू॰कृ॰ ४२

गामिनी विप्रेणचायंपठनीयः सप्तवाराभिजप्तेन कारसंपुटयोजितं प्रागुक्तमूलमंत्रेणेत्यर्थः मूर्ध्निकुर्यात्जलंभूयास्त्रिचतुःपंच
सप्तचास्नानंकुर्यान्मृदायश्चादामंत्र्यचविधानतः अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे शिरसा धारयिष्यामि रक्षस्वं मांपदेपदे
मृत्तिके हन मे पापंयन्मयादुष्कृतंकृतं उद्धृतासि वराहेण कृष्णेन शतबाहुना नमस्ते सर्वलोकानामघवारिणिस्कृते इतिएतत
सकववचनेशूद्रस्वरिशिष्याक्तेरत्रतदभावात्पौराणमंत्रपाठेशूद्रस्यावाचिकाराच्चचिंत्यं तत्वेपिसर्वेषांपूर्वोक्तेवास्यमुचरद्
त्तितत्वं नृसिंहपुराणे नद्यांस्त्रवत्सुचस्नायात्प्रतिस्रोतःस्थितोद्विजः तडागादिषुतोयेषुप्रत्यकैस्नानमाचरेत कातीयानां
नद्यामपिस्तर्यमुखस्यस्नानं तत्रैव ब्रह्मांडपुराणे ऊर्ध्वपुंड्रंद्विजकुर्यात्क्षत्रियस्तुत्रिपुंड्रकं अर्धचंद्रंतुवैश्यस्यवर्तुलं
शूद्रजातिषु इत्युक्तं ललाटशिरःकंठबाहुहृदयनाभिपृष्ठपार्श्वद्वयेषुटिलकंकृत्वा कुशासनोपविष्टः नमोजयइति
त्रिर्जपेत. अथतर्पणंव्यासः एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः अर्हंतिपितरस्त्रींस्त्रींस्त्रियस्त्वेकैकमंजलिं मा
मातृवर्गेजलित्रयमेकैकंवा विष्णुपुराणेतु त्रिपरः त्रीणानादर्थायदेवानामपिनिर्वपेदितिदेवत्रयउक्तः राम ४२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पात्रे देवान् ब्रह्मऋषीन् सर्वांस्तर्पयेताक्षतोदकैः तर्पयेत्पितॄन् भक्त्या सतिलोकचंदनैः शंखसौवर्णेन राजतेनौ
दुंबरेण शृंगपात्रेण शकुनाथाप्युदकं पितृतीर्थस्पर्शान् दद्यात् योगयाज्ञवल्क्यः तिलानामप्यलाभे तु सुवर्णर
जतान्वितं तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वाप्यथा तृप्यध्वमिति समुच्चार्य तृप्यतामित्यथापि वा विधिज्ञो निक्षिपेत्तोयं
देवादीनामतोपरतः सव्यं जानु ततोन्वाच्य सतिलं दक्षिणामुखः इति तेनैवोक्तेर्देवर्षयोर्दक्षिणे जानुपातः सिद्धः यमः
द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् दक्षः अग्रैस्तु तर्पयेद्देवान्
मनुष्यान् कुशमध्यतः पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमं ॥ ॥ मदनपारिजाते ॥ योगयाज्ञव(
ल्क्यः ब्रह्माणं तर्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिं देवान् छंदांसि वेदांश्च पितॄंश्चैव सनातनान् आचार्यांश्चैव
गंधर्वानाचार्यतनयांस्तथा संवत्सरं सावयवं देवीश्चाप्सरसस्तथा तथा देवानुगान्सर्वान्सागरान्पर्व

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

सं॰कृ॰ नानपि सरितोथमनुष्यांश्च पक्षान्रक्षांसि चैव हि पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा वनस्प
४३ तीनोषधीश्च भूतग्रामं चतुर्विधं विभुः ततः कृत्वा विनिवीतं तु यज्ञसूत्रमतंद्रितः प्राजापत्येन तीर्थेन म
नुष्यांस्तर्पयेत् पृथक् कार्ष्णाजिनिः सनकः सनंदनश्च तृतीयश्च सनातनः कपिलश्चासुरिश्चैव वोढुः पंचशिखस्त
था पाद्मस्यानंतरं मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं प्राचेतसं वसिष्ठं च भृगुं नारदमेव च योगयाज्ञवल्क्यः अ
पसव्यं ततः कृत्वा भूत्वा च पितृदिङ्मुखः पितॄंस्त्रिव्यानदिव्यांश्च पितृतीर्थेन तर्पयेत् दिव्या वालं तलं सोमं यममर्य
मणं तथा अग्निष्वात्ताः सोमपाश्च तथा बार्हिषदोपि च यदि स्याज्जीवपितृक एतान्विधान्तदापि हि न तर्पणे यद्य
प्यनेकप्रकाराः स्मृतिकौमुद्यां पद्मादावुक्तास्तथापि कात्यायनसूत्रसंवादात् छंदोगा वाजसनेयिन इति गौडोक्त
दक्षसंवादात्सानादौ दर्शनाद्य योगयाज्ञवल्क्योक्त एवायं प्रकारः शूद्राणामिति तत्त्वं एवं वैश्वदेवाद्यपि कातीयमेव अ राम ४३

यप्रयोगः मृद्गोमयकुशतिलपुष्पाक्षतानादाय नद्यादौ गत्वा पाणिपादौ प्रक्षाल्यानामिकाभ्यामेककुशपत्रात्मिके पवि
त्रे धृत्वा कुशोपग्रहः ऊर्ध्वकेशी विरूपाक्षि मांसशोणितभोजने तिष्ठ देवि शिखाबंधे चामुण्डे ह्यपराजिते इति कृत्वा
शिखां बध्वाचम्य देशकालौ स्मृत्वा मम सर्वपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःस्नानमहं करिष्ये तीर्थे तु साग
रस्वननिर्घोष दंडहस्तासुरांतक जगत्स्रष्ट जगन्नाथ नमामि त्वां सुरेश्वर तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम भैरवा
य नमस्तुभ्यमनुज्ञां दातुमर्हसीति संप्रार्थ्य वरुणाय नमः इति जलमालभ्य तेनैवावर्त्य नमोऽद्यो मम पापं यात्वित्यंजलिब
हिः क्षिप्त्वा मुक्तीर्थाय नमः इत्यंजलिं दत्वा मृदम्मदायकरि वस्त्र रुजं पापादकरान् त्रिर्विलिप्य प्रक्षाल्यैकजले परं स्थ
ले पादकं त्वन मः इति नत्वा चम्य विघ्नवेन मः इति सर्वांगं मृदालिप्त्वा सूर्याग्निमुखो हि स्त्रिहीदशवानि यज्ज्यां झो
नमः इत्यप्स्वज्य निमज्ज्योन्मज्ज्याचम्य तथैव रुद्राय नमः इति गोमयेनोलिप्य स्नात्वाचम्य कुशैर्मार्जयेत् वरुणा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शृ॰ कृ॰ य नमः इत्यष्टवारपरमात्मनेनमः अग्नये॰ वायवेनमः सूर्याय॰ सवित्रेनमः यमायनमः इतिमज्जाद्यांनमइद्वा
४४ विंशतिवारं यद्वाग्नयेनमइतित्रिः जातवेदसे सवित्रेविधात्यादिभ्योनमइति सवित्रेइत्येतः नाभितअनाभिदर्भैः
पावयित्वा परमात्मनेनमइतिसवित्रेनमइति तेः पुनः पात्रपित्वा नमः इतित्रिः परमात्मनेनमतिवाघमर्षणं कृत्वा स्ना
त्वाविष्णवेनमइतिस्मृत्वा ब्रह्मादिदेवास्तृप्यंतानमइतिवा देवतीर्थेनत्रिः साव्येन देवान्निवीतिः कृष्णद्वैपायनादिऋष
यस्तृप्यंतामितिद्वौद्वाविस्तृषीन पसव्येनसोमपितृमदादिपितरस्तृप्यंतामित्यंजलित्रयंत्रिर्दत्वाधौतेवाससीपरिधा
य मृद्वोरुकरौप्रक्षाल्याचम्य वेणुपत्राकारमर्धचंद्रेभ्योनमः इतिप्रत्येकंजलेपुष्पांजलिरित्याचारचूडामणिः ततः
उदितंसूर्यंरक्तचंदनाक्षतपुष्पैरलेपंमंडलेभ्यर्च्यतद्धृतमर्घ्येनमोविवस्वतेब्रह्मणोभास्वतोविष्णुतेजसे राम
नमः सवित्रेशुचयेसप्तिक्रैकर्मदायिनेइत्यर्घ्यंब्रचित्र यदद्यादितिकल्पतरौ॥ ॥ततःसूर्यमंडलस्थ ४४

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

यपरमात्मने नमः इति पुनरर्घ्यं दत्वा ब्रह्मविष्णुरुद्रेभ्यो नमः इति वा विष्णुशिवनामादि वा यथाशक्त्यावर्त्के नमः सवित्रे जगदेकच
क्षुषे जगत्प्रसूतिस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने इति नमस्कुर्यात् एवं स्ना
नप्रातर्मध्याह्ने च कार्यं अशक्तौ मध्याह्न एव गृहे उष्णोदकेन स्नानमप्येवं आतुरादिना स्नानाशक्तौ दर्भोनां मार्जनं भस्मस्नानं जो
द्रजत्तस्या वा ईश्वस्त्रेणांगमार्जनं वा कार्यं जाबालिः अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणां आर्द्रेण वाससा वापि मार्जनं दैहि
कं विदुः विदुत्सरस्वतीपाते स्नानं मारस्वतं विदुः विप्रकृत्येनेत्यर्थः मानसं वा स्नानं कार्यं यथा ध्यायेदादित्यसंकाशं वासुदेवं श्चतु
र्भुजं शंखचक्रगदापद्मवनमालाविराजितं तस्यपादोदकानां ध्यानं निपतंतीं स्वमूर्धनी चिंतयेद्ब्रह्मरंध्रेण प्रविशंतां स्वकां तनुं तथा सं
क्षालयेत्सर्वमंतर्देहगतं मलं तथा अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिरिति ततः का
स्यपात्रे आज्यप्रतिबिंबमवलोक्य आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः कामधे
नुपुसंभूतं सर्वक्रतुषु संस्थितं देवानामाज्यमाहारमतः शांतिं प्रयच्छमे इति विप्राय दत्वा दक्षिणां दद्यात् एतद्विष्णुधर्मोत्तरे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शृ. कौ
४५

स्य १: ततो मध्याह्ने पूर्ववत्स्नात्वा धौतवस्त्र॰ भस्मधारणं ततः ब्रह्मयज्ञं कुर्यात् तत्र यद्ब्राह्मणानीतिहासान्पुराणा
नि कल्पानितिश्रुतेर्वेदाथर्वपुराणानि सेतिहासानि शक्तितः जपयज्ञप्रसिध्यर्थं विद्यां चाध्यात्मिकीं जपेदिति याज्ञ
वल्क्योक्तेश्च पुराणभारतादिपाठविधानेपि शूद्रस्य पाठप्रक्ते श्रवणस्यैव कर्मांगत्वात् पुराणश्रवणमेव ब्रह्मयज्ञ इति
केचित् तन्न नमस्कारेण मंत्रेण पंचयज्ञान्हापयेदिति याज्ञवल्क्योक्ते नमस्कारेण तस्य वाच्यात् तत्रयो नमः साम
ध्वर इति श्रुतेर्यज्ञो वै नम इति ब्राह्मणं भवतीति वचनाच्च नमो नम इति स्मृतिकौमुद्यामुक्तं तत्वं तु वेदादीनामर्थपेस्व
रूपस्यैव ग्रहणान्नमः श्रुतेश्च तत्वं तत्वेनाप्युपपन्नो नैमीत ऋग्वेदादि शब्दैः कार्य इति तद्यथा दर्भासने उदङ्विस्या
प्य श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञं करिष्ये इति संकल्प्योपस्थं कृत्वा दर्भगर्भं ब्रह्मांजलिं कृत्वा ततो नम इति जपेत् यद्वा
ऋग्वेदाय नमः यजुर्वेदाय नमः सामवेदाय नमः शिक्षायै नमः काव्यायै नमः आकरणाय नमः निरुक्ताय नमः ज्योति
षाय नमः छंदोविचित्यै नमः अध्यात्मविद्यायै नमः इतिहासपुराणेभ्यो नमः तर्कविद्यायै नमः पूर्वमिमांसायै नमः

राम
४५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

उत्तरमिमां साधेनमः इतिजपित्वा देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमोनम इति
त्रिर्जपित्वा इति पित्वा, इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितं वाग्यज्ञो नार्चितो देवः प्रीयतां मे जनार्दन इत्यक्तोदकं स्पृशेत् अ
थतर्पणं तच्च ब्रह्मणे नम इति नमोन्तैः तंत्रैः कार्यं तस्य नमः शब्दोक्तेरिति केचित् अन्ये तु तर्प्यतामित्योंकारपूर्वमिति काती
यं सूत्रस्य तर्प्यतां शाद्रस्यत्या गोमना भावान्नदंत्तेरित्याहुः आसने दक्षिणजान्वाच्य कतुदर्भाक्षतैर्हस्तद्वयेन देवतीर्थेन त
र्पयेत् तच्च मदनपारिजाते योगयाज्ञवल्क्यकातीयसूत्रानुसारेणावार्याः गंधर्वाः तर्प्यंतां इतराचार्याः तर्प्यंतां संवत्
सरः तर्प्यतां सावयवः तर्प्यतां देव्यस्तर्प्यं॰ अप्सरसः तर्प्यंतां देवानुगाः तर्प्यंतां नागास्तर्प्यंतां सागरास्तर्प्यं
तां पर्वतास्तर्प्यंतां सरितस्तर्प्यंतां मनुष्याः तर्प्यंतां यक्षाः तर्प्यंतां रक्षांसि तर्प्यंतां पिशाचाः तर्प्यंतां सुप
र्णाः तर्प्यंतां भूतानि पशवः तर्प्यंतां वनस्पतयस्तर्प्यंतां औषधयस्तर्प्यंतां भूतग्रामश्चतुर्विधः तर्प्यतां आ
चारश्चूडामणौ तु यज्ञापत्यं ते देवा यक्षास्तथा नागा गंधर्वाप्सरसोसुराः क्रूराः सर्पाः सुपर्णाश्च तरवो जंबकाः ख

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भू.क. ४९

गाः विद्याधरा जलाधारास्तथैवाकाशगामिनः निराहाराश्च ये जीवाः पापे धर्मे रताश्च ये तेषामाप्यायनायैतद्दीयते स
लिलं मयेति मात्स्योक्तेन तर्पणमुक्तं अथ ऋषयः निवीतं कृत्वोदग्गर्भमध्येन प्रजापतितीर्थेन तिलाक्षतमिश्रोदा
कंजलीमंत्रान्दद्यात् सनकःस्तृप्यतां सनंदनस्तृप्यतां सनातनस्तृप्यतां कपिलस्तृप्यतां आसुरिःस्तृप्यतां
वोढुःस्तृप्यतां पंचशिखःस्तृप्यतां आचारचूडामणौ तु मरीचिरत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं ऋषिं सनत्कुमारं च
भृगुं नंदनमेव चेति नामभिरुक्तं अथ पितृतर्पणं दक्षिणाभिमुखः सव्यं जान्वाच्य प्राचीनावीती पितृतीर्थेन द्विगु
णदर्भैस्तिलमिश्रांस्त्रीं स्त्रीमंजलीन्दद्यात् वसवःस्तृप्यतां रुद्राःस्तृप्यंतां आदित्यास्तृप्यंतां मरुतःस्तृप्यंतां
अश्विनौ तृप्येतां कव्यवालस्तृप्यतां सोमस्तृप्यतां यमःस्तृप्यतां अर्यमास्तृप्यतां अग्निष्वात्ताः पितरस्तृप्यंतां
तेभ्यश्चेदं तिलोदकं नम इत्याचारचूडामणिः सोमपाः हविष्मंतः ऊष्मपाः सुकालिनः बर्हिषदः आज्यपाः यमः
धर्मराजः मृत्युः अंतकः वैवस्वतः कालः सर्वभूतक्षयः औदुंबरः दध्नः नीलः परमेष्ठी वृकोदरः चित्रः चित्रगुप्तः॥ राम ४९

के प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते शालग्रामशिलातोयं पिबेत्सोमं करेण तु अज्ञानादैदैवं प्रोक्तं ज्ञानादर्द्धं सुभा
चरेत् वि— पादोदकं पीत्वा कोटिजन्माघनाशनं तदेवाष्टगुणं पापं भूमौ बिंदुनिपातनात् भक्तिचंद्रोदये: अपमेव
तथा कांस्ये काष्टे वालाबुकेन तथा उद्धृस पादसलिलं मद्यतुल्यं विनिर्दिशेत् आविष्णोः पादसलिलं करे कृत्वा मुखे क्षिपेत्
भरत्वा पिबते तोयं रौरवे नरके वसेत् अरत्वा विश्ववमनादिभ्य इति शेषाः ग्रहणमंत्रो हलायुधे अकालमृत्युहर
णं सर्वव्याधिनिवारणं विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहं इति अथ शूद्रस्य वैश्वदेवः शंखः पंचयज्ञवि
धानं तु गृही नित्यं न हापयेत् यम ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च भूतयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्त्तिताः
स च लौकिकेग्नौ कार्यः अत एव तत्र रत्नेस्तु प्रतिष्ठितो लौकिकेग्नावुक्ता ये तु लौकिकाग्नावपि शूद्रस्य न भवतीत्या
त्याहुः ते मूर्खा एव विज्ञानेश्वरापरार्कमेधातिथयोप्येवमाहुः गृह्याग्नौ तु पवेद्वं लौकिके नापि नित्यशः यस्मि
न्नग्नौ पचावेदन्नं तस्मिन्होमो विधीयते इति मनूक्तेः असंभवे शतातपः लौकिके वैदिके वापि हुतोत्सृष्टे जले क्षि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰
५१

तो वैश्वदेवस्तु कर्तव्यः पंचसूनापनुत्तये स चापकेनापि कार्यः स्वपतीष्टिवत् अन्यथा तत्राप्यग्नेः स्यादिति केचित्
पक्वमुच्छिष्टमुच्यते इत्युक्तेः स्वाकर्तृकस्यामे नैवेति स्मार्तगौडाः तत्र वैश्वदेवे मन्त्रा होमो नानाप्रकारा उक्ताः तेषु अ
नुक्तौ निरग्निर्द्विजवरः तस्य कातीयसूत्रोक्ते गृह्याग्निं विना नाधिकारादिति स्मृतिकौमुदीकारः तत्र निरग्नेः शा
कलमंत्रैर्होमाद्युक्तेः तदाह मदनपारिजाते वसिष्ठः अग्निकस्तु तयो विप्रः सोन्नं व्याहृतिभिः स्वयं हुत्वा शाकल
मंत्रैस्तु शेषाद्भूतबलिं हरेत् शाकलमंत्राः देवकृतस्यैनस इति षट् शूद्रस्यापि प्रागुक्तेरिस्याकातीकर्मोरेतदेव
नानाम्नाहोमः ननु मनूक्तः शूद्रस्य स्मृतिश्रवणस्मृतिश्रवणाभावेन तत्कर्मण्यनधिकारात् तेनयेषां कृत
ही तावदारब्धायां वैश्वदेवो नोक्तस्तेषां मनूक्तः यद्वा शूद्राणां पुराणश्रवणाधिकारात्तदुक्तो वैश्वदेवस्तैः कार्यः
यथा मार्कण्डेयपुराणे ततः संपूजयेद्वह्निं दद्याच्चैवाहुतीः क्रमात् प्रथमां ब्रह्मणे दद्यात्प्रजानां पतये ततः त राम
तीयां चैव गृह्याभ्यः कश्यपाय तथापरं ततोनुमतये दत्वा दद्यादिह बलिं ततः पर्जन्याभोधरित्रीणां दद्यादनुम ५१

णिके त्रयां वायवे प्रतिदिग्भ्यश्च दिग्भ्यः प्राच्यादिनः क्रमात् ब्रह्मणे चांतरिक्षाय सूर्याय च यथाक्रमं विश्वेभ्यश्चैव
देवेभ्यो विश्वभूतेभ्य एव च उषसे भूतपतये दद्यादुत्तरतस्ततः स्वधा नम इति त्युक्त्वा पितृभ्यः श्चापि दक्षिणे कृत्वापस
व्यं वायव्यां यक्ष्मैतत्तेव नेजवं ततस्तोयमुपादाय तेषां नाम्नाक्षिपेद्भुवीति विष्णुपुराणेप्येवं होममुक्त्वा बलौ विशेष उक्तः
तच्छेषे मणिके पृथ्वी पर्जन्याद्भ्यः क्षिपेत्ततः द्वारे धातुर्विधातुश्च मध्ये च ब्रह्मणे क्षिपेत् इंद्राय धर्मराजाय वरुणाय त
थेंदवे प्राच्यादिषु बुधो दद्याद्भुतशेषात्मकं बलिं प्रागुत्तरे च दिग्भागे धन्वंतरिबलिं विदुः वास्तेवायसवे दिक्षु सम
स्तासु ततो दिशां ब्रह्मणे चांतरिक्षाय भानवे वक्षिपेद्बलिं विश्वेदेवान्विश्वभूतांस्ततो विश्वपतीन्पितॄन् यक्ष्माणं
च समुद्दिश्य बलिं दद्यान्नरेकानीये सूत्रे पिंदमेव बलिहरणं किंचिन्न्यूनं तेन भूद्रोपीदमेवात्तत्र स्वाहाकारेण नम
स्कारेण मंत्रः शूद्रो विधीयते इति भारते केर्ह्मे स्वाहा शूद्रो बलौ नमः शब्दः इति स्मृतिकौमुदी तन्न नमस्का
रेण मंत्रेणेत्येतद्विरोधात् तच्च बलिदानं गृहदेशेषु कार्यं अग्नेः पश्चाद्वा अथ प्रयोगः दर्भहस्तः आचम्य त्

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भू॰ कं॰ सीं प्राणानायम्य वा देशकालौ स्मृत्वा पंचसूनापनुत्तये श्रीपरमेश्वरप्रीत्यर्थं वैश्वदेवं करिष्ये इति संकल्प्य कुंडं हस्तस्थंडि
५२ लं वा संमृज्य गोमयेनोपलिप्योल्लिख्यांगुष्ठानामिकाभ्यां मृदमुद्धृत्य अग्निमभ्युक्ष्य लौकिकाग्निं संस्थाप्याग्नये नमः
मुखं यः सर्वदेवानां हव्यभुक् कव्यभुक् तथा पितॄणां च नमस्तस्मै विश्ववे पावकात्मने इति संपूज्य पर्युक्ष्य गृहान्नेन तं
डुलैरमस्नुनेर्वा कुर्यात् तद्द्रव्यमग्नौ निधायोद्धृत्याभ्युक्ष्य हस्तेन घृतप्लुतं जुहुयात् आहुतिद्रव्य दिशा पर्वपूरिकाद्वि
मलकमात्रा वा यथा अग्नये नमः इदमग्नये न ममेति त्यागः एवं च मन्त्रेपि वायवे न॰ सूर्याय न॰ प्रजापतये न॰ अ
ग्नये॰ इति षट् इति शाकलहोमः अथ पौराणः ब्रह्मणे॰ प्रजापतये॰ गृह्याभ्यां॰ कश्यपाय॰ अनुमतये॰ विश्वे
भ्यो देवे॰ अग्नये स्विष्टकृते इति ततः पर्युक्ष्य विभूतिं धृत्वा नमस्कुर्यात् विज्ञानेश्वरमते देवताभ्यः पितृभ्यश्च महा
योगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नम इत्येतेन सकृद्धोमः नम इत्येवं मंत्रेण होम इत्येके महानपारि राम
ना ते परिशिष्टो शाकं वा यदि वा यन्नमूलं वा यदि वा फलं संकल्पयेद्यदाहारे तेनाग्नौ जुहुयादपि व्यासः जुहुया ५२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

सर्पिषाभ्यक्तं तैलक्षीरविवर्जितं दध्यक्तं पयसाभ्यक्तं तद्भावेन सापिवा चतुर्विंशतिमते आलाभेयेन केनापीफलशाको
द्रकादिने तत्र यद्यप्यस्मत्कृते निर्णयसिंधौ सर्वमुक्तमस्ति तथापि तत्रत्यमेव संक्षेपेण भ्रूद्वारा किंचिदुच्यते मूलं त
त्रैव ज्ञेयं तत्राहो गर्भाशौचं आचतुर्थमासात्तु स्रावः पंचमषष्ठयोः पातः सप्तममासादिपूर्णप्रसवः मनुः रात्रिभि
र्मासतुल्याभिर्गर्भस्रावे विशुध्यति इदं च चतुर्थपरं त्रिमासमध्ये रजस्वलात्वेनैव त्रिरात्रं सिद्धं मरीचिः गर्भस्रुतौ य
थामासं चिरेत्त्तमे त्र्यहः राजन्ये तु चतुरात्रं वैश्यं पंचाहमेव च अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता अचिरे
त्रिमासमध्ये उत्तमे ब्राह्मणे अस्यार्थः स्मृतिकौमुद्यां गर्भस्रावे त्रिमासोर्ध्वं चतुर्थमाससमं दिनं चतुर्थं सर्व
वर्णसमं मासत्रयमध्ये त्रिदिनं तत्रयां दिवसा अधिकाः त्रय इत्यस्याहतिरेकशेषश्च तेन त्रिमासमध्ये त्रिरा
त्रं तेविप्रे त्रिदिनं क्षत्रियाहो चतुरहादि केचित्तु प्रथमादिमासेष्वपि एकरात्राद्यनंतरं वर्णेषु त्रिरात्राद्याहुः अ
न्यथा पंचमादिमासेषु वैश्यादेः पंचहादि त्रिमासमध्ये च चतुरहादीत्यनौचितीस्यात् स्रावे सपिंडानां स्नानं पा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

सू॰क॰ नेर्मातुर्यथामातृपित्रादीनां इदं निर्गुणानां सगुणानां त्वेकाहरति मदनपालः इदं सर्ववर्णसमं तुल्यं वयसि सर्वेषा
मतिक्रांते तथैव चेति व्याघ्रोक्तेः अथ प्रसवाशौचं संवर्तः जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते पुत्रयहात्क:
५२ न्यापि यत्तु हारलतायां सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः कृत्वा सचेलं स्नानं तु शुद्धो भवति तत्क्षणादि
ति ब्राह्मोक्तेः मुखदर्शनोर्ध्वमेव स्नानमिति तत्र विदेशोत्तदवध्यस्य रयतायत्तेः यत्तेन मुखदर्शनोत्तरं पुनः
स्नानं परत्वं परास्तं मूले केनेन दर्शनेन परत्वात् गौडास्तु सापत्नमातुः प्राक् स्नानादरस्य त्वात्मन्याश्च मातर
स्तु हन्त दुहं न व्रजंति चेदिति ब्राह्मादित्याहुः अंगिराः नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति रजस्तत्राशुचि
र्ज्ञेयं तच्च पुंसि न विद्यते संसर्गो मैथुनं शयनासनादिकमिति माधवः स्पर्शो इति गौडाः तत्र संस्पर्शे सूतिकाया
स्तु स्नानमेव च विधीयते इत्यंगिरसोक्तेः एवकाराद्धाल स्पर्शे न दोषः व्यासः प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा राम
त्रिष्वेतेषु न कुर्वीत सूतके पुत्रजन्मनि अत्रविशेषः षष्ठीपूजादि च प्रागुक्तं प्रयोगपारिजातस्तु पुंप्रसवे द ५२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

साहकन्याप्रदानेप्यहः स्त्रीजन्मनि सपिंडश्च सोदकश्च त्र्यहाच्छुचिः त्रिपुत्रिपुरुषं ज्ञेयं सपिंडे त्वद्विजोत्तमा इत्यग्निस्मृते
रित्याह गोडास्तु वाग्दानोत्तरं कानीनकन्याविषयं चैतदित्याहुः अथ मृताशौचं हारीतः नीता मृते मृतजाते वास
पिंडानां दशाहं नाछेलेदोर्ध्वं मृते इत्यर्थः नाड्यां छिन्नायामाशौचमिति तेनैवोक्तेः नालछेदात्पूर्वं मातुर्नास्त्यशौचमिति
शुद्धितत्वे नालछेदात्पूर्वं मृतो तु बृहन्मनुः जीवन्जातो यदि ततो मृतः सूतक एव तु सूतकं सकलं मातुः पित्रादीनां
त्रिरात्रकं शावनिमित्तस्नानमात्रं प्रा— मरणात्सद्यः शौचमिति शंखोक्तेः नामकरणं चोलं च कालोपलक्षणमिति मे
धातिथिरहयः नोदाहावेला नमात्रं आदंतजन्मनः सद्य इति याज्ञवल्क्योक्तेः दंतोर्ध्वं त्रिवर्षात्प्राक् चूडाभावे
हः अत्राग्निदानेप्यह इति माधवः त्रिवर्षात्प्रागूर्ध्वं वा सचूडे त्र्यह एव अब्दोर्ध्वं तु चूडेपि त्र्यहः इदं सपिंडानां
पित्रोस्तु दशाहाधर्वं मृते बाले सर्वत्र त्रिरात्रं बालमामजदंतानां त्रिरात्रेण शुद्धिरिति काश्यपोक्तेः वेजि
कारभिसंबंधारनुरुंध्यां दघं त्र्यहमिति मनूक्तेश्चेति मिताक्षरामाधवादयः शुचितत्वात् गोडास्त्वेतत्रि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰कृ॰ रात्रं शूद्रपरां द्विजानां त्वजातदंते एकाहः जातदंते त्रिरात्रं आजातदंतमरणे पित्रोरेकाहमिष्यते दंतजाते त्रिरा
५४ त्रं स्यादपरिस्यातां तु निर्गुणे इति कौर्मात् .अनूढानां तु कन्यानां तथा वै शूद्रजन्मनामिति त्र्यहानुदत्तौ
शंखोक्तेः त्रिरात्रं तु भवेच्छूद्रे षण्मासे पितृशोधमृते इति मात्स्यमुक्ताच्च जातदंते शूद्रे तु पंचाहः यथाहांगिरः शू
द्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पंचभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते षड्वर्षांतमतीतो यः शूद्रः संम्रि
यते यदि मासिकं तु भवेच्छौचमित्यंगिरसभाषितं तेनानूढभार्ये निर्गुणे शूद्रे मृते त्रिवर्षोर्ध्वं द्वादशाहः षड्व
र्ध्वं मासः यत्तु अनूढभार्यः शूद्रस्त्विति शंखोक्तं षोडशाब्दादूर्ध्वं मासाशौचं तत्सगुणसच्छूद्रेपरं ऊढो द्वाहे तु सर्वत्र
षड्वात्परागपि मासः यत्तु तुल्यं वयसि सर्वेषामिति व्याघ्रोक्तेः शूद्रस्तु नाशौचं तद्दाक्षिणात्यपरं अन्ये त्वोश्राग
क्कैमेर्तिका व्यवस्थेत्याहुः तुल्यं वयसि सर्वेषामित्येतरोधाद्धिष्टविगानाच्चांगिरसादीनि नादर्त्तव्यानीति विज्ञा राम
नेश्वरमदनपारिजातादयः षोडशाब्दमध्ये विवाहाभावे त्रिरात्रं तत्सवे मासः ऊर्ध्वं विवाहाभावेपि मास इत्य ५४

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पराकर्मदत्तपालाख्यः कन्यानां तु चौलात्प्राक्मृतौ स्नानं ॥ अचूडायां तु कन्यायां सद्यः शौचं विधीयत इत्यापस्तंबोक्तेः
इदं त्रिपुरुषमध्ये चौलोत्तरं वाग्दानात्प्रागेकाहः अविशेषेण वर्णानामर्वाक्संस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्या
स्वक्षाविधीयत इत्संगिरसोक्तेः त्रिरात्रविषयःहोविधात् ॥ अहस्त्वदत्तकन्यास्विति स्मृत्युक्तेश्च इदं त्रिपुरुषमध्ये ॥ अप्रत्तानां
स्त्रीणां त्रिपुरुषी विज्ञायते इति वसिष्ठोक्तेः गोडास्त्विदं वाग्दानोत्तरं ॥ अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषं
इति कौर्मोक्तेरित्याहुः वाग्दानोत्तरं प्राग्विवाहान्मृतौ भर्तृकुले च साप्तपौरुषा च त्रिरात्रं ॥ अवारि पूर्वं प्रत्ता तु या
मे च प्रतिपादिता असंस्कृता च सा ज्ञेया त्रिरात्रमुभयो – जमिति मरीच्युक्तेः ॥ अथ संस्कृते प्रदेमृते विशेषः
माधवीये ब्राह्मे स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोथवा ॥ अजातदंतो मासे वा मृतः षड्भिस्तु बहिः वस्त्रा
द्यैर्भूषितं कृत्वा निक्षेपेत्तं तु काष्ठवत् खनित्वा शनकैर्भूमौ सद्यः शौचं विधीयते विष्णुः ॥ अनिर्वृत्ते दशाहे तु पं
चत्वं यदि गच्छति सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रिया यमः ऊनद्विवार्षिकं प्रेतं घृत्तोक्तं निखनेद्

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ कं॰
५५

हिः तेन नाम्नः पूर्वमेव खननं तदूर्ध्वं वर्षत्रयात्पूर्वं चौलाभावेग्न्युदकविकल्प जातादंतस्य वा कुर्युर्नाग्निं वापि ककृते स
तीतिमनूक्तेः चूडोत्तरत्वग्निदानं त्रिवर्षात्प्रागूर्ध्वं वानियतमेव तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च सर्वेषां
न चूडानाम मन्त्रत्रापीछयाद्भूमिति लौगाक्षिस्मृतेः अन्यत्राकृतचूडे इच्छयेति विकल्प उक्तः चूडोत्तरदशपिंडाश्र
पि कार्याः असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतसोक्तेः द्वादशाद्भूत्तरादर्वाक् पोगंडमरणे
सति सपिंडीकरणं तस्याद्येकोदिष्टानि कारयेदिति हरदत्तदेवलोक्तेश्च द्वादशादित्यमूढ श्रद्दपरं मरीचिः प्रेतपिं
डं बहिर्दद्याद्दर्भमंत्रविवर्जितं एतदसंस्कृतपरमिति विज्ञानेश्वरः त्रिरात्रे दशपिंडानाह पारस्करः प्रथमे दिवसे
देयास्त्रयः पिंडाः समाहितैः द्वितीये चतुरो दद्यादस्थिसंचयनं तथा त्रींस्तु दद्यात्तृतीयेह्नि वस्त्रादि क्षालयेत्ततः
अस्थिसंचयनं संस्कृते एव नान्यत्र अत्र देवयाज्ञिककृते क्रियानिबंधे विशेषः गारुडे शिशुरादंतजननाद्बालः स्या
द्याच्चाशिखः कथ्यते सर्वशास्त्रेषु कुमारो मौंजिबंधनात् तथा गर्भे नष्टे क्रियानास्ति दुग्धे देयं शिशौ मृते पर्यं च पा

राम
५५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

यसंस्रीरंदद्याद्बालविपत्तितः एकादशद्वादशाहवृषोत्सर्गविधिंविना तथा यत्रमृयते बालस्तत्र प्रायः प्रदीयते किंचि
त्समानवयसासत्कृत्यान्नं यथाविधिः नसंभोज्यं च दातव्यं तथा च सुखभक्षिका नद्वस्त्राणि प्रदीयानि सोपानत्कानि
तत्समे कुमाराणां च बालानां भोजनं वस्त्रवेष्टनं यज्ञोपजीवने बालस्तत्तद्धि प्रायदीयते तथा भूमिनिक्षेपणं बाले
आवर्षद्वयमाशिखं ततः परं खगश्रेष्ठ देहदाहो यथाविधि अचूडे पूर्ध्वखननाभावार्थमामर्षद्वयमिति प्रागपिकृ
तचूडस्याग्निदृत्स्यर्थमाशिखमिति चूडाकर्मणि संजाते विपत्तिस्तु यदा भवेत् सूतकांते प्रकर्त्तव्यं वृषस्योत्सर्जनं त
दा तत्रदाहः प्रकर्त्तव्यं उदकं तत्र निश्चितं श्राद्धानि षोडशापिस्युः सपींडीकरणं विना इदं पंचवर्षोत्तरं जन्मतः पं
चवर्षाणि भुंक्तोरन्नमसंस्कृतं पंचवर्षाधिके बाले विपत्तिर्यदि जायते वृषोत्सर्गादिकं कर्म कर्त्तव्यं पुरकं ततः अह
न्यहनि संश्राद्धो कुर्यात् श्राद्धानि षोडवा पायसेन गुडेनैव पिंडद्द्याद्यथाक्रमं उदककुंभप्रदानं च पदनोनानि यानि
च दीपदानादियत्किंचित्सं च वर्षाधिके सदा कर्त्तव्यं तु खगश्रेष्ठ व्रतानार्कप्रेततृप्तये कुर्जुदर्भैस्तिलैः भुक्तैः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰ प्राचीनावीतिना तथा वार्षिकं तु न भवत्येव सपिंडिनाभावे पितृत्वाभावात् दिवोदासीये अवृत्ते निधनं प्राप्ते विप्रादौ शूद्र
५६ जातिवत् क्रियाः सर्वाः समुद्दिष्टाः सपींडीकरणं विना उदकं पिंडदानं च कृतचूडे विधीयते अनूढकन्यानां पिंडविकल्पः
स्त्रीणां चैके प्रतानामीति गौतमोक्तेः अथ शूद्रस्य जात्याशौच तत्र मनुपराशरगौतमाद्यैः शूद्रो मासेन शुध्यतीति मास
मात्रमुक्तं याज्ञवल्क्यस्तु त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्त्तिन इति पंचयज्ञापरस शूद्राणां पंचदशाह आंगिरास्तु स
र्वेषामेव वर्णानां सूतके मृतके तथा दशाहा शुद्धिरेतेषामिति शातातपो ब्रवीदित्याह शुद्धितत्वे देवलोपि आशौचं द
शरात्रं तु सर्वेषामपरे विदुः निधने प्रसवे चैव परस्यतः कर्मणः क्षयं असंतोत्व—स्य कर्महानौ—पीडा च नो विप्रपरिच
र्यापुरं शूद्रे दशरात्रमिति हारलताकारः यत्तु दक्षः सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा षट्दशद्वादशाहाश्च
पक्षो मासस्तथैव च मरणांतं तथा चान्ये दशपक्षास्तु सूतके इति अत्र मरणांतसूतकादेर्भिन्नं सद्यः शौचादि षड
हांतं यायावरादिपरं अन्यपूर्वामस्य गेहे भार्यास्य तस्य निस्पशः आशौचं सर्वकार्येषु देहे भवति सर्वदेति ब्राह्मो राम ५६

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

क्रमेण वरुणे सपरार्कादयः तत्र विवाहोत्तरं सर्वत्र शूद्रे पूर्णाशौचं विवाहाभावेपि निर्गुणानां षडहोर्ध्वं मास इति गौडाः स
गुणानां विवाहाभावे षोडशाहोर्ध्वं मास इति अपरार्कः अत्राचरनाद्विषयागुणपरादेशभेदाद्व्यवस्था: द्विजदासी
पीनां तु स्वाम्याशौचमेव दासी दासश्च सर्वो वै यस्य वर्णस्य यो भवेत् तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकमिति
गिरसोक्तेः शातातपः तदाश्रितस्तु हूतस्यादिति तं द्विजमाश्रित इत्यर्थः अन्येषां कुंडगोलकादीनां सूतादीनां च प्रति
लोमानां च प्रतिलोमानां मासमाशौचं शूद्राणां तु स्वधर्माणः सर्वे प्रध्वंसजाः स्मृता इति मनूक्तेः अपध्वंसजा
व्यभिचारजाः शौचाशौचं प्रकुर्वीरन् शूद्रवद्वर्णसंकरा इति शुद्धितत्वे ब्रह्माच्च म्लेच्छादीनां तु शौचं केवलं मला
पकर्षणार्थं मूत्रपुरीषवच्छौचमात्रमिति विज्ञानेश्वरः तत्र सूतके मातृवर्जमस्पृश्यत्वं नास्ति सूतके सूत
वर्जमस्पृश्यशौनं निषिध्यते इत्यंगिरसोक्तेः पितुरपि स्नानोर्ध्वं माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरि
ति स्मृतेः शावे तु देवलः स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः इदमल्पे पूर्णाशौचे तु अंगिराः दशा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.क.
५७

वादिविभागेनकृतसंजपनेक्रमात् अंगस्पर्शनमिच्छंतिवर्णानांतत्वदर्शिनः इदंकलौनिषिद्धं अस्थिसंचयनादूर्ध्वमंग
स्पर्शनमेवचेति हेमाद्रौवादिपुराणे कलिवर्ज्येषूक्तेः सूतिकायास्तुदशाहएव सूतिकासर्ववर्णेषुदशरात्रेणशुध्य
ति अतोचनपृथक्शौचंसर्ववर्णेष्वयंविधिरितिप्रचेतसोक्तेः यत्तुब्राह्मे ब्राह्मणीक्षत्रियावैश्याप्रसूतादश
भिर्दिनैः गतेशूद्राचसंस्पृश्यात्रयोदशभिरेवचेति तदसच्छूद्रपरं कर्मार्हतांत्वाहपैठीनसिः सूतिकांपुत्रव-
तींविंशतिरात्रेणकर्माणिकारयेन्मासेनस्त्रीजननीं एतच्चविंशतिरात्रमाशौचोत्तरंज्ञेयं अन्यथामासाशौ
चेसपिंडानामाशौचमध्येतस्याःकर्मार्हतेत्युनोचित्यात् दशरात्रपार्यंतंविधिवैयर्थ्याच्च आपस्तंबः क्षत्रवि
टूशूद्रजातीनांयेस्त्रीमृतकसूतके तेषांतुपैतृकंचविभक्तानांतुमातृकं मनुः दशाहंशावमाशौचंसपिंडेषु
विधीयते दशाहयदंस्वाशौचपरंसपिंडेषुविधीयते दशाहयदंस्वाशौचपरं तथा शावस्पर्शेविशुध्यंतित्र्यहा रामु
त्दशकाग्निनः सोदकाइदत्यर्थः अग्निपुराणे सपिंडातातुसर्वेषांगोत्रतःसाप्तपौरुषी समानोदकभावश्च
५७

वर्त्तेनाचतुर्दशात् जन्मनामस्मृतः प्रयोगपारिजाते अग्निस्मृतौ स्त्रीजन्मनिसपिंडश्चसोदकश्च त्र्यहाच्छुचिः स्त्रीपुपुरु
षंज्ञेयं सपिंडत्वंहिजोत्तमाः वसिष्ठः अप्रभानांतुस्त्रीणांत्रिपुरुषीविज्ञायते इदमाशौचमौरसस्यैव दत्तकाद्येकादशपु
त्राणां जननेमरणेवादयोः पित्रोः स्त्रिरात्रमेव तदुक्तं स्मृतिकौमुद्यां ब्राह्मे औरसोयदिनापुत्रस्त्वपुत्रः पुत्रिकासुतः
विद्यतेतत्रतेषांतुविज्ञेयाः क्षेत्रजादयः दत्तकश्चस्वयंदत्तः कृत्रिमः क्रीतएवचेत्युपक्रम्य एकादशपृथक्गोत्रा
शमात्रकरास्तुते आद्वादिशासवत्सर्वेतेषांकुर्वंतिनित्यशः सूतकेमृतकेवापित्र्यहाशौचस्यभागिनः शुद्धितते
मिवं एवंजनकस्यापि वैजिकादभिसंबधादनुरुंध्यादघंत्र्यहमितिमनूक्तेः एवंजनपालकपितृमातृमृतोद
नकानांत्र्यहमेवच अयंचत्र्यहोविप्रपरः शूद्राणांत्वत्रद्वादशाहः यत्रत्रिरात्रंविप्राणांऔशौचसंप्रदश्यते त
त्र शूद्रेद्वादशाहंपंचवक्षत्रंवैश्ययोरितिऋषिशृंगोक्तेरितिमदनपालः यत्रवर्णविशेषानुपादानेनत्रिरात्रंप
थासोदकेदत्तकाशौचतत्रद्वादशाहःशूद्रः नतुवयोवस्थानिमित्ते तुल्यंवयसिसर्वेषामितिक्रांत्ते तथैवचेतिव्याघ्र

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.कं.
५८

पाद्मोक्तेः अप्रशंगादिवचनान्निशिष्टविगनान्माह्तव्यानीतिविज्ञानेश्वरादयः देशेमेदह्यापवस्त्वेतिमदनपालः एवंव्यभि
चारिणीनांस्त्रीणांहन्तकादीनांचप्रसवेमरणेचपूर्वापरभर्तोपित्रोश्चत्रिरात्रं तथाचत्रिरात्राच्चतुर्थेज्ञेयोविष्णुः अपुनोरसे
पुत्रेषुजातेषुचमृतेषुच परपूर्वासुभार्यासुप्रसूतासुमृतासुच मरीचिः सूतकेमृतकेचैवत्रिरात्रंपरपूर्वयोः ए
काहस्तुसपिंडानांत्रिरात्रंयत्रवैपितुः यत्तुयाज्ञवल्क्यः अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुचेत्यहोरात्रमाह त
त्सपिंडपरविदेशापरंवा परपत्नीपुत्राः हन्तकादयः बृहस्पतिः अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच मृतेष्वाद्य
स्वशुध्येत्तुत्रिरात्रेणद्विजोत्तमाः माधवीयेहारितः परपूर्वासुभार्यासुपुत्रेषुकृतकेषुच भर्तृपित्रोस्त्रिरात्रंस्यादेका
हस्तुसपिंडतः शूद्रेतुद्वादशरात्रमशौचं परपत्नीस्वयंसंगृहीतापरपूर्वा इदंसवर्णासु हीनवर्णासुतुअशौचाभा
वः अशौचंतुत्रिरात्रंस्यात्समवर्णेषुनिश्चितमितिब्राह्मोक्तेः पूर्वापरचतुस्त्वन्यपुत्रयोस्त्वाहमरीचिः मातुरैक्याद्वि रम
पितृकौभ्रातृकौभ्रातरावन्यगोत्रजौ एकाहंसूतकेतत्रत्रिरात्रंमृतकेतयोः शूद्रेतुविवाहाभावेषड्वर्षोर्ध्वंजाता ५८

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शौचमिति केचित् तथा च काश्यपांगिरसौ शूद्रे त्रिवर्णस्य नेतु मृते शुद्धिस्तु पंचभिः अत ऊर्ध्वं मृते शूद्रे द्वादशाहाद्विधीय
ते षड्वर्षातिमतीतो यः शूद्रः संम्रियते यदि मासिकं तु भवेच्छौचमित्यांगिरसभाषितं मेधातिथिरपि प्रागष्टमाच्छिशुः प्रोक्ते
न्येस्त्वाषोडशाद्बाल इति येपि षोडशाद्बाल्यमिच्छंति प्रागुक्तेषामष्टमादूर्ध्वं मासिक्येव शुद्धिः ऊर्ध्वं तु षड्भ्योवर्षेभ्यः शुद्धिः
शूद्रस्य मासिकीति स्मृतेः अष्टवर्षस्य मासस्येत्यन्यत्रोक्तमित्याह अपरार्के शांखस्तु विवाहाभावे षोडशवर्षोर्ध्वो मासमा
ह अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परं त्तु समधिगच्छेच्चेन्मासात्तस्यापि वा: शुद्धिं समधिगच्छंति नात्र कार्या वि
चारणेति यत्तु मदनपारिजाते हरितः अमौंजीबंधनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् अप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्र
द्वयं हारिति तत्रापि वस्त्रद्वयं षोडशवर्षपरमेव यत्तु मदनोद्धारदशे वस्त्रद्वयमाह तन्निर्मूलं अत्र सदसद्वद्रपराप
दनापद्विषयावा व्यवस्था ऊढकन्यानां तु पितृगृहे प्रसवे एकरात्रं मरणे त्रिरात्रमिति विज्ञानेश्वरापरार्के मा
धवस्तु प्रसवेपि त्रिरात्रं पित्रेः एकरात्रं बंधुवर्गस्य दत्तानारोपि तु गेहे सूयेतां थाम्रियेत वा तद्बंधुवर्गे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰क॰ ५९ स्त्वेकेन शुचिस्तज्जनकस्त्रिभिरिति ब्राह्मोक्तेरित्याह कल्पतरौ शुद्धितत्त्वे च कौर्मे दत्ता नारी पितुर्गेहे प्र
धाने सूयते यदा म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैः प्रतिगृहे प्रसवे पित्रादीनामाशौचं नास्ति
मृतौ पित्रोस्त्रिरात्रमत्स्येवा प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादिति
रेषां यथाविधीति माधवीये कार्ष्णाजिनिस्मृतेः सोदराणां तु भगिनीमृतौ शुद्धितत्त्वे कौर्मे आदंतात्
सोदरे सद्यश्चाचूडादेकरात्रकं आप्रदानात्त्रिरात्रं स्याद्दशरात्रमतःपरं बृहस्पतिस्तु पक्षिणिमाह श्वशुरयोर्भगिन्यां
च मातुलान्यां च मातुले पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशां पित्रोर्मृतौ तु माधवीये वृद्धमनुः पित्रोरुप
रमे स्त्रीणां मूढानां तु कथं भवेत् त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः भ्रातृभगिन्योः परस्पर पक्षिणी
परस्परं मृतौ भ्रातृभगिन्योः पक्षिणी भवेदिति ब्राह्मात् षडशीतौ च द्वात्रिंशश्लोक्यां प्रेतेघाचार्यमातामहेगु
हितत्सुतश्रोत्रियर्त्विक्स्वयाज्यस्वस्त्रीयेषु त्रिरात्रं त्रिदिवसमशुचिः सोदकस्तूभयत्र पक्षिण्याशौचमृत्वि राम ५९

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

गुहित्सुतहाध्यायबंधुत्रयांतेवासिश्वशुरभगिनीकाभागिनेवप्रमाणे मातामह्यांचपित्रोःस्वरिचविरतोमातुलेमा
तुलान्याचार्यासज्योतिरेवस्वविषयनृपतेनोऽपताप्येचनष्टेशिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगो
त्रानूचानश्रोत्रियेषुस्वगृहपरमृतेमातुलेचैकरात्रंरात्रींसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयुक्तेस्नानंबा
सोयुतंस्यादितिमविसकलंसर्ववर्णेषुतुल्यं अमूलंमाधवीयेमिताक्षरायांचज्ञेयं दौहित्रभागिनीययोरनुढ
योःपक्षिणी ऊढयोस्त्रिरात्रंसंस्थितेपक्षिणींरात्रींदौहित्रेभागिनीसुतेसंस्कृतेतुत्रिरात्रंस्यादितिधर्मोव्यवस्थि
तइतिवृद्धमनूक्तेः संस्कृतेदाहेनेतिगौडाः तत्र विशेषवैयर्थात् यत्रैकमातुलाद्यौपक्षिण्येकाहवुक्तौ त
त्रसंनिधिविदेशाभ्यांव्यवस्था श्रोत्रियेस्वगृहेमृतेत्रिरात्रं श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेदितिस्मृतेः
एकग्रामस्थेकाहः बंधुत्रयमुक्तंमिताक्षरायां आत्मपितृष्वसुःपुत्राआत्ममातृष्वसुःसुताः आत्ममातुलपु
त्राश्चविज्ञेयाआत्मबांधवाः पितुःपितुःष्वसुःपुत्रापितुर्मातृष्वसुःसुताः पितुर्मातुलपुत्राश्चविज्ञेयाः

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मू.क.
६०

पितृबांधवाः मातुः पितृष्वसुः पुत्रा मातुर्भ्रातृष्वसुः सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः अत्र पक्षिणी गो
त्रस्थ समानोदकानां त्र्यहो गोत्रजानामहः स्मृतं मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथेति जाबालोक्ते मातृबंधुष्वेका
हमाहुः यत्तु माधवीये प्रचेताः मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरोः मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यती
ति तत्स्वगृहमृतो ज्ञेयं अन्यत्र तु वृद्धमनुः पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशां श्वशुरयोः सन्निधौ त्रिरात्रं अ
सन्निधौ पक्षिणी देशांतरे एकरात्रं शीलकेपि स्वदेशे एकाहः देशांतरे स्नानं आचार्यपत्नीपुत्रोपाध्यायमातुलश्व
शुरश्वश्रूश्वसृर्यसहाध्यायी शिष्ये एकरात्रमिति माधवीये विस्मृतेः हरदत्तोप्येवमाहः श्वशुर्यः शालकः गौडास्त्व
प्येवं तदुक्तं षडशीत्यां एवं पित्रोर्भगिनिभ्यो ये पितामहयोश्चैव भगिन्यो तत्प्रजाश्च याः मातुलाः स्वस्य पित्रोश्च
पत्न्यश्चेषां प्रजाश्च याः यातरश्चेति सर्वेषु पक्षिणी च स्वहेत्यहं एवं श्वशुरमातृदौहित्रविपदिस्मृतं पितामही च
पितामहश्चेत्येकरोषः यत्तु वृद्धमनुं भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते मित्रे जामातरि प्रेते दौहित्रे भ

राम
६०

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

गिनीसुते शालकेतत्सुते चैव सद्यः स्नानेन शुध्यति तडागाद्येहेशां तद्देशालकसुतजामात्रोः स्वदेशे ज्ञेयं विष्णुः अस
पिंडे स्वे वेश्मनि मृते एकरात्रं प्रधानगृहमृतौ तु त्रिरात्रमिति माधवः शुद्धिनत्वेष्टहन्मनुः स्वश्रूद्रपतिनाश्वांस्या मृताश्चे
द्विजमंदिरे द्विजेसुपलक्षणं संबुद्धिर्वा शौचं तत्र प्रवक्ष्यामि मनुना भाषितं पुरा दशरात्राच्छुनि मृते मासाच्छूद्रे भवेच्छु
चिः द्वाभ्यां तु पतिते गेहे मंत्स्ये मासचतुष्टयात् अत्यंते वर्जयेद्गेहमित्येवं मनुरब्रवीत् अयोम्लेंछः अत्यंतः श्वपा
वइति वाचस्पतिः मनुः द्विजस्य मरणे वेश्मविशुध्यति दिनत्रयात् संवर्त्तः गृहशुद्धिं प्रवक्ष्यामि अतः स्वशावदूषि
ते प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं तथैव च गोमयेनोपलिप्याथ छागेनाघ्रापयेत्ततः ब्राह्मणैर्मंत्रपूताश्च हिरण्य
कुशवारिभिः सर्वमभ्युक्षयेद्वेश्म ततः शुध्यंत्यसंशयं क्रियाकर्त्तुस्तु मृत्याभावेपि पूर्णाशौचं निरन्वये सपिंडे
तु मृते सति दयान्वितः तदाशौचं पुराचीर्त्वा कुर्यात्तु पितृवत्क्रियामिति माधवीये ब्रह्मोक्तेः दिवोदासीये स
गोत्रो वा सगोत्रो वा योग्निर्दद्यात्सखेनरः सोपि कुर्यान्नवश्राद्धं शुद्धेत्तु दशमेहनि युद्धहते तु मनुः उद्यतेराहवेश

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू. कं.
६१

त्रेः क्षेत्रधर्मे हतस्य च सद्यः संतिष्ठते यज्ञस्तथा शौचकमितिस्थितिः यज्ञोऽस्य कर्मः सर्वे ते है वेत्यर्थः यत्तु आहवे
विहतानां च एकरात्रम शौचकमिति तद्युद्धस्तेन कालांतरमृते ज्ञेयं असंन्निधौ स्नानं सन्निधावेकाहं इतिमा
धवः यत्तु भारते राजधर्मेषु अशोच्यो हि हतः शूरः स्वर्गलोके महीयते न ह्यन्नमुदकं तस्य न स्नानं नाप्यशौचकमि
ति श्राद्धादिनिषेधस्तु पुत्राद्यभावपरः अत एव तत्र कर्मादीनां श्राद्धमुक्तं अन्ये तु यतिवद्दशापिंडनिषेधमाहुः
शुद्धितत्वे अग्निपुराणे दंष्ट्रिभिः शृंगिभिर्वापि हता म्लेंछैश्च तस्कैः ये स्वाम्यार्थे हता यांति राजन्स्वर्गं न संशयः
सर्वेषामिव वर्णानां क्षत्रियस्य विशेषतः यत्तु बृहस्पतिः डिंबाहवे विद्युता च राज्ञा गोविप्रपालने सद्यः शौचं मृत
स्याहुस्त्वहं वान्ये महर्षयः तत्र शस्त्रविनातेन वापरास्तु स्वहते त्रिरात्रं राज्ञा वध्ये हते सद्यः शौचमन्यत्र त्रिरात्रं
तत्रैव माघः क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा आसप्ताहात्त्रिरात्रं स्याद्दशरात्रमतः परं शस्त्रघाते अहा
दूर्ध्वं यदि कश्चित्प्रमीयते आशौचं प्राकृतं तत्र सर्ववर्णेषु नित्यशः शस्त्रघाते क्षतं विनाशावस्य शौनिहीरे च तदूहे

राम
६१

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

ग्रामे नष्टस्नाशने च शावजातीयं स्पर्शाच्च नद्रहवासमात्रे त्र्याहः उभयाभावे एकाहः प्रतिग्रहेण निर्हारे मासः विजातीय
निर्हरि शावजातीयं प्रतिग्रहणे द्विगुणं अपरिसमासोदकनिर्हारे स्पर्शे शवालंकरणे ज्ञानतः कृच्छ्रपादः अज्ञानादुप
वासः अनाप्यसवर्णनिर्हरणे त्रिरात्रेन चानंतत्फलं स्नानमात्रेण शुद्धिः पोटाचे वाग्निदानाच्च सद्यः स्नात्वा विशुध्यतीसप
र्के दृष्परा शारोकेः मातुलत्वादि संबंधे स्नेहे वा त्रिरात्रं गोतम व्याख्यायां हरदत्तः सूतकाद्विगुणं शावं शावाद्विगुण
मार्त्तवं आर्त्तवाद्विगुणा सूतिस्तापि शावहाहकः अनुगमने तु सपिंडने दोषः असपिंडे तु समावर्णे स्नान घृताश
नं पक्षिणी च उन्नमे स्नानमात्रं शेरनेतु शूद्रस्य शूद्रे स्पर्शं विना संचयनात्सर्वकर्मकाहः ऊर्ध्वं सज्योतिरिति माधवः
शुद्धिं त्वेपारस्करः अस्थिसंचयनादूर्ध्वं मासं यावद्विजातयः दिवसेनैव शुध्यंति वाससां क्षालनेन च सचानेर्द्धि
वसेनैव त्र्यहात्क्षत्रियवैश्ययोः सपिंडानां न दोषः मिताक्षरायां पारस्करस्तु मृतस्य बांधवैः सार्धं कृत्वा तु परिदे
वनं वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चेति सर्वत्रैकरात्रमाह अशौच्यन्नभक्षणे त्वज्ञानेन्नजरणावधि ज्ञान

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.कौ. ६२ नः भद्रस्य स्नानमात्रं अथ दासाशौचं तत्र स्वदासस्य तत्सुतस्य तत्सुतस्य दासस्य स्वसपिंडवत्तो स्नानमात्रात् स्वामिकार्ये स्पृश्य
त्वं भक्तदासस्य त्र्यहोर्ध्वं सद्यः स्पृश्यो गर्भदासो भक्तदासस्त्र्यहात् शुचिरिति मिताक्षरायां स्मृत्यंतरात् मूल्यकर्मकराः शू
द्रा दासीदासास्तथैव च स्नाने शारीरसंस्कारे गृहकर्मण्यदूषिता इति शातातपोक्तेश्च अत्रैव दत्तादित्रयोदशदासानां
स्वाम्याशौचसमसंख्यदिनोर्ध्वं स्वस्य मासाद्याशौचे सत्यपि स्वामिकार्ये स्पृश्यता दासांतेवासिभृतकाः शिष्याश्चैकग्रा
वासिनः स्वामितुल्येनाशौचेन शौचेन शुध्यंति मृतसूतके इति बृहस्पतिस्मृतेः स्वस्याद्दृष्टार्थकार्ये मासाद्याशौचं
सर्वेषामस्त्येव एवं दास्या अपि प्रसूतौ तु तस्याः स्वामिकार्येपि मासमात्रं दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवे
त् तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतके मिताक्षरोक्तेः षडशीतावपि स्वामिशौचं नदासाद्याः स्पृश्या मासात्तु
कर्मसु योग्याः सुधर्मास्ततो दासी सूती चेत्स्पृश्यतामियात् दासास्तु नारदेनोक्ताः गृहजातस्तथा क्रीतो लब्धो दाया
दुपागतः अन्नाकालाहितः स्वामिनाचयः मोक्षितो महतस्त्वर्णात् युद्धप्राप्तः पणेजितः तवाहमित्युपगतः प्रव्रज्या राम ६२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

वृमितः भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः वडवादासी तल्लोभाद्दा
सो जात इत्यर्थः दासादेः स्वामितत्सपिंडमरणे तु विष्णुः पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्या
त्मीयमिति प्रतिलोमदासादेर्नाशौचं वर्णानामनुलोम्येन दास्यं न प्रतिलोमत इति याज्ञवल्क्योक्तेः शास्त्रातिक्रमे
ण दास्यकरणेपि नाशौचं आनुलोम्येनाशौचमिति विज्ञानेश्वरोक्तेः सर्वाशौचं रजोदर्शनं च रात्रौ जातं चेत्तदा रात्रिं त्रिभा
गं कृत्वाद्यभागद्वये पूर्वदिनं अत्यंतसूत्तरं यद्वा प्रागर्धरात्राश्चग्वा सूर्योदयात्पूर्वदिनं अनंतरं तूत्तरदिनमिति पक्षत्रयं
मिताक्षरादौ उक्तं अत्र देशाचारतो व्यवस्था अथातिक्रांताशौचं तत्राशौचमध्ये ज्ञाते तच्छेषमात्रं नाधिकं प्रोषि
ते कालशेषः स्यादिति याज्ञवल्क्योक्तेः प्रसवेतिक्रांताशौचं नास्त्येव नाशुद्धिः प्रसवाशौचे व्यतीते बुदिनेष्वपीति
देवलोक्तेः तत्रापि पितुः स्नानं भवत्येव आशौचोत्तरं ज्ञाने तु वृद्धवसिष्ठः मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी
तथा अहस्तु नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यति इदं पूर्णजात्याशौचविषयं एव न तु वयोवस्थानिमित्तये अ

शु.क. ६२

कांतरदशाहेतितिमनूक्ते: यत्तु माधवीये देवलः अत्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः परमेकाहमावर्षाद्
र्ध्वं स्नातो विशुध्यति इति तदनापरिज्ञेयं इदं चैकदेशांतरे तु स्नानमात्रं देशांतरमृतं श्रुत्वा क्लिबे वैखानसे यतौ मृ
ते स्नानेन शुध्यति गर्भस्रावे च गोत्रिणा इति पराशरोक्तेरिति विज्ञानेश्वरः माधवीये विस्मृत्य अर्वाक् त्रिपक्षात्त्रि
रात्रं षण्मासाच्च दिवानिशं अहः संवत्सरादूर्ध्वं देशांतरमृते ष्वपि स्यादह अत्रापदनापद्भ्यां व्यवस्था देशांतरं ता
ह बृहस्पतिः महानद्यंतरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यंते तत्तद्देशांतरमुच्यते वाचो दश भाषाः त
देदउभयत्रोषइति द्वावेपक्षौ वाशब्दस्यैकत्वात् मातापित्रोस्तु सर्वत्र पूर्णमेवाशौचं पितरौ चेन्मृतौ स्यातां दूर
स्थोपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति पारस्करोक्तेः स्त्रीपुंसयोः परस्परं सपत्न्यौश्च वे
ति स्मृत्यर्थसारे सापत्नमातुस्तु त्रिरात्रं व्याघ्रः तुल्यं वयसि सर्वेषामतिक्रांते तथैव च अथाशौचसंपाते
निर्णयः तत्र पूर्वाशौचस्य द्वितीयाद्यहःसु पदि सजातीयं शिवेजननं वा समंन्यूनं वा स्यात्तदा पक्षषद्भृ.पूर्व

राम ६२

शेषेण शुद्धिः अथ राजन्मरणे शेषाहोभिर्विशुध्यतीति याज्ञवल्क्योक्तेः इदं पूर्णाशौचे अल्पाद्यल्पाशौचसंपा
तेऽनन्तरमेवेति गौडाः हरदत्तोप्येवं अन्ये तु तत्रापि पूर्वेण शुद्धिमाहुः यदा तु जनने शावं सममन्यूनमधिकं वा तदा
परमेव कार्यं न पूर्वशेषाच्छुद्धिः अस्पृश्यत्वाधिक्यात् शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति षड्विंश
न्मतात् मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति कौर्माच्च षडशीतौ तु स्वभावबहुसूतिस्तु न्यूनशावविशो
धिनीति शावस्यापि सूत्यानिवृत्तेरुक्ता अहादि शावमध्ये सजातीयं वा दीर्घकालमुत्तरं चेत्तदामपूर्वेण शुद्धि
रित्यपरार्कः शुद्धिविवेके तु शावेन शुध्यते सूतिरिति त्वविशेषात्तत्रापि पूर्वेण शुद्धिरुक्ता तच्च उत्तरस्य कालाधिक्ये
न बलवत्वात् यथा त्रिरात्रे प्रक्रान्ते दशाहं प्रविशेद्यदि आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यतीति यमोक्तेरिति मा
धवहरदत्तमिताक्षरादयः इदं शावेन शुध्यते सूतिरित्यस्य बाधकं अन्यथा वचनवैयर्थ्यात् तेन सूत्याशावत्रिरात्रशु
द्धावपि शावनिमित्तमस्पृश्यत्वं भवत्येव गरीयो मरणं भवेदिति कौर्मात् पूर्वशेषशुध्येरप्रवाहमाहशातातपः रात्रि

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु॰ कौ॰ ६४ शेषेप्यहाच्छुद्धिर्यमशेषे शुचिस्त्र्यहात् अत्र रात्रिशब्दो त्यहोरात्रपरः अहशेषे द्वाभ्यां प्रभाते इति स्मृतिरिति शंखलि-
खितोक्तेः अथ यदि दशरात्राः सन्निपाते पुराद्यं दशरात्रमशौचमानवमाद्दिवसात्तद् ऊर्ध्वं द्विरात्रेण व्युष्टायां त्रिरात्रेणे-
ति बोधायनोक्तेश्चेति पराशरमाधवः हारीतेन तु शुद्धिर्तत्वादयो गौडाः अप्येवं रात्रिमात्रवृद्धे इति तु विज्ञानेश्वराद-
यः अत्र देशाचारतो व्यवस्था विशेषे निर्णयसिंधौ ज्ञेयः रात्रिशेषे त्रिरात्रादिसंपाते तु पूर्वशेषेणैव शुद्धिः पूर्वाशौ-
चांतवर्धितद्वित्रिदिनमध्येधिकाशौचांतरपाते तु वर्धितस्याल्पत्वादधिके नैव शुधिः न च वर्धितस्य पूर्वशेषत्वं
रात्रिशेषे शुध्यपवादे नैमित्तिकी द्वित्त्न्यायोज्जीवनात् अपवादाभावे उत्सर्गप्राप्तेः अपवादांतरमाह शंखः
मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता पितुः शेषेण शुद्धिः स्यान्मातुः कार्यातु पक्षिणीं पित्राशौचमध्ये मातृ-
र तौ पक्षिणीमधिकां कुर्यादिति तु यत्पादार्थः इदं दशमदिनात्पूर्वं मातृमरणे दशाभ्यां रात्रौ तत्प्रभाते वा मातृमर- राम
णे त्र्यहः अहयोः पक्षिण्याः समुच्चय इत्येके तन्न संख्यांतरापत्त्या त्र्यहादिश्रुति बाधापत्तेः अत एवैकादेया षडूदे्ये ६४

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

इत्याहोशन संख्याबाधापत्तेः समुच्चयो निरस्तो द्वादशाध्याये मातुरन्वारोहणे तु पक्षिणी यदा नारी विवेदग्निं प्रियस्य
प्रियवांछया तदा शौचं विधातव्यं भर्तृशौचक्रमेणहीति पृथ्वीचंद्रोदये लघुहारितोक्तेः मातापित्रोर्भर्तुश्चान्यसपिं
डाशौचेन निवृत्तिर्नास्त्येव श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति स्मृतेः भर्तृशौचोत्तरमन्वारोहणे त्रिरात्रं
त्र्यहासौचे तु निर्हरणे आद्यं प्राप्नोति शास्त्रतः इत्यपरार्के ब्राह्मोक्तेः सहगमने तु संपूर्णं युद्धहतस्य सद्यः शौचेन्वा
रोहणे ब्राह्मोक्ते स्त्रिरात्रत्वाद्भर्तुरपि त्र्यहेण पिंडदानं एकचित्तौ तु सद्यः शौचं षडशीतौ पूर्वशौचेनयाच्छुद्धिः
सूतके मृते च सा सूतिकामग्निं दहित्वा प्रेतस्य च सुतानपि मातुः पक्षिणी मध्ये पितुरेकादशाहे वृषोत्सर्गादिकार्य
मेवेति देवयाज्ञिकः अथाशौचापवादः शुद्धितत्वे कौर्मे सद्यः शौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे डिंवाहतानां
च विद्युतापार्थिवैर्द्विजैः उपद्रवे त्वंतमरके पराशरोपि उपसर्गमृते चैव सद्यः शौचं विधीयते उपसर्गोत्यंतमरके इति शू
लपाणिं हारलतादयः तथा सुभूर्षाहानाशौचं आपद्यपि च कष्टायां सद्यः शौचं विधीयते इति याज्ञवल्क्योक्तेः ३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू॰ क॰ ६५

द्विरत्नाकरे दक्षोपि स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं अपहृतस्य सर्वस्य सूतकेपि न सूतकं चेताः कारवः शि
ल्पिनो वैद्या दासीदासास्तथैव च राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः कारवः सूपकाराद्याः शिल्पिनश्चि
लधावाद्याः लघुविष्णुः व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे आचरेत्सूतकं न स्यादनारब्धे तु सूतकं प्रारंभो वरणं
यज्ञे संकल्पो व्रतसत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया यत्तु विष्णुः न व्रतीनां व्रते इति तथा रच्चप
रं त्रिंशच्छ्लोक्या न प्रारब्धेषु दानोपनयनयजनश्राद्धयुद्धप्रतिष्ठाचूडातीर्थयात्राजपपरिणयनाद्युत्सवेष्वेत
दर्थे अपि छेदेन भारतहरिवंशादिश्रवणेपि नाशौचं गृहीतानियमस्यांजिनेस्यादन्यस्य कस्यचिदिति ब्राह्मोक्तेः
चंद्रिकां जाबालः संध्यां पंचमहायज्ञान्नैत्यकं स्मृतिकर्म च तन्मध्ये हापयेत्तेषां दशाहांते पुनः क्रिया ग्रहणे
चाशौचमध्येपि श्राद्धदानादिकार्यमेव तावदेव शुद्धिर्यविन्मुक्तिर्न दृश्यते इति लैंगोक्तेः अथ मृतदोषे हेमाद्रौ
षड्विंशन्मतकौर्मयोः व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः विहितं तस्य नाशौचं नापि कार्योदकक्रिया

राम ६५

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भविष्ये स्वेच्छयामरणंविप्राद्यंगिरिवृक्षसरीसृपैः अस्पृश्यांत्यजविशेषैर्दुंष्टैरात्मनाचैवताडनैः पाखंडमाश्रिताश्चैवमाहापात
किनस्तेस्तथा स्त्रियश्चव्यभिचारिण्यआरूढपतितास्तथा नतेषांस्नानसंस्कारोनश्राद्धंनपपीडनं एतानिपतितानांतु
यःकरोतिविमोहितः तप्तकृच्छ्रद्वयेनैवतस्यशुद्धिर्नचान्यथा इदंकामतः अज्ञानस्वधींस्पर्शाश्रूणांज्ञानतस्त्रिरात्रं अज्ञा
नेएकोपवासइत्यादिनिर्णयसिंधौज्ञेयं इदंदयाबुद्धिपूर्वंमृतेज्ञेयं अबुद्धिपूर्वंप्रमादहतेतुसर्वंकार्यं अथकश्चित्प्रमा
देनम्रियेताग्न्युदकादिभिः तस्याशौचंविधातव्यंकर्तव्याचोदकक्रिया इत्यांगिरसोक्तेः प्रमादमरणेत्रिरात्राशौचंभिः
तिशुद्धितत्वादयोगौडाः दशाहादितिदाक्षिणात्याः अस्यापवादोहेमाद्रौभविष्ये प्रमादादिच्छयावापिनकुर्यात्सर्पतोमृ
ते नागपूजाविनानेत्यर्थः तत्रप्रमादमृतेदुर्मरणेनिमित्तंदानायुक्तं शातातपेन व्याघ्रेणनिहतेविप्रेविप्रकन्यांवि
वाहयेत् सर्पदष्टेनागबलिर्देयः सर्पश्चकांचनेत्यादिना तन्निर्णयसिंधौज्ञेयं सर्वदष्टेपिव्यासः सौवर्णभारनि
ष्पन्नंनागंकृत्वातथैवगां व्यासायदत्वाविधिवत्पितुरानृण्यमाप्तवान् हेमाद्रौभविष्ये पंचम्यांपन्नगंहेमंस्वर्णे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शु॰क॰ नैकेन कारयेत् सीराज्यपात्रमध्यस्थं रूप्यविप्राय दापयेत् प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शंभुना सर्पात्सर्पमृते नारा
६६ यणबलिनास्य समुच्चयः तथा वैधमरणे विनदोषः वृद्धः शौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं दत्वा चतुर्थे श्रा
द्धमाचरेदिति वृद्धगार्ग्योक्तेः अपरार्के ब्रह्मगर्भः या जीवितुं न शक्नोति महाव्याध्युपपीडितः सोग्न्युदकं महायात्रां
कुर्वन्नामुत्र दुष्यति तच्च प्रयागभिन्ने देशे रोगिणामेव तदपि जीर्णवानप्रस्थस्यैवेति विज्ञानेश्वरादयः प्रयागे त्वरो
गिणामपि विशेषतः शूद्रस्याप्यत्रापि अब्राह्मणो वा स्वर्गादिमहाफलजिगीषया प्रविशेज्ज्वलनं दीप्तं करोत्यन
शनं तथेत्यादिपुराणात् इदं वृद्धादिमरणं यद्यपि भृग्वाग्निपतनैश्चैव वृद्धादिमरणं तथेति माधवीये आदिपुराणोक्तेः
कलौ निषिद्धं तथापि प्रयागे भवत्येव ये वै तन्वं विसृजंतीति श्रुतेः न लोकवचनात्तात न वेदवचनादपि मतिरुत्क्रा
मणीया ते प्रयागमरणं प्रतीति भारतमात्स्योक्तेः तत्र यो मुंचति प्राणान् वटमूलेषु सुंदरी सर्वलोकानतिक्रम्य मम राम
मलोकं प्रपद्यते इति वाराहोक्तेः अत्र दशाहादि पूर्णाशौचमिति भट्टाः सकृत्तु त्रिरात्रं अनशनमृतानामशानि ६६

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

हतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशांतरमृतानां जातदंतानां च त्रिरात्रमिति शुद्धितत्वे काश्यपोक्तेः दिवोदासोप्येवं
यश्च कुर्वीत आत्मघातिनो दाहो वारिनिषेधः स तद्दानीमेव वर्षांते तु सर्वं कुर्यात् गोब्राह्मणहतानां च पतितानां तथैव
च ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवोर्ध्वदेहिकमिति हेमाद्रौ षड्त्रिंशन्मतात् तत्रात्मवधप्रायश्चित्तं नारायणबलिश्लोकेः
तत्रैवात्कृत्वा चांद्रायणं पूर्वं क्रिया कार्या यथाविधि नारायणबलिः कार्यो लोकमहीनया ततो पिंडादकक्रियाः पश्चा
द्वृषोत्सर्गादिकं च यत् एकोद्दिष्टानि कुर्वन्तः सपिंडीकरणं तथा मदनरत्ने ब्राह्मे तु प्रमादादपि निःशंकस्त्वकस्मादि
धिनोदितः चंडालैर्ब्राह्मणैर्श्वौरैर्निहतो यत्र कुत्रचित् तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः चांद्रायणं तप्त
कृच्छ्रद्वयं तस्य विशुद्धये षड्व्दाकृच्छ्रान् पंचदश कृत्वा तु विधिना दहेत् बुद्धिपूर्वमृतानां तु त्रिंशत्कृच्छ्रं समाचरेदित्युक्तं स्मृ
तिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वा वा गर्ह्योऽप्येत्सर्वं कार्यमित्युक्तं नारायणबलिस्तु मिताक्षरायां मतत्वनिर्णयसिं
धौ च ज्ञेयः विदेशे मृते तत्क्षणमेव संभवे दाहः तदभावे पालाशो दृतैः तदभावे पालाशो दृतैः तदभावे कुशैः विदेश

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

रणेस्थीनि श्राहृत्या मृज्यं सर्पिषा अरुछामलाभेषार्णानिशाकलान्युक्तयादत्ता दाहयेदस्थिसंख्यानि तत्प्रभृतिसृत
कं हेमाद्रौषड्विंशान्मते कुर्याद्दर्भशयेप्रेतकुशैस्त्रिंशतषष्टिभिः पालाशीभिः समिद्भिर्वासंख्याचैवंप्रकीर्तिता मद
नरत्ने यज्ञपार्श्वः शिरस्यशीत्यर्धंतद्ग्रीवायांतुदशैवतु शैवबाह्वोचैकशतंदद्यादशचैवांगुलीषुच उरसित्रिंशतं
दद्याद्विंशतिजठरोदरे द्वादशार्धंवृषणयोरष्टार्धंशिश्नएवतु ऊर्वोश्चैकशतंदद्यात्रिंशतंजंघयोर्द्वयोः पादांगुली
षुदशदद्यादेतत्प्रेतस्यकल्पनं मस्तकेनारिकेलंतुआलांबुतालुकेतथा पंचरत्नंमुखेन्यस्यजीह्वायांकदलीफलं
चक्षुषोस्तुकपर्दौद्वौनासिकायांतुकालकं कर्णयोर्ब्रह्मपत्राणिकेशेवटप्ररोहकाः नालकंकमलानांतुअंत
स्थानेविनिक्षिपेत् मृत्तिकातुवसाधातुहरितालकगंधको शुक्रेतुपारदंदद्यात्पुरीषेपित्तलंतथा संधीषुतिलपिष्टं
तुमांसस्यायवपिष्टकं मधुस्याल्लोहितस्थानेसृगत्वच स्तनयोगुंजकेदेयेनासायांशतपत्रकं कमलंन्नाभिदेशे ६७
स्याद्वृंताकेवृषणश्रिते लिंगेचरक्तमूलंतुपरिधानंदुकूलकं गोमूत्रंगोमयंगंधंसर्वौषध्यादिसर्वतः क्रियानिबंधे

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

णरुद्देलेदद्यंते घृतंनाम्याप्रदेयंस्यात्कोपीनेचत्रयुस्मृतं मोक्तिकेस्तनयोर्मूर्ध्नि कुंकुमेनविलेपनं प्रोषितस्यवार्त्ताश्रव
णाभावेतु पितुःपंचदशाहानिप्रतीक्षातदन्यस्यद्वादशाब्दानतीतिमदनरत्नेउक्तं तत्रपत्नीपुत्रयोःपूर्वमगृहीताशौच
योःपूर्णाशौचंगृहीताशौचयोस्त्रिरात्रं द्वादशवर्षप्रतिक्षोत्तरंदाहेतुपुत्रादीनांसर्वेषांत्रिरात्रमितिकल्पतरः पर्ण
शरदाहोत्तरमस्थिपलंभेतुमदनरत्नब्राह्म्ये अथपर्णनरेदग्धपात्रन्यासेकृतेसति गतेषण्मिषुत्तदेहोयद्यपूर्ध्वंलभ्य
तेकश्चित् तदार्धदग्धकाष्ठानितानिनिर्मथ्यतंदहेत् यद्यर्धदग्धकाष्ठंतुतदीयंनैवलभ्यते तदातदस्थिरंवंतुनिक्षि
प्तव्यंमहाजले अथप्रेतदाहकालः प्रत्यक्षशवदाहेनशोधनं आशौचमध्येसंस्कारेसतिसंभवेशोध्यं तदंतेशोध्यमे
वं अशौचांतेउत्तरायणंश्रेष्ठं तत्रापिशुक्लपक्षः भरणीकृत्तिकारोहिण्यार्द्रामघाश्लेषामूलत्रिपादज्येष्ठाधनिष्ठादिपंच
जन्मदशमैकोनविंशताराः चतुर्थाष्टमद्वादशचंद्रदिनक्षयवैधृतिव्यतीपातपरिघविष्टिकरणंनंदाभद्रात्रयोदशी
चतुर्दशीतिथिशुक्रभौमशनिवारगुरुशुक्रास्तपौषमलमासाः सर्वथावर्ज्याः मन्वादियुगादिसंक्रांतिदर्शेषुवि.

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मपि शेषं मूलं विशेषश्च निर्णयसिंधौ ज्ञेयः इति नारायणभट्टसूनु रामकृष्णभट्टसूनु कमलाकरभट्टकृते शूद्रधर्म
तत्त्वे आशौचनिर्णयः अथ शूद्रस्यौर्ध्वदैहिकप्रयोगः तत्राधिकारिणो निर्णयसिंधौ ज्ञेयः सर्वाभावे धर्मपुत्रो वा कार्यः
अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः पिंडनिर्वाहे धर्मसंस्थापनायेति व्यासोक्तेः दिवोदासीये दक्षः स्नान
स्थमासन्नधर्मोन्मीलितलोचनं भूमिस्थं पितरं पुत्रो यद्विहानं प्रदापयेत् तद्विशिष्टं गयाश्राद्धादश्वमेधशतादपि भार
ते शुक्लपक्षे दिवा भूमौ गंगायां चो नारायणे धन्यो स्नान मरिष्यं च हृदयस्थे जनार्दने हेमाद्रौ वाराहे व्यतीपातोथ संक्रांति
स्तथैव ग्रहणं रवेः पुण्यकालस्तदा सर्वे यदा मृत्युरुपस्थितः तत्रैव व्यासः आसन्नमृत्युना देया गौः सवत्सा तु पूर्व
वत् तदभावे तु गौरेव नरकोत्तारणाय वै तदा यदि न शक्नोति दातुं वैतरणीं तु गां शक्तोन्यो रुक्तदानत्वाद्दद्याद्वै यो
मृतस्य तु महनरलेनात्कु..र्यः उत्क्रांत्यादीनि दानानि दश दद्यान्मृतस्ये तु गोभूतिलहिरण्याज्यं वासो धान्य ६८
गुडानि च रौप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् एतानि दश दानानि नराणां मृत्युजन्मनोः कुर्यादभ्युदया

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

र्थं तु प्रेतेपि हि परत्रैव श्राद्धे ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रं द्विजाय तु सहिरण्यं च योदद्यात्सुखाप्तिविंत्तानुसारतः सर्वपापविशु
द्धात्मा लभते गतिमुत्तमां उत्क्रांति वैतरण्यो च दशदानानि चैव हि प्रेतेपि कृत्वा तत्रैतं शवधर्मेण दाहयेत् क्रियानिबंधे
गारुडे त्वष्टौ दानान्युक्तानि तुलसीसन्निधौ कृत्वा शालग्रामशिलां तथा तिल लोहं हिरण्यं च कार्पासं लवणं तथा स
प्तधान्यं क्षिति गौ वर् एकैकं पावनं स्मृतं तिलपात्रं यथाशक्ति शय्यादानं च कारयेत् इति परिशिष्टे म्रियमाणस्य क
र्णे तु पुण्यमंत्रानु जपेत्ततः मुमूर्षोर्मधुपर्कदानमुक्तं वाराहे दद्यात् सुविह्वलस्यैनं यममार्गानुसारिणां प्रयाणकाले तु न
रो मंत्रेण विधिपूर्वकं मधुपर्कं त्वरन्गृह्य इमं मंत्रमुदीरयेत् गृहाण चेमं मधुपर्कमाद्यं संसारनाशनकरं त्वमृतेन तुल्यं
नारायणेन रचितं भगवत्प्रियाणां दाहे च शांतिकरणं सुरलोकपूज्यं अनेनैव तु मंत्रेण दद्याच्च मधुपर्ककां नरस्य मृत्युकाले तु
परलोकसुखावहां देवज्ञानीयेप्येवं अथ प्रयोगः पुत्रादिरासन्नमृत्युं पित्रादिं ज्ञात्वा षडब्दं त्र्यब्दं सार्धाब्दं वा प्रायश्चि
त्तं कारयेत् यथा सप्त पंच त्रीन् एकं वा द्विजं पर्षद् समुपवेश्य दत्वा साष्टवर्णरौप्ययोनिष्कं नदर्धं वा गोरूस्तच्चतुर्गुणं दक्षस्यै तस्यैवं गो

दयमुत्थंध्याय सा॑ष्टांगंप्रणम्यैनेः किंतेकार्यमितिपृष्टेमयाअजन्मप्रभृत्यद्ययावज्ज्ञानाज्ञानकामाकामसकृदसकृ
त्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतज्ञानाज्ञानसकलपातकातिपातकोप
पातकसंकरीकरणमलिनीकरणजातिभ्रंशकरणप्रकीर्णपातकानांनिरासार्थमनुग्रहंकृत्वाप्रायश्चित्तमुपदिश
तुंभवंतः इत्युक्ताः सर्वेधर्मविवेक्तारोगोप्तारः सकलाद्विजाः ममदेहस्यसंशुद्धिंकुर्वंतुद्विजसत्तमाः मयातत्कृतमहाघो
रं ज्ञातमज्ञातकिल्बिषं प्रसादक्रियतांमह्यंशुभानुज्ञांप्रयच्छथ पूज्यैःकृतःपवित्रोहंभवेयंद्विजसत्तमेरितिपठेत
छ्रणुयद्विनिष्कस्तुचतुःसुवर्णःपुत्रादिस्तस्यैत्यादिवदेत् ततःसभ्यास्तस्यशक्त्यानुसारेणप्रायश्चित्तमनुवादकेना
नपरेयुः तदाशोध्योगंधादिनापुस्तकस्यसभ्यानामनुवादकस्यचपूजांकृत्वा तस्मैदक्षिणांपापानुसारेणदद्या
त् गोमूल्यंनिबंधपूजालेनपुस्तकेनिवेदयेदित्याचारः ततःसभ्याश्रमुकप्रायश्चित्तेनपूर्वोत्तरांगयुतेनयथाश
क्तिप्रत्याम्नायद्वाराचीर्णेनत्वंशुद्धोभविष्यसीत्यनुवादकाग्रेब्रूयुः शोध्यस्त्वनुग्रहइत्युक्त्वारिक्तायांनद्यारोग १९

त्वाचम्य देशकालौ स्मृत्वा मम जन्मप्रभृतीत्यादीनि राशार्थमित्यं न मुक्त्वा सम्योपदिष्टममुकप्रायश्चित्तपूर्वोत्तरांगयु
तममुकप्रत्याम्नायद्वारा यथाकालं करिष्ये इत्युक्त्वा यानि कानि च पापानि ब्रह्महत्यासमानि च केशानाश्रित्य तिष्ठंति
तस्मात्केशान्वपाम्यहमिति कक्षोपस्थवर्जं केशश्मश्रून्नखानि वापयित्वा आयुर्बलमिति तथा वनं कृत्वा तूष्णीं स्ना
त्वा प्रायश्चित्तांगत्वेन भस्मस्नानं करिष्ये रुद्राय नम इत्युक्त्वा भस्मना स्नात्वैव गोमयमृद्वारि गोमूत्रगोमयक्षीरदधि
सर्पिः कुशोदकैः स्नात्वा धौतवासः परिधाय तिलकं धृत्वा गवामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं
मे स्यादिह लोके परत्र चेत्यादि गोदानं कृत्वा पापहारिविष्णुप्रीत्यर्थं चतुरादियुग्मामात्रानि दत्वा पंचगव्यं प्राश्नी
यान्न वा आज्यहोमस्तु न श्रूयते आज्येनैव हि शालाग्नौ जुहुयाद्व्याहृतीः पृथगिति जाबालिना गृह्याग्निनिय
मात् अग्नेः प्रतिनिध्यभावाच्च तस्माद्धूः इसमनाद्यसदोषमर्यथेत्थितं प्रायश्चित्तं प्रशानव्यंजपहोविवर्जि
तमिति पराशरोक्तेश्च तेन विप्रद्वारा होमः प्रशस्तः ततः स्वदिने उपवासी मौनी निरामबाह्यीर्थयात्राद्वा

शामान्त गोदानद्वादशस्नानादिप्रत्याम्नाये: प्रायश्चित्तं कृत्वा विष्णुश्राद्धं त गोदानानि प्राग्वत् कृत्वा पूर्वोक्तदशदाना
नि दद्यात् दानमंत्रास्तु मत्कृते दानकमलाकरे ज्ञेयाः ततो वैतरणीदानं यथादेशकालौ स्मृत्वा मम यमद्वारस्थ नद्या
सुखेनोत्तरणार्थं दिव्यमानुष्यसर्वसुखप्राप्त्यर्थं वैतरणीदानं करिष्ये इत्युक्त्वा द्रोणप्रमाणकार्पाससशिरोपरिताम्र
पात्रे हैमं महिषारूढं दक्षिणकरे लोहदंडं वामे पाशं च दधानं यमं संपूज्य तत्रेक्षुदंडमयीं नौकां पट्टसूत्रेण बध्वा त
त्र स्थां कृष्णधेनुं सवत्सां स्वर्णशृंगीं रौप्यखुरकांस्यदोहान कृष्णवस्त्रयुगसप्तधान्यछत्रोपानद्युतां संपूज्याधिवास्य
परदिने पात्रं कृत्वा संपूज्य प्राङ्मुखः घृतदुग्धं कुशहेमतिलयुतं पुच्छं गृहीत्वा देशकालौ स्मृत्वा पूर्वोक्तफलोल्ले
खांते इमां कृष्णगां द्रोणकार्पासशिखरे हैमयमहेमशृंगीं रौप्यखुरकांस्यदोहनं कृष्णवस्त्रयुगसप्तधान्यछत्रोपानद्युग
युपस्करयुतामशक्तौ गामेवामुकगोत्राय तुभ्यमहं संप्रददे न मम इत्युक्त्वा मंत्रं पठेत् यमद्वारे महाघोरे कष्टा वैतरणी
ती ततुकामो ददाम्येनां तुभ्यं वैतरणीं च गां अधिवासनेयमंत्रं मेंइत्येके विष्णुरूपद्विजश्रेष्ठ भूदेवपंक्ति पावन सद

राम
७०

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

क्षिणमयातुभ्यंदत्तांवैतरणीचगौः यद्वा यमद्वारेमहाघोरेयासावैतरणीनदी तांततुंगांददाम्येनांतुभ्यंवैतरणीमहिमि
तिरत्वा धेनुंयमंविप्रंचप्रदक्षिणीकृत्यसर्वंनिवेद्य धेनुकेद्यंप्रतिक्षस्वयमद्वारेमहाभये उत्तितीररहंदेविवैतरण्येनमो
नमः इत्यनुछेत् इतिवैतरणीदानं दिवोदासीयेन्यान्यपिदानान्युक्तानि यथा मोक्षंदेहिहृषीकेशमोक्षंदेहिजनार्दन
मोक्षंधेनुप्रदानेनमुकुंदः प्रियतांममेति मोक्षधेनुं ऐहिकामुष्मिकंयच्चसप्तजन्मार्जितंऋणं तत्सर्वंशुद्धिमायातु
गामेतांददतोममेति ऋणधेनुं आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः तत्सर्वंनाशमायातुगोप्रदानेनकेशव
तिपापधेनुंदद्यात् अथदुर्मरणेप्रायश्चित्तं तत्रचांडादिहतेंतरिक्षमृतेकृच्छ्रातिकृच्छ्रचांद्राणि रजस्वलांसूतिका
सस्पर्शास्लेछहतेचकृच्छ्राब्दः ऊर्ध्वोच्छिष्टोभयोच्छिष्टचंडालश्वक्रव्यादस्पर्शेखट्वांगमरणेशावेकृमीकीटोद्भवेत्रीन्
वाद्यपंचदशवाकृच्छ्रान्चांद्रत्रयंवाकृत्वादहेत् अंत्यजस्यचर्महृकृच्छ्राब्दंवा प्रायानेविषेवानवकृच्छ्राः शृंगीविप्रशस्त्रचा
राघेरात्मघातेब्दं शावेपर्युषितेकृच्छ्रत्रयः आरोग्येचमरणेप्येवं मूलंतुमल्लकेतेनिर्णयसिंधौज्ञेयं तेनततः पूर्णपस्तो

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

त्रं रामकृष्णादिनामजपं कुर्यात्कारयेद्वा ततः प्राणोत्क्रमणे जाते पुत्रो वपनं कृत्वा स्नात्वा नववस्त्रैकदेशं परिधाय तदेक
देशमुत्तरीयं कृत्वा प्रेतस्य वपनं कृत्वा स्नापयित्वा वासश्छाद्य पुष्पमालाद्यैरलंकुर्यात् मदनरत्ने गालवः प्रथमेहनि क
र्त्तव्यं वपनं चानुभाविनां प्रेतस्य केशश्मश्रोर्दिवापयित्वाथाहारयेत् मनुः दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् अ
न्त्रक्रियानिबंधे गारुडे षट्पिंडा उक्ताः मृतस्योत्क्रांतिसमये षट्पिंडान्क्रमशो ददेत् मृतिस्थाने महाद्वारि चत्वरे
ताक्ष्यं कारणात् विश्रामे काष्ठचयने तथा संचयने च षट् तथा आद्दौदियास्तु षट्पिंडा दशाहिकाः स्थाने वार्धपथे
ते चितायां शवहस्तके श्मशानवासिभूतेभ्यः षष्ठं संचयने तथा छंदोगपरिशिष्टे दुर्बलं स्नापयित्वा तु शुद्धाभिल
भिसंवृतं दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निधापयेत् घृतेनाभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवीतिनं चंदनोक्षितसर्वां
गं सुमनोभिर्विभूषयेत् हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः स ७१
प्तछिद्राणि तत्रैव कर्णे नेत्रे मुखे घ्राणे हि॰ण्यशकलं न्यसेदित्यन्यत्रोक्तं आमपात्रेन्नमादाय प्रेतमग्निपुरःसरं

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

एकोनुगच्छेत्तस्यार्धमर्धपथ्युत्सृजेद्बुधः ऊर्ध्वमादहनं कार्यं मासीनो दक्षिणामुखः सव्यं जानिपात्य शनकैः सतिलपिंडदा
नवत् अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत् तत्रोत्तानं निपात्यैनं दक्षिणाशिरसंमुखे एतदग्रे पात्रन्यासोक्ते
रुत्तानत्वमग्निपरं शूद्रः पुमानधोमुखः स्त्री तूत्तानादाह्या तदुक्तं भुट्टत्वे हारलतायां चादिपुराणे स्वगोत्रजैर्गृ
हीत्वा तु चितामारोप्यते शवः अधोमुखो दक्षिणादिक्चरणस्तु पुमानपि उत्तानदेहा नारी तु सपिंडैरपि बंधुभिरिति
इदमन्ये ब्राह्मणमुक्तं इदं निरग्निद्विजपरमपीति गौडाः स्मृतिकौमुद्यां मदनपालस्तु सदर्भमुपेतश्चेदाहिताग्न्या
हितार्थवदिति निरग्नेरप्याहिताग्निवद्दाहोक्तेस्तस्य च कात्यायनेन तत्रोत्तानं निपात्यैनं दक्षिणाशिरसंमुखे इत्युत्ता
नत्वोक्तेर्निरग्नेरपि तद्वेद्याह तत्वविदेहेन कथमुपदेशस्य बाध इति चिंत्यं केचित्तु वाचनिकानि देहस्योपदेशात्तुल्य
त्वादुपेतश्चेदित्यस्याद्विजपरत्वाद्ब्राह्मणे तु तत्सद्भावाच्छूद्रपरत्वमेवेति न द्विजानामुत्तानत्वमेवेत्याहुः अन्ये तु छं
दोगद्विजानामुत्तानत्वमन्येषामधोमुखत्वमित्याहुः छंदोगमुत्तानत्वमास्तां निरग्निद्विजवार्त्ता अनुपनीतद्विजभ

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शूद्राणांत्वधोमुखत्वमुरकूशिरस्त्वंचेत्यविवादं दाहस्त्वशूद्रस्यामंत्रकः निषेकादिस्मशानांतोमंत्रैर्यस्योदितोविधिरिति
शूद्रेमंत्रवत्वोक्तेरितिमदनपालः तत्वंतुवैदिकस्यैवनिषेधः पौराणस्तुभवत्येव सचप्रयोगेवक्ष्यते अतएववाराहे
चतुर्वर्णेषुसंस्थानमेवंभवतिपुत्रिकेइत्युक्तं प्रचेताः नग्नदेहंदहेनैवकिंचिद्देयंपरित्यजेत् यमः प्रेतदेहंशुभैर्गंधैः
स्नापितंस्रग्विभूषितं क्रियानिबंधेगारुडे पत्योरेकदामृतौतुबौधायनः दाहांतमेकतंत्रत्व संचयनेचैकं उदक
पिंडदानादिपृथगेवअन्वारोहणेचैवं उदकदानंब्राह्मे आर्द्रेतुवस्त्रेप्रक्षाल्यतेनैवाछादितैस्ततः कर्त्तव्यंतैःस
चैलंतुस्नानंसर्वमलापहा ततःपाषाणपृष्ठेतुसर्वैर्दर्भतिलोदकं त्रिंशाद्धूद्रायदेहास्तुप्रेतभूमिगतायच वि
शेषनिर्णयसिंधौज्ञेयः अथप्रयोगःपुत्रादिरपसव्येनदेशकालौस्मृत्वा काश्यपगोत्रस्यास्मत्पितुरमुकदा
सप्रेतस्यप्रेतत्वनिवृत्त्याउत्तमलोकप्राप्त्यर्थमौर्ध्वदैहिकंकरिष्येइत्युक्त्वा मृतिस्थानेदर्भेकाश्यपगोत्रामुक
दासप्रेतेदंतेवनजनं एषतेपिंडःप्रत्यवनेजनंच एवंउत्थापनपिंडंदत्वाप्रेतवस्त्रेपिंडंबध्वादक्षिणद्वारानये १२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

त् द्वारे च तुष्पथे विश्रांतौ चितायां चैवं देयाः ततः शुचिदेशे पंचभूसंस्कृते क्रव्यादसंज्ञिकाग्निं प्रज्वाल्य गंधमाल्यैः संपूज्य
प्रेतस्य वपनं कारयित्वा स्नापयित्वा गंधमाल्यैरलंकृत्य मुखसप्तछिद्रेषु हेमशकलाभावे आज्यं वा क्षिप्त्वा नववस्त्रवे
ष्टितं घृताक्तं कृत्वा चितोऽत्तरशीर्षमधोमुखं पुरुषमुत्तानां स्त्रियं निधाय असौ यमलोकाय स्वाहेति तूष्णीं वाज्याहु
तिं दत्वा शिरःस्थाने दद्यात् मंत्रस्तु वाराहे कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्य न
रं पंचत्वमागतं धर्माधर्मसमायुक्तं लोभमोहसमावृतं दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु ज्वलमानं महा
वह्निं शिरःस्थाने प्रदापयेत् चतुर्वर्णेषु संस्थानमेवं भवति पुत्रिके चतुर्वर्णोक्तिरनूपनीतद्विजपरा क्रियानिबंधेग
ह्ये त्वन्यो मंत्रः उक्तः त्वं भूतकृज्जगद्योने त्वं लोकपरिपालकः उक्तः संहारकस्तस्मादेयं स्वर्गं मृतं नयेति ततः किं
चिच्छेषे दग्धे सेकुंभमादाय पादतो प्रदक्षिणं त्रिः परिक्रम्य त्रिरश्मना कुंभं भित्वा कुंभं क्षिप्त्वा न वीक्षमाणाः बालपु
रःसरा जलं गत्वा पूर्वघृतं वस्त्रं प्रक्षाल्य पुनः परिधाय वामानामिकया जलमालोड्य दृष्ट्वा ध्याः स्नात्वा अघे स

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

दि प्रथमदिनविधिं करिष्ये ततः अमुकप्रेत अद्येहनि शिरोवयवनिर्वृत्त्यर्थं अयं पिंडस्तवोपतिष्ठतां पिंडं दत्वा अना
दिनिधन इति मंत्रमुक्त्वा विसृज्य ततः नग्नप्रछादनं अद्येत्यादि प्रथमेहनि नग्नप्रछादनं करिष्ये आसनादि दत्वा आमं
दत्वा नग्नछादनं श्राद्धे इदं आमान्नं यथाशक्ति सोपस्करं सघृतं सोदकुंभं सवस्त्रं सकांस्यं यथाशक्ति सुवर्णरजतलो
हतैलोपेतं सोपानकं सोदकपात्रं उपतिष्ठतां इति उक्त्वा ततः पिंडं दत्वा अनादिनिधन इति विसृज्य स्नानं तत्पूर्वव
त् तीरे दर्भे पाषाणं निधाय ऋजुदर्भं तिलजलपूर्णांजलिं काश्यपगोत्रामुकदास प्रेत एष ते तिलांजलि
रुपतिष्ठतु उपतिर्वा सर्वे दक्षिणामुखाः सकृत्त्रिर्वा दत्वा पुनः स्नायुः मित्रोढा नूदकन्या भागिनेय श्वश्रू श्वशुर मातामह
मातृश्री मातुल राज्ञां उदकदानं कृतं तदा कृतं क्लीब भर्तृ गर्भपतितैरुदकं न कार्यं तेभ्योथ त्यैः एवं त्रिंशात्यं च दश दशवा
दिनानि नित्यहं दद्यात् प्रत्यहमेक वृद्धि द्विक वृद्धि त्रिक वृद्धिर्वा कार्या ततो बालपुरःसराजलावर्त्ती याधो दशं वस्त्रं ७२
निष्पीड्य गृहद्वारि स्थित्वा त्रीणि निंबपत्राणि विदश्याचम्य गोमय सर्षप दूर्वा अग्नीनालभ्य अश्मनि पदं निधा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

यत्रहंप्रविशेयुः द्वष्टाः शोकापनोदनं कुर्युः ततो मृन्मये पात्रे दुग्धे एकाहं त्र्यहं वा प्रेतात्र स्नाहीति जलं विवेदमिति क्षीरं नि
दध्यात् इत्यशौचमिति हेमाद्रौ प्रत्यहं भूमौ कर्त्ता भोजनसमेन्नं संकल्पयेत् ततस्त्र्यहमुपवासः क्रीतलब्धाशनं वा अथः
सप्यासनं सर्वेषां यावदशौचं प्रथमतृतीयसप्तमदशमेषु वा ज्ञातीनां सहभोजनं तच्चद्दिवैव बहिः प्रेतायदीयो देय
इत्यादि निर्णयसिंधौ ज्ञेयं अथ संचयनं तच्च प्रथमद्वितीयचतुर्थसप्तमनवमेषु शूद्राणां विशेषतो दशमे द्विः तदुक्तं
रं तु भौमार्कमदं तिथियुग्मैकपाद द्विपाद त्रिपाद कर्त्तृनक्षत्रवर्ज्जैर्दिने कार्यं कर्त्ता देशकालौ स्मृत्वा स्मत्पितुः काश्यप
गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वनिवृत्या उत्तमलोकप्राप्त्यर्थमस्थिसंचयनश्राद्धं करिष्ये इत्युक्त्वा कुशावनिधायः इ
हलोकं परित्यज्य गतोसि परमां गतिं मनसा वायुरूपेण विप्रे त्वाहं नियोजये अमुकप्रेतेदं त आसनमुपतिष्ठतां एव
मर्घ्यः गंधपुष्पं धूपदीप आच्छादनं उपतिष्ठतां मच्चक व्यादरे वतां अप्रेताय नत्वा शिरिक्य श्वत्रीण्यामन्त्रानि दत्वा द
तक्षीरोदके स्थितिं प्रोक्ष्य पालाशशाखया चितेर्भस्मापोह्य अंगुष्ठकनिष्ठिकाभ्यां शिरस उरसः पाण्योः पार्श्वयोः पा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

दयोरस्थीन्याहृत्य पंचगव्येन गंगोदकेन प्रक्षाल्य गंधाद्यर्चितानि क्षौमेणावेष्ट्य नवकुंभे निधाय शरावेणापिधाय वने वृ
क्षमूले वा भूमौ निखाय भस्म नद्यां क्षिप्त्वा चितिदेशे वेदिं कृत्वा तत्रावकाशमीपत्रछत्रपताकायुतकुंभत्रयं संस्थाप्य क्रव्या
ददैवताभ्यः प्रेताय तत्सखिभ्यश्च निवेद्य कुंभेषु पिंडान् दद्यात् मंत्रस्तु नमः क्रव्यादमुखेभ्यो देवेभ्य इह सर्वदा श्मश
नवासिनो देवाः शवानां परिकीर्तिता तेभ्योन्नमुदकं कुंभमक्षय्यमुपतिष्ठतु येत्र श्मशाने देवाः स्युर्भगवंतः सनात
नः तेस्मत्सकाशाद् गृह्णंतु बलिमष्टांगमक्षयं प्रेतस्य मस्य भानूलोकान्प्रयच्छंतु च शाश्वतान् अस्माकमायुरारोग्यं
सुखं च ददतां चिरं इति प्रथमं श्मशानवासिभ्यो मध्यमं प्रेताय तद्दक्षिणे तत्सखिभ्यश्च दत्वा स्नायात् शिष्टन्यस्थीनि
गंगायां क्षिपेत् तद्विधिस्तु हेमाद्रौ श्राद्धं तर्पणं च कृत्वास्थीनि पंचगव्येन प्रक्षाल्य हेममुक्तारौप्यप्रवालकान्यस्थि
मध्ये क्षिप्त्वा तीर्थं गत्वा स्नात्वा पंचगव्येन प्रोक्ष्य हिरण्यमध्वाज्यतिलैः संयोज्य मृत्पिंडे निधाय दक्षिणामुखो नमोस्तु ७४
धर्मायेति जलं प्रविश्य स मे प्रीतोस्तु इति क्षिप्त्वा विप्रेभ्यो दक्षिणां दत्वा पुनः श्राद्धं तर्पणं च कुर्यात् अत्र दशाहान्गोदा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नाद्दिकुर्वीत इदमधिकामासमध्येकाम्यान्येनकार्यं दशाहमध्येतुनदोषः अथपाथेयश्राद्धं काश्यपगोत्रस्यामुकदास
प्रेतस्यमनुष्यलोकात्प्रेतलोकंगच्छतः पाथेयसिध्यर्थंपाथेयश्राद्धंकरिष्ये इतिउक्त्वा कुशवटोइहलोकंपरित्यज्येति
प्रागुक्तमंत्रांतेइदंतेआसनमुपतिष्ठतां एवमर्घ्यगंधपुष्पंधूपदीपआच्छादनमामान्नंचोपतिष्ठतामितिसर्वत्रवदेत्
ततः इदंतेपिंडासनं अवनेजनंपिंडः प्रत्यवनेजनं पिंडपूजादक्षिणाच अयमेवसर्वप्रेतश्राद्धानांप्रयोगः एवंनवश्र
द्धादनंश्राद्धंकुर्यात् अथनवश्राद्धं तच्चविषमदिनेषुप्रथमतृतीयपंचमसप्तमनवमैकादशेषुकार्यं अमुकप्रेतस्यप्रे
तत्वविमुक्त्याउत्तमलोकप्राप्त्यर्थमाद्यैकविषमश्राद्धंकरिष्ये अत्रविप्रनिमंत्रणेमंत्रोवाराहे गतोसिदिव्यलोकत्वंकृतां
तविहितात्पथः मनसावायुभूतेनविप्रेत्वाहंनियोजये पूजयिष्यामिभोगैस्त्वामेवंविप्रंनिमंत्रयेत् अन्यत्राग्वत् भ
विष्ये नवसप्तविंशांराज्ञांनवश्राद्धान्यनुक्रमात् आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षयः अथप्रेतपिंडः तेचा
मान्नेनैवेतिहलायुधः चरुणेत्यन्योयद्यपिहेमाद्रौ पारस्करेणशूद्रेत्रिंशत्प्रकीर्तिताइत्युक्तं तथापिप्रेतेभ्यःसर्व

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

वर्णेभ्यः पिंडान्दद्याद्दशैव षेति तैनेवोक्तेर्दशैव अन्ये तु यावद्दशाशौचं प्रेतस्योदकं पिंडं च दद्युरिति विस्मृत्के त्रिंशाद्दिंश
ति पंच दश सात्र पक्षेषु नत्तंरव्यथा पिंडा इत्याहुः हेमाद्रौ ब्राह्मे तु विप्रान्येषु दशापिंडपक्षे त्यपिंडोत्कर्ष उक्तः देयस्तु द
शमः पिंडो राज्ञां वै द्वादशेऽहनि वैश्यानां वै पंचदशे मासे शूद्र प्रदीयते सद्यः शौचत्र्यहाहे तु तत्रैव सद्यःशौचे प्रदात
व्याः सर्वेपि युगपत्तथा अहाशौचे प्रदातव्यः प्रथमेऽह्नि एक एव हि द्वितीयेऽहनि चत्वारस्तृतीये पंच चैव हि शातातपः
अशौचस्य च ह्रासेपि पिंडान्दद्याद्दशैव तु अशौचोत्तरं दाहे पर्णशरे चाशौचह्रासः अत्र देशाकत्तक्यश्चेयं प्रथमे
हनि यद्द्रव्यं तद्व्यस्याद्दशाहिकं यत्राद्येदीयते पिंडस्तत्र सर्वं समापयेदिति क्रियानिबंधे व्यासोक्तेः ब्राह्मे प्रथ
मेहनि यो दद्यात्स एतायान्नं समाहितः अन्नेन वस्तु वान्येषु स एव प्रदद्यात्स्वपि दाहकर्तें च दशाहं कुर्यादिति मिता
क्षरायां श्रुद्दीतत्वेवायवीयेपि असगोत्रसगोत्रो वा यदि स्त्री यदि वा पुमान् प्रथमाग्निदाता प्रेतस्य पिंडं दद्यात्स ए ७५
व हि कर्तुमत्तो नु तत्रैव वृहस्पतिः एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते तद्धुनाक्रिया कार्या सर्वैर्वा राह

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

कारिभिः अन्येनशेषःकार्यइतिगौडाः आदितःसर्वमित्यन्ये आदिपुराणे उपरिष्ठिनामर्यपिंडंप्रेतायेतिसमुच्चरेत्
अथप्रयोगः ऐक्यानांवेदिंकृत्वातेजसेमृन्मयेवाचरुंश्रपयित्वा सक्तुनावातिलमधुघृतयुतंकपित्थमात्रंपिंडंकृत्वा
तिथ्यादियुक्त्वा काश्यपगोत्रस्यामुकप्रेतस्यमूर्धक्षऽंगतावयवंशांभूत्यैप्रथमाहिकेदेहपूरकपिंडदानंकरिष्ये द्वि
तीयाहाहो द्वितीयाह्निकेत्यादि ततःपाषाणाग्रेविष्णुंसंपूज्य दर्भासनमवनेजनंचकृत्वा मुकप्रेतेत्यादिमूर्धावयव
संभूत्यै देहपूरकःप्रथमाहिकएषतेपिंडउपतिष्ठतां प्रत्यवनेजनं गंगाजलतुलसीपत्राणि धूपदीपनैवेद्यतांबूलद
क्षिणानि अनादिनिधनोदेवशंखचक्रगदाधर अक्षय्यपुंडरीकाक्षप्रेतमोक्षप्रदोभवेतिप्रार्थ्य नारायणस्मर
णपूर्वकंपिंडंजलेक्षिपेत् अंजलिदानंतत्क्रमेव एवंदशाहं तत्रसंकल्पोविशेषः चक्षुःश्रोत्रनासामुखावय
वनिष्पत्त्यर्थमिति चतुर्थे जानुजंघापादावयवसिध्यर्थमितिपंचमो विषमश्चाद्वेच नाभिलिंगगुदनिष्पत्त्य
र्थमिति षष्ठे मज्जामेदोमांसस्नायुनाडीरूपावयवसंभूत्यैइतिसप्तमे विषमश्चाद्वेच दंतलोमनखावयसिध्य

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

र्थमित्यष्टमे वीर्यममर्मावयवसिध्यर्थमिति नवमे देहपूर्णत्वतत्प्रेताक्षुद्धिपर्ययसिध्यर्थमिति दशमे प्रत्यहमजलि
संख्याथोरकुंभाश्चदेयाः अत्यशक्तौ तु पिंडषट्काद्युतादेयं प्रेतायान्हिं दिनत्रयमितिज्ञेयं अपरार्के व्यासः आ
शौचांत्यदिने क्षौरं जनन्यां च गुरोष्टते आपस्तंबः अनुभाविनां च परिवापनं अनुभाविनः कनिष्ठाइति मिता
क्षरारत्नाकरादयः आशौचमनुभवतां सर्वेषां वपनमिति शुद्धितत्वादयो गौडाः तदुक्तं रत्नमालायां अशौ
यानरपते द्विजन्मनां हारकर्म मृतसूतकेषु च बंधमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु अपरार्के
व्यासः पुत्रः पत्नी च वपनं कुर्याद्दंतेयथाविधि पिंडदानोचितान्योपि कुर्याद्धित्थं समाहितः पुत्राणामाद्यं तयोः
समुच्चयः दशादिने त्वेवपनपिंडं दत्वा त्रिकोणां वेदिं कृत्वा गोमयेन संमृज्य हरिद्रादिना लंकृत्य तत्र कुंभपंचकं जल ७६
पूर्णं संस्थाप्य तदुपरि पिंडान् क्रमेण संस्थाप्य मध्ये प्रेताय प्रेतसखिभ्यः पूर्वे वैवस्वताय यमाय दक्षिणे वायसेभ्यः
पश्चिमे प्रेताधिपतये रुद्राय उत्तरे पादुकादि निवेद्य ततः पश्चिमदेशस्थं पिंडं वायसो यावद्भक्षयेत्तावत्स्पर्यं तं तत्रस्थिता

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नोत्तरमिति निशिष्टाः हेमाद्रौ शंखः आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव
सः अद्रैप्येवं तदाह पैठीनसिः एकादशेऽह्नि पित्र्याद्धं तत्सामान्यमुदाहृतं चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथ
क् यत्तु मरीचिः आशौचांते ततः सम्यक् पिंडदानं समाप्यते ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरिति तत्स
र्वेषां दशाहपर्यंतं तु मासस्य एकादशेऽहनि तथा विप्राने कादशेवतु क्षत्रादिः सूतकांते तु भोजयेद्युग्मो द्विजानि
ति -तद्वृद्गणश्राद्धपरं तु मुद्दिश्य कर्त्तव्यं प्रेतप्रीतिकरं हितमिति वचनादिति मदनपारिजातः कल्पतरुः
शूलपाणिं वा च स्पष्ट्वाद्यस्त्वासम्यक् वचनाद्यथाशौचापगम इति विस्मृक्तेः प्रागुक्तशंखादिवचनानां चानाकर
त्वाद्धदादीनामप्याशौचांत एवाहुः अनेनु द्विविधवाक्यवशाद्देशाचारतो विकल्पमाहुः सत्यव्रतः सद्यःशौ
चेपि दातव्यं प्रेतस्यैकादशेऽहनि उशना अहाशौचेपि कर्त्तव्यमाद्यमेकादशेऽहनि अतीतविषये सद्यस्न्महो ७०
र्ध्वं वा न दिष्यते हेमाद्रौ बौधायनः एकोद्दिष्टं च एवस्याद्वादशेऽहनि वा पुनः अत ऊर्ध्वमयुग्मेषु कुर्वीत नाहः

सत्राक्रितः अर्धमासेथवामासिअतोसंवत्सरेपिवा अथवृषोत्सर्गः हेमाद्रौमात्स्येकौर्मेच नकरोतिवृषोत्सर्गंसुतार्थेवजला
जलिं नददातिसुतोयस्तपितुरुच्चारएवसः यष्टव्या बहवःपुत्रायद्येकोपिगयांव्रजे शयजेतवाश्वमेधेननीलंवावृषमुत्सृजे
त षष्ठिंशान्मते एकादशेन्हिप्रेतस्ययस्यनोत्सृज्यतेवृषः प्रेतत्वंसुस्थिरंतस्यदत्तैःश्राद्धशतैरपि यत्तुहेमाद्रौभविष्ये चैत्र्यांवा
पित्र्येतोवापांचेशाख्यांद्वादशेन्हिवा यच्चविष्णुधर्मे विष्णुवर्द्धितयेचैवमृताहेवांधवस्यचेति तत्पूर्वासंभवेज्ञेयं प्रोक्ते लोहि
तोयस्तुवर्णेनमुखेपुच्छेचपांडुरः श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते देवीपुराणे चवत्सोवात्सिभद्रेहेवासंभवतोपिवा
अथप्रयोगः तत्रपूर्वेद्युर्विष्णुरूपीप्रेततर्पणमुकंदेवंजानीयो तत्रमूलंविल्वं उपवीतोदशकालौस्मृत्वा काश्यपगोत्रस्यामुकदास
तनस्यप्रेतत्वनिवृत्त्यारुद्रलोकप्राप्त्यर्थंवैस्वादिलोकप्राप्त्यर्थंवावृषोत्सर्गंकरिष्ये इत्युक्त्वा नंदाचसुमनाचैवसुशीलाचप
यस्विनी सुरभिःपंचमीप्रोक्तेतिवृषमाहः पूजयेन्नवा ततऐशानेकुंभेरुद्रंसंपूज्याग्निंप्रतिष्ठाप्य ब्रह्मासनंकृत्वा प्रणीता

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शृ.कृ. पात्रेद्वयोर्भागयोर्जलक्षीरेप्रणीयपायसंपिष्टचरुंचकृत्वा आदौइहरतिःचषट्चआज्यभागावतःपरमितिस्पष्टतेरग्नयेस्वाहे
७८ तिषट् ततःआघारावाज्यभागौच ततःप्रजापतये इंद्राग्नये सोमायचाज्यंहुत्वा ग्नयेरुद्रायशर्वायपशुपतयेउग्रायेशानयेभो
गायमहादेवायेशानायचपायसंहुत्वापूष्णेस्वाहेतिपिष्टचरुंहुत्वाद्वयोःस्विष्टकृतंहुत्वाहव्याज्येनप्रजापत्यंत्वानवाहुतीर्हुत्वा
वृषंचतस्रोद्वेएकांवावत्सतरीमलंकुर्यात् अत्रहोमस्यवेदमंत्रैरुक्तः शूद्रेहोमेनेतिमदनपालः अन्येतुनास्याहुः ततोवृ
षमग्निंचतुःपरिक्रम्य रुद्रकुंभोदकेनाभिषिच्य वृषंगाश्चगंधवस्त्राद्यैरलंकृत्यरुद्ररूपविप्रायेतत्याद्यमानंगंधंचतु
र्भ्योंदत्वा रुद्ररूपप्रेतरूपीविप्रेभ्यश्चत्वार्यामान्नानिदत्वा वृषोत्सर्गश्राद्धप्रतिष्ठार्थंदक्षिणांदत्वा वृषपदेपिंडान्दद्यादि
तिकेचित् ततोवामंत्रिमूलेन दक्षिणांगेत्रिकेणव्यत्ययेनवावृषंगाश्चांकयित्वा कुशतिलहेजलयुतंपुच्छमादायदेश
कालौवुक्त्वा काश्यपगोत्रस्यास्मत्पितुरमुकदासस्यप्रेतत्वविमुक्तिद्वारारुद्रलोकप्राप्त्यर्थमिमंवृषंवत्सतरीःसहितंरुद्रदेव राम
तममुकगोत्रायामुकप्रेतायोत्सृजामियुष्मभ्यंपतिंददाम्येतेनपतिनानास्यछंदंचरततेनश्रीरुद्रःप्रीयतामित्युक्त्वा ७८

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

पसव्येन सतिलं पुच्छोदकमादायामुकप्रेतरुद्रं तेद्वृषवत्सतयोः पुच्छोदकमुपतिष्ठतामित्युक्त्वाप्लवेत् धर्मस्त्वं वृषरूपेण जगदानं
दकारकः अष्टमूर्तिरधिष्ठानः पाहि सनातन वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः वृणोमि त्वमहं भक्त्या प्रेतं स्वर्गं नय
त्वसौ अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः वृष एवं मया दत्तस्तं तारयतु सर्वदा
तृणं भक्ष जलं पिब यथासुखं क्रीडस्वेति प्रार्थ्य ब्राह्मणे पूर्णपात्रमाचार्याय सहिरण्यं गोमिथुनं दत्वा विसृज्य ईश्वरार्पणं कु
र्यात् इति वृषोत्सर्गः ततो नवश्राद्धवत् धरं हुवाद्यष्टवसूद्देशेनाष्टावेकं वा विप्रत्यमित्येवं वक्ष्यश्राद्धमेकादशाभ्य एकस्मै वा रुद्र
गणश्राद्धं विषमश्राद्धं च कृत्वा चम्य देशकालौ स्मृत्वा काश्यपगोत्रस्यास्मत्पितुरमुकप्रेतस्य प्रेतत्वनिवृत्त्या ब्रह्मादिरूपप्राप्त्य
र्थमाद्यश्राद्धमेकादशाहे कोद्दिष्टविधिना करिष्ये इत्युक्त्वाद्यश्राद्धे मुकप्रेतस्थाने क्षणः क्रियतां तथा प्राप्नोतु भवान् प्राप्नवा
नीति इत्येकादशैकं वा विप्रं निमंत्र्याक्रोधनैः शौचपरैरित्युक्त्वा दर्भवटुवानि मंत्र्य सर्वं नवश्राद्धवत् पार्वणवर्ज्यं कार्यं तत्रद्वा
रि वृत्तमंडलं कृत्वा मुकप्रेतैष ते गंधः पाद्यमभ्यर्च्या मुकप्रेतैतत्ते पाद्यमुपतिष्ठतामित्येवं पाद्यं दत्वाचम्योदङ्मुखमुपवेश्याम

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मृ.क.
७९

कप्रेतेदंतेआसनमुपतिष्टतात्येवंपाद्यंदत्वाचम्योदङ्मुखमुपवेश्यामुकप्रेतेदंतेअयंतेर्घ्यउपतिष्टतांएषतेगंधः इदंपुष्प
धूपदीपादिअछादनंछत्रालंकारादिवोपतिष्ठतां संपूर्णतांवाचयित्वा ग्नौकरणंनंतिवहवेः एतत्भाष्यमतेत्वस्ति तदानु
कप्रेतायस्वाहेत्यामेनैकाहुतिः ततःसोदकुंभमामान्नंसोपस्करममुकप्रेतायाद्यश्राद्धेउपतिष्टतां विकिरोविकल्पः ततोवेद्यां
उछिष्टपिंडेच इदंपिंडासनं अवनेजनं अपपिंडः प्रत्यवनेजनं रेखांकृत्वापिंडपूजासूत्रंच ततःस्फप्रोक्षितादिकृत्वा
गोत्रंनोवर्धतामित्युक्त्वाक्षय्योदकंदत्वादक्षिणांदत्वैकादशपक्षेआघ्रायप्रेतालंकारावाहनादिदद्यात् वृहस्पतिः प्रेतालंका
रवस्त्रादिपितुर्वाहनादिकं संपूज्यगंधमाल्यैस्तुश्राद्धभोक्त्रेतदर्पयेत् ततोभिःरम्यतामितिविसर्जयेत् शेषंनवश्राद्ध
वत् ततःआद्यमासिकंकुर्यात तत्समानंतंत्राणिषोडशश्राद्धानिच आद्याब्दिकमपीत्येक अत्रयददानमुक्तंदेवजीयगा
रुडे एकादशाहंप्रक्रम्य तदन्हिदीयंतेसर्वेद्वादसाहेविशेषतः पदानिसर्ववस्तूनिवरिष्ठानित्रयोदशायोददातिस्तत राम
स्यहतीवन्नव्यात्महेतवे स्करवीभूत्वामहामार्गेवैनतेयसगछति आसनोपानहौछात्रंमुद्रिकाचकमंडलुः भाजनंभाज ७९

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

नाधारो वस्त्राण्यष्टविधं पदं तथा भोजनासनदानेन मुद्रिकाभोजनेन च आज्यपत्रोपवीतेन पदं संपूर्णतां व्रजेत् महिषीरथ
गिदानात्सुखी भवति निश्चितं सर्वोपस्कारयुक्तानि पदान्यत्र त्रयोदश यो ददाति मनुष्येह जीवंस्त्वात्महेतवे स गच्छति परं स्थानं
महाकष्टविवर्जितः त्रयोदशपदानीत्थं प्रेतायैकादशेहनि दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत् अन्नं चैवोदकं चैवो
पानहौ च कमंडलुः छत्रं वस्त्रं तथा यष्टिर्लोहदंडं तथाष्टमं आग्निष्टिकां च दीपं च तिलान् तांबूलमेव च चंदनं पुष्पदानं चोपदा
नानि चतुर्दश योश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत् स्वमहिम्नोनुसारेण तत्तत्सुखमवाप्नुयात् अत्र तत्तद्दानमंत्राम
कृते दानकमलाकरे ज्ञेयः अत्र मूलं तु चिंत्यं अथ शय्यादानं हेमाद्रौ भविष्ये तस्माच्छय्यां समासाद्य शारदासमयीं दृढां दं
तपत्रचितां रम्यां हेमपट्टैरलंकृतां हंसतूलीप्रतीच्छन्नां शुभमंडोपधानिकां प्रच्छादनपटयुक्तां च गंधधूपाधिवासितां त
स्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं अत्र हरिस्थाने प्रेतं उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् वितेयपांडवःश्रे
ष्टाः स निद्राकलशो बुधैः तांबूलकुंकुमक्षोदकर्पूरागरुचंदनं दीपिकोपानहौ छत्रं चामरं सनभोजनं पार्श्वेषु स्थापयेद्भुक्ता

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

भू. कं.
८०

सप्तधान्यानिचैवहि शयनस्थस्यभवतियस्येदुपकारकं भृंगारकरकाधंतुपंचवर्णंवितानकं मंत्रस्क यथानुरूपमशाय
शून्यंसागरजातया शय्याममाप्यशून्यास्तु तथाजन्मनिजन्मनि यस्मादशून्यंशयनंकेशवस्यशिवस्यच अर्थतदेवदत्वेतं
तस्यसकलंप्रणिपत्यविसर्जयेत् एकादशाहेपितथाविधिरेषाप्रकीर्तितः विशेषंचावराजेंद्र कथ्यमानंनिशामया तेनो
पभुक्तंयत्किंचिद्वस्त्रवाहनभाजने यथादिष्टंचतस्यासीनत्सर्वंपरिकल्पयेत् तमेवपुरुषंहैमंतस्यसंस्थापयेत्सदा पूज
यित्वाप्रदातव्याशय्यांदद्यात्सलक्षणं कांचनंमौक्तिकंयच्चफलवस्त्रसमन्वितं संपूज्यंचदंपत्यंनानाभरणभूषितं उपवे
श्यतुशय्यांमधुपर्कंततोवदेत् रजतस्यतुपात्रेण दधिदुग्धसमन्वितं अस्थिलालाटिकंग्रत्यसूक्ष्मंकृत्वातुपायसं भो
जयेद्द्विजदंपत्यंविधिरेषसनातनः एषएवविहृष्टः पार्वतीयैर्द्विजोत्तमैः एतत्प्रागयहेत्तत्रैव गृहीतायांतुतस्यांवैपु
नःसंस्कारमर्हति भविष्ये स्वर्गेपुरंदरपुरेसूर्यपुत्रालयेतथा स्रुवेवसत्यसोजंतुःशय्यादानप्रभावतः आभूतसंप्ल
वंयावत्तिष्ठत्यांतकवर्जितः॥ ॥इतिशय्यादानं निबंधसत्यंतरे सूतकेमृतकेचैवद्वितीयंमपिकेयदि पिंडदानंप्र

राम
८०

कुर्वीत वृषोत्सर्गं तथैव च न हन्यात्सूतकं कर्म द्वादशैकादशेऽहिकं शुद्धो वा यदि वाऽशुद्धः कुर्यादेवाविचारयन् अथोदकुं
भः हेमाद्रौ स्मृतिसमुच्चये एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः दिने दिने प्रदातव्यो यावत्संवत्सरं सुतैः मदनरत्ने
गोतमः पदेव पार्वणश्राद्धं सोदकुंभस्वधर्मकं कुर्यात्प्रत्यक श्राद्धसंकल्पविधिनान्वहं अत्र पिंडे विकल्पः अहरहर
न्नमस्मै ब्राह्मणायोदकुंभं च दद्यात्पिंडमप्येके निपृणंतीति हेमाद्रौ पारस्करोक्तेः विशेषो निर्णयसिंधौ ज्ञेयः देवजानी
ये गारुडे प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः यावत्संवत्सरं चापि प्रेतस्य स्फरवलिप्सया कुर्याद्याम्यमुखं पित्र्यमं
द्भिः संकल्पस्फस्थितं अथ मासिकानि तानि कृत्वैव सपिंडनं कार्यं श्राद्धानि षोडशं दत्वा नैव कुर्यात्सपिंडनमिति लौं
गाक्षिस्मृतेः सपिंडीकरणोत्तरं पुनः कार्याणि यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं मासिकं चोदकुंभं च देयं तस्या
पि वत्सरामिति तेनैवोक्तेः सपिंडीकरणादर्वाग पकृष्य कृतान्यपि पुनरप्यपकृष्यंते हृष्युत्तरान्निषेधनादिति गालवो
केश्च तानि सपिंडनात्प्रागेकोद्दिष्टविधिनोर्ध्वं तु पार्वणेन कार्याणि ऊनमासादीनि निर्णयसिंधौ ज्ञेयं तान्याह कात्यायनः द्वाद

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मू॰क॰ त्रा प्रतिमास्यानि आद्यषण्मासिके तथा सपिंडीकरणं चैव इत्येतच्छ्राद्धषोडशं त्रैपक्षिकद्विके चैवेति श्राद्धान्येतानि
८१ षोडशेति जातूकर्ण्यपाठः अथ मूनमासिकं षण्मासिकं ऊनषष्ठं आब्दिकमूनादिकं तेनामुकेदासप्रेतस्य प्रेतत्वनि
वृत्त्या पितृलोकप्राप्त्यर्थं माद्यमासिकमूनमासिकं द्वितीयं त्रैपक्षिकं तृतीयचतुर्थः पंचमषष्ठः ऊनषष्ठः सप्तमः
अष्टम नवमः दशमः एकादशः द्वादशः ऊनाब्दिकानि श्राद्धानि स्वकालकर्त्तव्यानि सपिंडीकरणाधिकारसिध्य
र्थमेकादशे द्वादशे वाहन्यपकृष्य करिष्ये इत्युक्त्वा द्यमासिके यं तेक्षणाउपतिष्ठतामित्येवं षोडशविप्रान् कुशवटून्वा
विधायाद्यमासिके इदं तेपाद्यमित्येवं सर्वेनव श्राद्धवत्कृत्वा षोडशमासान्यानि पिंडाश्च दद्यात् अथ सपिंडनं भविष्ये
द्वादशेहनि षण्मासे त्रिपक्षे वात्रिमासि वा एकादशेथ पूर्णेह्नि मंगलस्याप्युपस्थितौ विष्णुः मासिकार्थवद्द्वादशाह
श्राद्धं कृतात्रयोदशेह्नि वा कुर्यात् मंत्रवर्जं हि शूद्राणां द्वादशेहनि कीर्त्तितं एतद्दर्शश्राद्धकारिशूद्रपरमित्यपरार्केकल्प राम
आशौचोत्तरद्वादशस्वहः शुद्धा द्वादशमासिकानि कृत्वा द्वादशे सपींडनं अधिमासे तु त्रयोदशे इत्यर्थः विस्तरे निर्णय ८१

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

सिद्धोमयः अथप्रयोगः देशकालौस्मृत्वा काश्यपगोत्रस्यास्मत्पितुरमुकप्रेतस्य प्रेतत्वनिवृत्त्यावस्वादिपितृलोकप्राप्त
र्थमेकोद्दिष्टपार्वणोभयात्मकं सपिंडीकरणश्राद्धं करिष्ये इत्युक्त्वा अस्मत्पितुरमुकप्रेतस्य गोत्रस्य स्थानं क्षणं दत्वा भव
द्भिः प्रसादः कर्त्तव्य इत्येकं ततः सव्येन कालसंज्ञकविश्वेदेवस्थाने क्षणं दत्वेत्यादिना द्वौ देवे देवानंतरं वा प्रेतक्षणः ततोपस
व्येनास्मत्पितुः काश्यपगोत्रस्यामुकदासस्य वसुरूपस्य स्थाने क्षणं दत्वोपादि एवमस्मत्पितुः पितामहस्यामुकदासस्य रुद्र
रूपस्य स्थाने इत्यादि एवमस्मत्पितुः प्रपितामहस्यामुकदासस्यादित्यरूपस्य स्थाने इत्यादि एवं षड्विप्राः कुत्रावटवोवा अ
क्रोधनैः शौचपरैरितिः जपः सर्वत्र प्रेतस्थानेनवश्राद्धवत् पित्र्ये पार्वणवत् ततः परेद्युः संकल्प्य पुनः क्षणं दत्वा देवे चतुरस्रं
मंडलं कृत्वा तद्दक्षिणे प्रेताय वर्तुलं त्रिकोणं वा कृत्वा तद्दक्षिणे वृत्तं कृत्वा क्रमेणपाद्यं दत्वाचम्य कामकालसंज्ञका विश्वेदेवाः स
माध्वं प्रेतसमास्व प्रेतस्य पितृपितामहप्रपितामहः समाध्वमित्यासनेषुपवेश्य निवीबंधं कृत्वोपक्रांतं श्राद्धकर्म करिष्ये कुरुष्वे
त्युक्ते कामकालसंज्ञकानां विश्वेषां देवानामिदमासनं स्वासनं अत्रास्यतां धर्मोसि देवे क्षणः क्रियतां तथा प्राप्नोतु भवान् प्राप्न

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

मृ.क. वानि एवं द्वितीयदैवे ततो द्वे अर्घ्यपात्रे संपन्ने स्क संपन्ने इत्युक्त्वा कामकलासंज्ञकान् विश्वान् देवान् भवत्स्व आवाहयिष्ये आ
८२ वाहयेत्युक्ते कामकलासंज्ञकेभ्यो नमः आगछंतु महाभागा इति चावाह्य कामकलादेवा इदं वो र्घ्यमिति विप्रहस्ते दत्वा पात्रं
न्युब्जं कृत्वा गंध पुष्प धूप दीप माला छादनं च दत्वा पूर्णतां वाचयित्वा प्रसव्येन स्मत्पितुः काश्यपगोत्रस्य मुकदासस्येदमा
सनमुपतिष्ठतां स्वासनं प्राप्नोतु भवानित्यादि ततः पितुः पित्रादीनां पार्वणवदासनानि दत्वा चत्वार्यर्घ्यपात्राणि तत्राद्ये चत्वा
रि पवित्राणि त्रिषु त्रीणि ततः काश्यपगोत्रामुकप्रेत एष ते र्घ्यः उपतिष्ठतामिति दत्वा द्येत्यादि काश्यपगोत्रस्यमुकप्रेतस्यार्घ्यं
तत्पितृपितामहप्रपितामहार्घ्यैः सह संयोजयिष्ये संयोजयेत्युक्ते एकं पवित्रं पितृपात्रे दत्वा काश्यपगोत्रामुकप्रेतस्वपित्रा
मुकदासेन वसुरूपेण सह संसृज्य स्वसायुज्यं गछेति तदर्घ्ये निनीयेवं तत्पितामहे न रुद्ररूपेणेति द्वितीये स्वपितामहेनादि श्र ३
त्यरूपेण सहेति तृतीये ततः एषवोनुगतः प्रेतः पितरस्तं ददामि वः शुभं भवतु त्रेषां णां जायतां चिरजीविनः इत्यभिम राम
शेत् संसृजेनानरं प्रेतायार्घ्यदानमिति मदनपालः ततः प्रेतपित्रादिभ्यः पार्वणवदर्घ्यत्रयं दत्वा न्युब्जपात्रं कृत्वा गंधपुष्पं ८२

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

धूपदीपनैवेद्यतांबूलसोपस्करदक्षिणालंकारान् प्रेताय तत्पित्रादिभ्यश्च दत्वा संपूर्णतां वाचयित्वा प्रेते प्रेताय यमाय चे
यमाहुतिरूपतिष्ठतामिति पाणौ हुत्वा वा तत्पित्रोश्चाग्नौकरणं कृत्वा देवे प्रेते तत्पित्रादिषु चामान्नानि संकल्प्योच्छिष्टपिं
डविकिरं च दत्वा गृहपाकात्पायसेन सक्तुभिर्वा प्रेताय तत्पित्रादिभ्यश्च पिंडं दत्वा. घेत्यादि काश्यपगोत्रस्यामुकदासप्रे
तस्य प्रेतत्वविमुक्त्या वस्वादिपितृलोकप्राप्त्यर्थं तत्पिंडं तत्पितृपितामहप्रपितामहानां काश्यपगोत्राणाममुकदासानां वसु
रुद्रादित्यरूपाणां पिंडैः सह संयोजयिष्ये संयोजयेत्स्वके प्रेतपिंडं त्रेवा कृत्वैकभागं मधुचादाय काश्यपगोत्रामुकप्रेत
त्वत्पिंडं त्वत्पित्रामुकगोत्रेणामुकदासेन वसुरूपेण सह संयुनज्मि एष ते पिंडः तस्मै ते स्वधा नमः एवं द्वितीयभागं पिता
महेन रुद्ररूपेण तृतीयभागं प्रपितामहेनादित्यरूपेण ततः एष वोनुगतः प्रेत इति प्रागुक्तमंत्रमुक्त्वा प्रत्यवनेजनपिंडपू
जादि कृत्वा सोपस्करदक्षिणां दत्वा गोदानादि दशदानं कृत्वा वैतरणीगोदानसंकल्पपूर्ववत् ब्राह्मणेभ्यः भूयसीं क
र्मसमापयेत् ततः पाथेयश्राद्धं कृत्वा वर्षांतं यावत् प्रत्यहमुदकुंभं दद्यात् स्वस्वकाले पुनर्मासिकानि च कुर्यात् ॥ ॥इति श्री

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

शू.क.
८३

नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतेशूद्रधर्मतत्वेऔर्ध्वदेहिकप्रयोगः॥ ॥इदंग्रंथंसमाप्तः॥

राम
८३

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

॥इति श्रुद्रकमलाकरीसमाप्तः॥

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior